प्रस्तावना।

अथ प्रकाश्यतेऽय कुवलयानन्दकारिकाख्यो ग्रन्थः श्रीमदाशाधर-पण्डितप्रणीतसुबोधव्याख्यासमलङ्कृतः सहृदयहृदयानन्दथुमाविष्कर्तुम्। एतन्मूलभूतकुवलयानन्दप्रणेतुः सुगृहीतनाम्नो विद्वत्प्रेसरस्य श्रीमद-प्पय्यदीक्षितस्येतिवृत्तं साधनवैधुर्याद्यथावन्निर्णेतुमशक्यमेव । एतद्विष-यिणी किंवदन्ती चेत्थं श्रूयते—अयहि पण्डितमूर्धन्यो द्राविडः श्रौत-स्मार्तोभयकर्मकाण्डकलापचणः सर्वतन्त्रस्वतन्त्रः भिविधार्घोघपरम्परानि-वर्हणैकपटुपरिकरतया वाराणस्यां गतः कदाचित् प्रभाते कृतभागीर-थीस्नानो निर्वर्तितप्रातराह्निको निजनिकेतं प्रत्यागच्छन् पथि शयानं रमणीयरमणीदत्ताश्लेषं प्राकृतालिङ्ग्यमानमपि निर्मुक्तविलसाधवलितं कञ्चन पुरुषमद्राक्षीत्। अपठीच स सप्रतिघविस्मयकरुणाभिभूतः—

'किं निःशङ्कं शेषे शेषे वयसि समागते मृत्यौ।' इति।

तत्पद्यार्धमाकर्ण्योज्झितप्रावरण पयोदोपक यावदवलोकयति स शयालुस्तावदेन पण्डितराज जगन्नाथराय शुद्धा श्रीमदप्पय्यदीक्षितो झटित्युत्तरार्धमभाणीत्—

'अथवा सुखं शयीथा निकटे जागर्ति जाह्नवी भवतः' इति। [illegible] इत्यादिनिर्देशमस्य पण्डितराज [illegible] आसीत्। [illegible] राज शाहाजहानस्य [illegible] [illegible] अस्य समा- पद्यान [illegible] शाहाजहानसार्वभौमः [illegible] १६२८ [illegible] १६५८ [illegible] [illegible] सम १६६५ [illegible] एके [illegible] शु.शेषमासन। एवं च [illegible]

आसीदिति स्फुटमेवेति रसगङ्गाधरप्रस्तावे निर्णीतवान् जयपुरमहाराजाश्रितः पण्डितवरो दुर्गाप्रसादशर्मा । तेन कुवलयानन्दप्रणेतुः श्रीमदप्पय्यदीक्षितस्य जीवनकालोऽपि खिस्ताब्दीयसप्तदशशतकमेवेत्यवसीयते ।

कुवलयानन्दस्य कोमलमतिबालानां दुरूहत्वात्केवलं कुवलयानन्दकारिका एव पृथगुद्धृत्य श्रीमदाशाधरपण्डितेन सरलसुबोधव्याख्यया सनाथीकृतमिदं पुस्तकं महताप्रयासेन संपाद्यास्माभिः पूर्वं मुद्रितमासीत् तथापि तत्र पदच्छेदपरसवर्णादिवैकल्यं मूल्यमप्यधिकमित्यापन्निरसनाय पुनरधुनिकप्रणालिकया यथाप्येतद्बालमनोविनोदाय स्यादिति व्याख्योदाहरणटिप्पण्यादिभिः श्लोकवर्णक्रमकोशेन च मण्डयित्वा पुस्तकरूपेण मुद्रितं सर्वेषामुपकाराय स्यादित्याशासे—

विदुषामनुचरः

पणशीकरोपाह्वो वासुदेवशर्मा ।

श्रीः

कुवलयानन्दकारिकास्यालंकारानुक्रमः।

समाप्तेयं कुवलयानन्दकारिकाणां विषयानुक्रमणिका ।

कुवलयानन्दकारिकाः ।

अलंकारदीपिकाख्यव्याख्यासंवलिताः ।

लक्ष्यलक्षणप्रकरणम् ।

श्रीकृष्णाय नमः ।

शिवयोस्तनयं नत्वा गुरुं च धरणीधरम् ।
कुर्वे कुवलयानन्दकारिकादीपिकां मुदे ॥ १ ॥
आशाधरेण कविना रामजीभट्टसूनुना ।
क्रियते कारिकाटीका बालानामुपकारिणी ॥ २ ॥

अथ तत्रभगवानप्पय्यदीक्षितनामा कविः सहृदयहृदयानन्दार्थमर्थालंकाराणां लक्ष्यलक्षणोपेताः कारिकाः कृत्वा तद्व्याख्यानरूपं कुवलयानन्दाख्यं ग्रन्थं कृतवान् । कारिकाश्च तत उद्धृत्य क्रमेण लिखितवान् । तत्र निःप्रत्यूहार्थं मङ्गलमाचरति—

मङ्गलाचरणम् ।

परस्परतपःसंपत्फलायितपरस्परौ ।
प्रपञ्चमातापितरौ प्राञ्चौ जायापती स्तुमः ॥ १ ॥

परस्परेति ॥ यत्परं परस्य तपःसंपदा अन्योऽन्यतपोलक्ष्म्या फलायितं फलवदाचरितं परस्परं याभ्यां तौ तथोक्तौ । तपोलक्ष्मी लब्ध्वेव संबन्धतया भासमानौ वस्तुतस्तु नित्यसंबन्धावित्यर्थः । प्रपञ्चस्य विश्वस्य मातापितरौ जनकौ । प्रकृतिपुरुषरूपत्वादिति भावः । प्रकर्षेण अञ्चतः पूजाविषयीभवत इति प्राञ्चौ । अञ्चतीनां पूजाविषयीभवनमर्थ इति धातुवृत्तिकारः । यद्वा प्रकर्षं अञ्चतो गच्छतस्तौ प्राञ्चौ । प्रकर्षयुक्तावित्यर्थः । जायापती दम्पती पर्यायोक्तविधया पार्वतीपरमेश्वरावित्यर्थः । स्तुमः वर्णयामः । वर्णनं हि तदुत्कर्षकथनं स्वापकर्षकथनं

१ दम्भादम्भज्ञानरहिता बाला ननु लक्षयाः । २ प्र

याचिकनमस्कारत्वेन परिणमतीति नमस्कारात्मकं मङ्गलमेत
स्नेहो द्वयोश्च' इति कर्तृबहुवचनं तदनुसारेण क्रियायाश्चेति संक्षे

अध्येतॄणां सिद्ध्यर्थं पुनर्मङ्गलमाचरति—

अमरीकबरीभारभ्रमरीमुखरीकृतम् ।
दूरीकरोतु दुरितं गौरीचरणपङ्कजम् ॥ २ ॥

अमरीति ॥ अमरीणां देवीनां कबरीभारेषु वेणीगुम्फे
भ्रमर्यः सौरभलोभादवस्थितास्ताभिर्मुखरीकृतं शब्दायमानं
योग्यत्वात्स्त्रीलिङ्गनिर्देशः पुंसां हि दूरे स्थितिर्युक्तेति । गौरी
पङ्कजं गौर्याः पार्वत्याश्चरणमेव पङ्कजं पादपद्मम् । चर
परिणतं पद्ममित्यर्थः । दुरितमन्तरायं दूरीकरोतु । दुरित
भ्रमीत्तरपदार्थस्य पङ्कजस्य चरणत्वेन परिणत्या दुरितदूरीक
योगात्परिणामालंकारो ननु रूपकमुपमा वा पङ्कजस्य प्राधान्या
रसाधारणधर्मप्रयोगाभावेति संक्षेपः । अत्र पङ्कजे स्वर्गङ्गासंबन्धि
ध्यम् । तस्य जलक्रीडागतदेवीकेशस्थभ्रमरीसंबन्धोपपत्तेः । अ
भ्रमरीमात्रसंबन्धो घटते देवीकेशगतत्वं तु नैव ॥ २ ॥

ग्रन्थप्रतिज्ञा ।

चिकीर्षितं प्रतिजानीते —

अलंकारेषु बालानामवगाहनसिद्धये ।
ललितः क्रियते तेषां लक्ष्यलक्षणसंग्रहः ॥ ३ ॥

अलंकारेष्विति ॥ बालानां बालप्रज्ञानामल्पबुद्धीनाम
प्रकरणेषु अवगाहनसिद्धये बुद्धिप्रवेशसिद्ध्यर्थं तेषामलंका
ललितः सुन्दरः स्पष्ट इत्यर्थः । लक्ष्यलक्षणयोरुदाहरणलक्षण
संग्रहः संक्षेपः क्रियते । इत्यन्वयोऽपीति शेषः । अलंकारलक्षण

[illegible]

दण्डी 'काव्यशोभाकरान्धर्मानलंकारान्प्रचक्षते' इति । गुणानां शोभाकरत्वेऽपि रसधर्मत्वान्नातिव्याप्तिः । शब्दालंकारास्त्विह न लक्षिताः सुगमत्वात् ॥ ३ ॥

उपमालंकारः ।

मुख्यत्वादुपमास्वरूपमाह—

उपमा यत्र सादृश्यलक्ष्मीरुल्लसति द्वयोः ।
हंसीव कृष्ण ते कीर्तिः स्वर्गङ्गामवगाहते ॥ ४ ॥

उपमेति ॥ यत्र श्लोकादौ द्वयोर्वर्ण्यावर्ण्ययोरर्थयोः सादृश्यलक्ष्मीः साधर्म्यशोभा । शोभाविशिष्टं साधर्म्यमित्यर्थः । पूर्वपदार्थस्य विशेष्यस्य प्राधान्यान्वये चमत्कारात् । यथा कुमारसंभवे—'तथैव वस्तुः फणरत्नशोभा' इत्यत्र । तदुक्तं तर्कशास्त्रे—'सविशेषणे हि विधिनिषेधौ सति विशेष्ये बाधे विशेषणमुपसंक्रामतः । सति विशेषणे बाधे विशेष्यमुपसंक्रामतः' इति । उल्लसति अधिकं प्रकाशते

---

१ 'ये रसस्याङ्गिनो धर्माः शौर्यादय इवात्मनः ।
उत्कर्षहेतवस्ते स्युरचलस्थितयो गुणाः ॥'

इति तल्लक्षणम् । ते च माधुर्यौजःप्रसादाख्याः । तत्र गुणस्थानमाह—

'गलितत्वमिवाह्लादपदव्या हृदये दधत् ।
माधुर्यं नाम शृङ्गारे प्ररोहं गाहते गुणः ॥
आह्लादकत्वं माधुर्यं शृङ्गारे द्रुतिकारणम् ।
करुणे विप्रलम्भे तच्छान्ते चातिशयान्वितम् ॥'

ओजोलक्षणमाह—

'दीप्त्यात्मा विस्तृतेर्हेतुरोजो वीररसस्थितिः ।
बीभत्सरौद्ररसयोस्तस्याधिक्यं क्रमेण तु ॥'

[illegible] मनो जायते तदोज इत्यर्थः । प्रसादलक्षणमाह—

'शुष्केन्धनाग्निवत्स्वच्छजलवत्सहसैव यः ।
व्याप्नोत्यन्यत्प्रसादोऽसौ सर्वत्र विहितस्थितिः ॥'

स चाऽपि शुष्केन्धनाग्निवत्स्थितः । माधुर्यं [illegible] यो गुणोऽयम् [illegible] चित्तं [illegible] रसेन [illegible] प्रसादः । अयं सर्वेषु रसेष्वन्यत्र सर्वासु रचनासु [illegible] स्थितः । २ अतएव [illegible] ।

३ 'गुणदोषौ बुधो गृह्णन्निन्दुक्ष्वेडाविवेश्वरः ।
शिरसा श्लाघते पूर्वं परं कण्ठे नियच्छति ॥'

४ पूर्वपदार्थं विशेष्यं यथा तथैव प्राधान्येनान्वय[illegible]

तन्नोपमा । यथाकाशो निदर्शनार्थं गृहीतम् । यथा हे कृष्ण, ते य-
कीर्तिः हंसीव चरति । 'चरटा चरणा हंसी' इत्यभिधानात् । स्वर्ग-
नाकनदी अवगाहते प्रविशति । अत्र सत्कर्म गुणेभ्यः प्रसरणादि-
भावः । अत्र कृष्णोपमानोपमेयवाचके हंसीशब्दोपादाने ते इत्य-
देशः । सादृश्यलक्षणमाह रुद्रटः 'अन्योन्यधर्मयोगं तु यत्र साम्यं भा-
वद्गुण्यतो' इति । अत्र वर्ण्यगुणोपेतं न्यूनगुणसवर्णगुणमानमपि
गुणम् । प्रसिद्धं च तद्धर्मयोरभेदविवक्षायामिवादयो वाचका इति
सम्प्रदायः ॥ ४ ॥

अस्योपमालंकारस्य चत्वारोऽवयवाः । उपमेयं उपमानं धर्मो
वाचकश्चेति । तेषां निबन्धने पूर्णा, यथासंभवं लोपे च लुप्तेति
सिद्धान्तः । तत्र पूर्णा दर्शिता । इदानीं लुप्ताभेदानाह—

वर्ण्योपमानधर्माणामुपमावाचकस्य च ।
एकद्वित्र्यनुपादानैर्भिन्ना लुप्तोपमाष्टधा ॥ ५ ॥

वर्ण्येति ॥ वर्ण्योपमानधर्माणां उपमेयोपमानसाधारणधर्माणां
उपमावाचकस्य सादृश्यद्योतकस्य इवादेर्वाचकस्य चतुर्णां
मध्ये । निर्धारणे षष्ठी । एकद्वित्र्यनुपादानैः । एकस्य द्वयोः त्रयाणां एक-
द्वित्रयः तेषां अनुपादानैर्लोपैरष्टधा भिन्ना लुप्तोपमा भवति । लुप्तावयवा
उपमा लुप्तोपमेति मध्यमपदलोपोऽत्र द्रष्टव्यः । एकादीनां विषयभे-
देऽपि साहित्यविवक्षायां द्वन्द्वः । बहुव्रीहौ तु एकद्विका इति स्यादिति
संक्षेपः ॥ ५ ॥

उदाहरणान्याह—

तडिद्गौरीन्दुतुल्यास्या कर्पूरन्ती दृशोर्मम ।
कान्त्या स्मरवधूयन्ती दृष्टा तन्वी रहो मया ॥ ६ ॥

तडिद्गौरीति ॥ तडिदिव गौरी गौरवर्णा । अत्र समासे वाच-
कलोपः 'उपमानानि सामान्यवचनैः' इति समासविधायकसूत्रमूलः ।
इन्दुतुल्यास्या इन्दुना तुल्यमास्यं मुखं यस्याः सा तथोक्ता । आह्लाद-
कत्वेनेति शेषः । अत्र धर्मलोपोऽविवक्षामूलः । 'गम्यमानार्थस्याप्रयोग
एव लोपोऽभिमतः' इति कैयटोक्तेः । 'अदर्शनं लोपः' इति संज्ञासू-
त्रेश्च । मम दृशोर्नेत्रयोः कर्पूरमिव आचरति कर्पूरति कर्पूरन्ती सा क-

१ 'आमन्त्रितं पूर्वमविद्यमानवत्' इति । २ [illegible]
दीयमूलोदर्शनस्य साम्यम् ।

धूयन्ती। प्रथमायां निषेधेऽपि क्वचिदङ्गीकारात्क्यजन्ताल्लटः शत्रादेशः। अत्राप्याह्लादकत्वेनेति शेषः। तस्य धर्मस्य लोप ऐच्छिकः। वाचकस्य क्विप्प्रत्ययस्येवशब्दस्य च शास्त्रकृतः। कान्त्या लावण्येन। आत्मानमिति शेषः। स्मरवधूमिव रतिमिव आचरति मन्यते इति स्मरवधूयति स्मरवधूयति सा तथोक्ता। स्वं रतितुल्यं मन्यमानेत्यर्थः। तन्वी कृशाङ्गी मया रहः रहसि। अव्ययमेतत्। दृष्टा। अत्र आत्मानमित्यस्य गम्यमानत्वादुपमेयलोप ऐच्छिकः। इवशब्दस्य [illegible] शास्त्रकृतः। कदाचित्क्वचिदिति शेषः॥ ६॥

यत्तया मेलनं तत्र लाभो मे यश्च तद्रतेः।
तदेतत्काकतालीयमवितर्कितसंभवम्॥ ७॥

यदिति॥ तत्र रहसि मे मम तया तन्व्या सह यन्मेलनं समागमः च परं यः तद्रतेः लाभः तत्पूर्वानुभूतं एतदधुना स्मर्यमाणं द्वयमपीति शेषः। अवितर्कितसंभवं अचिन्तितोपलम्भं हेतुभूतं विशेषणमेतत्काकतालीयम्। अत्र समासे स्त्रीसमागमोपमा तत्र वाचकोपमानलोपः। तद्धितार्थे च तदास्वादोपमा तत्रोपमानमात्रलोपः। तथाहि। काक इव तालमिव काकतालमिति इवार्थे तत्पुरुषः। तत्रेवशब्दस्य 'उक्तार्थानामप्रयोगः' इति शास्त्रसिद्धो लोपः। 'समासाच्च तद्विषयात्' इति ज्ञापकात्। 'मयूरव्यंसकादयश्च' इति सूत्रप्राप्तिः 'सह सुपा' इति वा। उपमानलोपस्तु कामिनीकामुकयोर्मेलनं काकतालमित्युक्तेः। पुरुषागमनस्य काकागमनमुपमानं योषागमनस्य तालफलपतनमुपमानं तयोर्मेलनस्य च काकतालमेलनमुपमानं तस्य गम्यमानत्वाल्लोपः समासार्थानन्तर्गतत्वादैच्छिकः। एवं समासार्थे वाचकोपमानलोपः। तद्धितार्थे तु काकतालमिव काकतालीयमिति इवार्थे छप्रत्ययः। तत्र काकतालसमागमजन्य आस्वादः कान्तकृतकामिन्युपभोगस्योपमानम्। तस्य गम्यमानत्वादैच्छिकलोपः। छप्रत्ययस्तूपमावाचकः। अवितर्कितसंभवमिति उभयत्र साधारणो धर्मः। काकतालशब्दयोर्निजकर्मणोर्लक्षणेति संक्षेपः। चतुर्थे चरणे 'अभवत्किं ब्रवीमि ते' इति पाठान्तरकल्पने समासार्थे धर्मोपमानवाचकलोपः। तद्धितार्थे च धर्मोपमानलोपः। अवितर्कितसंभवमिति पदलोपात्। पाठान्तरकल्पनाभावे [illegible] मदीयं पद्यमुदाहरणीयम्। यथा 'रामस्य पथि राक्षसाः सद्मसद्रूपश्च यः। पुण्यैरजाकृपाणीयं मुनीनामभवद्वधम्॥' इति। एतेऽष्टौ लुप्ताभेदाः

१ विश्वामित्रादीनाम्।

संभवन्ति । तत्रैको भेदस्त्रिलोपपक्षे धर्मोपमानवाचकलुप्तेति १ । द्वि-लोपपक्षे भेदचतुष्टयम् । धर्मवाचकलुप्ता २ वाचकोपमेयलुप्ता ३ वाचकोपमानलुप्ता ४ धर्मोपमानलुप्ता चेति ५ । एकलोपपक्षे च त्रयो भेदाः । वाचकलुप्ता ६ धर्मलुप्ता ७ उपमानलुप्ता चेति ८ । लुप्तोपमापि य-दर्शाध्याहारेण पूर्णोपमा भवति । एषैव सर्वालंकारमूलभूता । तदुक्तं चित्रमीमांसायाम्—'उपमैका शैलूषी[1] संप्राप्ता चित्रभूमिकाभेदान्[2] । रञ्जयति काव्यरङ्गे[3] नृत्यन्ती तद्विदां चेतः ॥' इति । अन्येऽपि भेदाः काव्यप्रकाशकाव्यादर्शादिषु सन्ति । इह तु विस्तरभयान्न लिखिताः ॥ ७ ॥

अनन्वयालंकारः ।

उपमानोपमेयत्वं यदेकस्यैव वस्तुनः ।
इन्दुरिन्दुरिव श्रीमानित्यादौ तदनन्वयः ॥ ८ ॥

उपमानेति ॥ एकस्यैव वर्ण्यस्य वस्तुनः यदुपमानोपमेयत्वं उपमानत्वं कल्पितमुपमेयत्वं तु यथार्थमिति बोध्यम् । तदिन्दुश्चन्द्र इन्दुरिव चन्द्र इव श्रीमान् सुन्दर इत्यादौ द्रष्टव्यमिति शेषः । अनन्वयः नास्त्यन्वयः प्रकारद्वयसंबन्धो यस्मिन्स तथोक्तः । अत्रोपमेयस्यातुल्यत्वे पर्यवसानम् ॥ ८ ॥

पर्यायेण द्वयोस्तच्चेदुपमेयोपमा मता ।
धर्मोऽर्थ इव पूर्णश्रीरर्थो धर्म इव त्वयि ॥ ९ ॥

पर्यायेति ॥ द्वयोर्वर्ण्यावर्ण्ययोः पर्यायेण परिक्रमेण तत्तु उपमानोपमेयत्वं चेत्तर्हि उपमेयोपमा मता । उपमेयाभ्यां उपमा उपमेयोपमा इति व्युत्पत्तेः । कविभिरिति शेषः । परस्परतुल्यत्वेन इतरसादृश्यव्यवच्छेदः फलमस्याः । हे राजन्, त्वयि धर्मः सुकृतं अर्थः समृद्धि-

---

१ नर्तकी । २ भिन्नभिन्नवेषान् । ३ रङ्गमण्डपे ।

४ 'गगनं गगनाकारं सागरः सागरोपमः ।
रामरावणयोर्युद्धं रामरावणयोरिव ॥' इति ।

५ पूर्वोदाहरणे श्रीमत्त्वस्य धर्मस्योपादानमस्ति इह तु गगनादेर्वैपुल्यादिधर्मस्य नास्तीति विशेषः ।

६ 'खमिव जलं जलमिव खं हंस इव चन्द्रश्चन्द्र इव हंसः ।
कुमुदाकारास्तारास्ताराकाराणि कुमुदानि ॥'

पूर्वत्र पूर्णश्रीरिति धर्म उपात्तः इह निर्मलत्वादिधर्मो नोपात्त इति भेदः ।

रिव पूर्णश्रीः संपूर्णशोभा अस्तीति शेषः । अयंश्च धर्म इव 'पूर्णश्रीः अस्तीत्यस्य गम्यमानत्वात्प्रायेणाप्रयोगः । 'अस्तिर्भवन्तीपरः प्रथमपुरुषेऽप्रयुज्यमानोऽप्यस्ति' इति भाष्योक्तेः । 'अनुलोमो विलोमश्च क्रमः पर्याय इष्यते' इति शाश्वतः ॥ ९ ॥

प्रतीपालंकारः ।

प्रतीपमुपमानस्योपमेयत्वप्रकल्पनम् ।
त्वल्लोचनसमं पद्मं त्वद्वक्त्रसदृशो विधुः ॥ १० ॥

प्रतीपमिति ॥ उपमानस्य अधिकगुणस्य उपमेयत्वप्रकल्पनं न्यूनगुणत्ववर्णनं प्रतीपम् । प्रतिगच्छन्ति आपो यस्मिन्निति प्रतीपं निम्नोन्नतस्थलं तत्सादृश्यादलंकारे लक्षणा । 'ऋक्पूर्–' इत्यादिना समासान्तोऽकारप्रत्ययः । 'द्व्यन्तरुपसर्गेभ्योऽप ईत्' इति ईदादेशः । प्रतीपादयः स्वभावाद्धीणा एवेति प्राञ्चो वृद्धाः । पद्मं कमलं त्वल्लोचनसमं त्वन्नेत्रतुल्यं स्वेति शेषः । अत्र पद्मस्य वर्ण्यत्वनियन्धनाप्रशस्त्य च तद्विपरीतत्वकल्पनाच लक्षणानुगमः । विधुश्चन्द्रस्त्वद्वक्त्रसदृशः । हे प्रिये, इति संबोधनं कल्प्यम् । चारुत्वद्योतनार्थं पुनरप्युदाहरणम् ॥ १० ॥

प्रतीपभेदः ।

अन्योपमेयलाभेन वर्ण्यस्यानादरश्च तत् ।
अलं गर्वेण ते वक्त्रकान्त्या चन्द्रोऽपि तादृशः ॥ ११ ॥

अन्येति ॥ अन्योपमेयलाभेन अन्यस्य उपमेयत्वलाभेन वर्ण्यस्य प्रस्तुतस्यानादरश्च तत्प्रतीपम् । उपमानलाभकथनेन स्तुतिः पर्यवसायिनी । हे प्रिये, ते वक्त्रकान्त्या मुखशोभया हेतुना गर्वेणालं किंचित्साध्यम् । 'गम्यमानापि क्रिया कारकविभक्तौ प्रयोजिका'

१ 'यत्त्वन्नेत्रसमानकान्ति सलिले मग्नं तदिन्दीवरं
मेघैरन्तरितः प्रिये तव मुखच्छायानुकारी शशी ।
येऽपि त्वद्गमनानुसारिगतयस्ते राजहंसा गता-
स्त्वत्सादृश्यविनोदमात्रमपि मे दैवेन न क्षम्यते ॥'
अत्र कान्तीत्यादि धर्मोपादानात्पूर्वोदाहरणवैलक्षण्यं बोध्यम् ।

२ 'गर्वमसंभाव्यमिमं लोचनयुगलेन किं वहसि मुग्धे ।
'सन्तीदृशानि दिशि दिशि सरःसु ननु नीलनलिनानि ॥'
पूर्वोदाहरणे कान्त्येति समानधर्मोपादानमिह तु नेति भेदः ।

इति करणत्वात्तृतीया। अन्यथा चतुर्थी स्यात्। चन्द्रोऽपि तादृशस्त्वद्वक्त्रसदृशः। चन्द्रस्य न्यूनगुणत्वात्प्रतीपम् ॥ ११ ॥

वर्ण्योपमेयलाभेन तथान्यस्याप्यनादरः।
कः क्रौर्यदर्पस्ते मृत्यो त्वत्तुल्याः सन्ति हि स्त्रियः ॥१२॥

वर्ण्येति ॥ वर्ण्योपमेयलाभेन वर्ण्यं च तदुपमेयं च वर्ण्योपमेयं तस्य लाभेन प्राप्त्या। भावप्रधाननिर्देशो वा। अन्यस्यानादरोऽपि तथा प्रतीपमित्यर्थः। हे मृत्यो, ते तव क्रौर्यदर्पः क्रूरत्वगर्वः कः। प्रश्ने कुत्सायां वा किंशब्दः। 'कुत्साप्रश्नवितर्केषु क्षेपे किंशब्द उच्यते' इति शाश्वतः। हि यस्मात्स्त्रियः त्वत्तुल्याः त्वदुपमेयभूताः सन्ति। अतो निरुपमत्वगर्वो व्यर्थ इति भावः ॥ १२ ॥

वर्ण्येनान्यस्योपमाया अनिष्पत्तिवचश्च तत्।
मुधापवादो मुग्धाक्षि त्वन्मुखाभं किलाम्बुजम् ॥ १३ ॥

वर्ण्येनेति ॥ वर्ण्येन सह अन्यस्य उपमायाः अनिष्पत्तिवचः असंभवोक्तिरपि तत्प्रतीपम्। हे मुग्धाक्षि, अम्बुजं त्वन्मुखाभं त्वद्वक्त्रसदृशमिति मुधापवादो मिथ्याभिशापो नतु साम्यम्। किल प्रसिद्धम् ॥ १३ ॥

प्रतीपमुपमानस्य कैमर्थ्यमपि मन्यते।
दृष्टं चेद्वदनं तस्याः किं पद्मेन किमिन्दुना ॥ १४ ॥

प्रतीपमिति ॥ उपमानस्य कैमर्थ्यं व्यर्थत्वं मन्यते यत्तदपि प्रतीपम्। यत्तदोरध्याहारः। चेद्यदि तस्याः वदनं दृष्टं तर्हि पद्मेन किं इन्दुना च किम्। न किंचित्साध्यमित्यर्थः। क्षेपे किंशब्दः ॥१४॥

---

१ 'अहमेव गुरुः सुदारुणानामिति हालाहल मा स्म तात दृप्यः। ननु सन्ति भवादृशानि भूयो भुवनेऽस्मिन्वचनानि दुर्जनानाम्॥'

२ ख उपमेयभूता यासां ताः।

३ निर्भिन्नत्व तृतीयार्थः. वर्ण्यविरहिणा साम्यस्यासंभवोपमा तस्या इत्यर्थः।

४ 'आकर्णय सरोजाक्षि वचनीयमिदं भुवि।
दाहाद्भुतस्य वक्त्रेण धार्मरत्नपर्मापने॥'

५ 'तद्वक्त्रसत्पयसः स्फिजायितौ कृपेनि विरते कुरुते यदा यदा।
समाधि भानोः परिवेषकैतवाद्यदा विधिः कुण्डलनां विधोरपि॥'

रूपकालंकारः ।

विषय्यभेदताद्रूप्यरञ्जनं विषयस्य यत् ।
रूपकं तत्रिधाधिक्यन्यूनत्वानुभयोक्तिभिः ॥ १५ ॥

विषयीति ॥ यद्विषयस्य उपमेयस्य विषय्यभेदताद्रूप्यरञ्जनं विषयिण उपमानस्य अभेदताद्रूप्याभ्यां भेदाभावतद्रूपत्वाभ्यां रञ्जनं रक्तीकरणं तद्रूपकम् । तदाधिक्यन्यूनत्वानुभयोक्तिभिः आधिक्योक्त्या न्यूनत्वोक्त्या अनुभयोक्त्या च त्रिधा भवति । रूपवत्करोति रूपयतीति रूपको लक्षणाविशेषः । रूपयुक्तं करोतीत्यर्थः । सोऽस्त्यस्मिन्निति रूपकमलंकारः । लक्षणामप्यवस्तु मत्कृते कोविदानन्दे द्रष्टव्यः ॥ १५ ॥

अयं हि धूर्जटिः साक्षाद्येन दग्धाः पुरः क्षणात् ।
अयमास्ते विना शंभुस्तार्तीयीकविलोचनम् ॥ १६ ॥

अयमिति ॥ प्रतिलोमक्रमेणोदाहरणान्याह विवक्षायाः स्वातन्त्र्यात् । 'वक्तुर्विवक्षापूर्विका शब्दार्थप्रतिपत्तिः' इति व्याहिवचनात् । अयं राजा साक्षाद्धूर्जटिः प्रत्यक्षं शिव एव । हिशब्दो निश्चयार्थे । येन क्षणात् पुरः । यद्यपि क्षणेनैवेति वक्तुं युक्तम् 'अपवर्गे तृतीया' इति सूत्रात् । तथापि बुद्धिकल्पितापादानत्वस्वीकारात्पञ्चमी । दग्धाः रिपूणामिति शेषः । अत्र अनुभयाभेदरूपके राजा अयं तार्तीयीकविलोचनं विना तृतीयनेत्रं विना । तृतीयशब्दात्स्वार्थे

१ 'चन्द्रज्योत्स्नाविशदपुलिने सैकतेऽस्मिन्सरय्वा
वादद्यूतं चिरतरमभूत्सिद्धयूनोः कयोश्चित् ।
एको वक्ति प्रथमनिहतं कैटभं कंसमन्य-
स्त्वं तत्त्वज्ञः कथय भवता को हतस्तत्र पूर्वम् ॥'
अत्र दीप्युदाहरणेऽभेदाभेदहेतुभूत पुरदाहस्य साधर्म्यमुक्तम् । इह तु अपह्नवकल्पादिरतः साम्यमात्रमिति भेदः ।
२ 'येषां द्वेष्या मम चापे कान्तासु कनकेषु च ।
तास्तु तेष्वप्यनासक्तः साक्षाद्भर्गो नराकृतिः ॥'
अत्रसाम्ये त्वदुदाहरणे शम्भुसाम्य साम्यमात्रमिह अभेदत्वेन रूपकत्वेन भेदः ।

१ राजा । ४ 'अपवर्गे तृतीया । अपवर्गे फलप्राप्तौ द्योत्यायां कालाध्वनोरत्यन्तसंयोगे तृतीया स्यात् ।

ईक्ष्यत्यन्वयः । शीधुगन्धे शिधो वर्तते । 'आम उपसेवने' इत्यस्य
गृहपर्यन्तं धान्यमनेनार्थं याति । न्यूनाभेदरूपकम् ॥ १६ ॥

शंभुर्विश्वमवत्यद्य स्वीकृत्य समदृष्टिताम् ।
अस्या मुखेन्दुना लब्धे नेत्रानन्दे किमिन्दुना ॥ १७ ॥

शंभुरिति ॥ अद्येदानीम् । 'पुरः' इति पाठे वर्णनीयोऽसौ राजा शंभुः समदृष्टितां त्रिनेत्रत्वं स्वीकृत्य गृहीत्वा । समदृष्टिता स्वीकारस्तु भाललोचनस्य गोपनेन विज्ञेयः । अन्यथा आधिक्यं न सिध्येत् । पूर्वं विषमदृष्टित्वादिति भावः । विश्वमवति जगद्रक्षति न तु संहरतीति भावः । अत्राधिक्यमेदरूपकम् । ताद्रूप्योदाहरणमाह । अस्याः कामिन्याः मुखेन्दुना वक्त्रचन्द्रेण नेत्रानन्दे लब्धे प्राप्ते सति इन्दुना किं प्रयोजनम् । न किंचिदित्यर्थः । अत्रानुभयताद्रूप्यरूपकम् ॥ १७ ॥

साध्वीयमपरा लक्ष्मीरसुधासागरोदिता ।
अयं कलङ्किनश्चन्द्रान्मुखचन्द्रोऽतिरिच्यते ॥ १८ ॥

---

१ 'त्वय्यागते किमिति वेपत एष सिन्धु-
स्त्वं सेतुमन्थकृदतः किमसौ बिभेति ।
द्वीपान्तरेऽपि नहि तेऽस्त्यवशंवदोऽद्य
त्वां राजपुंगव निषेवत एव लक्ष्मीः ॥'
शम्भुर्विश्वमित्यत्र विश्वरक्षकत्व साहश्यमुपात्तम् । इह तु नेति भेदः ।

२ 'किं पद्मस्य रुचिं न हन्ति नयनानन्दं विधत्ते न किं
वृद्धिं वा झषकेतनस्य कुरुते नालोकमात्रेण किम् ।
वक्त्रेन्दौ तव सत्ययं यदपरः शीतांशुरुज्जृम्भते
दर्पः स्यादमृतेन चेदिह तदप्यस्त्येव बिम्बाधरे ॥'
अस्या मुखेन्दुनेत्यत्र किमिन्दुनेति पुनरुपादानमात्र भेदविवक्षाहास्यम् । इह त्वपरशब्दस्याप्युपादानमिति विशेषः ।

३ 'अचतुर्वदनो ब्रह्मा द्विबाहुरपरो हरिः ।
अभाललोचनः शंभुर्भगवान्बादरायणः ॥'

४ 'किमसुभिर्ग्लपितैर्जड मन्यसे मयि निमज्जतु भीमसुतामनः ।
मम किल श्रुतिमाह तदर्थिकां नलमुखेन्दुपरां विबुधः स्मरः ॥'
अत्र दमयन्तीकृतचन्द्रोपालम्भे प्रसिद्धचन्द्रो न निर्वाणकालिकमनःप्रवेशतात्पर्यविषयः । 'मनश्चन्द्रे लीयते' इति श्रुतेः । किंतु नलमुखचन्द्र एवेति । ततोऽस्या- [illegible] । रूपकस्य सावयवत्वनिरवयवत्वाभेदप्रपञ्चन [illegible] द्रष्टव्यम् ।

साध्वीति ॥ इयं साध्वी पतिव्रता असुधासागरोदिता सुधासमुद्रादनुत्पन्ना अपरा द्वितीया लक्ष्मीरिति न्यूनताद्रूप्यरूपकम् । अयं मुखचन्द्रः कलङ्किनश्चन्द्रादतिरिच्यते । निष्कलङ्कत्वादधिको भवतीत्यधिकताद्रूप्यरूपकम् ॥ १८ ॥

परिणामालंकारः ।

परिणामः क्रियार्थश्चेद्विषयी विषयात्मना ।
प्रसन्नेन दृगब्जेन वीक्षते मदिरेक्षणा ॥ १९ ॥

परिणाम इति ॥ विषयी आरोपविषयमुखश्चन्द्रादिः विषयात्मना विषयो मुखादिः तद्रूपेण । क्रियार्थः क्रियायै इति क्रियार्थः क्रियासाधकश्चेत्तर्हि परिणामः । उदाहरणम् । मदिरेक्षणा मादकनेत्रा काचित्प्रसन्नेन दृगब्जेन दृग्भूतं अब्जं दृगब्जं तेन । मध्यमपदलोपी समासः । ननु मयूरव्यंसकादिः । तस्य रूपकविषयत्वात् । वीक्षते पश्यति । कमलं हि स्वयं द्रष्टुमशक्तं नेत्ररूपं भूत्वा पश्यतीति परिणामः । अत्र अब्जं दृक् संपद्यते तथाभूतं दृग्भूतमिति प्रथमार्थे तत्पुरुषः । एवं च परिणामाभिव्यक्तिर्न तु मयूरव्यंसकादिः । समासान्तस्य रूपकविषयत्वादिति नव्याः । एवमन्यत्र ॥ १९ ॥

उल्लेखालंकारः ।

बहुभिर्बहुधोल्लेखादेकस्योल्लेख इष्यते ।
स्त्रीभिः कामोऽर्थिभिः स्वर्द्रुः कालः शत्रुभिरैक्षि सः ॥२०॥

बहुभिरिति ॥ एकस्य वस्तुनः बहुभिः कर्तृभिः बहुधा बहुभिः प्रकारैः उल्लेखाद्ग्रहणाद्धेतोरुल्लेखनामालंकार इष्यते । उदाहरणम् । स कृष्णः स्त्रीभिः कामः कंदर्परूपः ऐक्षि विलोकितः । अर्थिभिर्याचकैः स्वर्गद्रुमरूप ऐक्षि । शत्रुभिः कालः मृत्युरूप ऐक्षि । अत्र रूपकमपि ज्ञेयम् ॥ २० ॥

१ 'गत्वा भूतेशमौलिं घनममरधुनीमात्मनाथो मृणाल-
स्तम्भे सौमित्रिमैत्रीमयमुपहसतामादरं भावियाय ।
श्यामप्रासादतन्वीभिः शातकुम्भनिभिः कौतुकोदञ्चदक्षं
कृष्णाद्रुन्धीयमानः शजमपलमथो चित्रकूटं प्रपेदे ॥'
आनर्र सूत्रम् । धंतुवेन उदयती अक्षिणी दक्षिणवर्षेण यथा ८८ ।
२ 'गजत्रातेति वृन्दाभिः श्रीकान्त इति योगिभिः ।
यथास्थितश्च बालाभिर्दृष्टः शौरिः सवानुजम् ॥'

ईकप्रत्ययः । शंभुगर्भो शिवो वर्तते । 'आप उपवेशने' इत्यम
पूर्वपदांतरं धातूनामनेकार्थत्वात् । न्यूनाभेदरूपकम् ॥ १६ ॥

शंभुर्विश्वमवत्वद्य स्वीकृत्य समदृष्टिताम् ।
अस्यां मुखेन्दुना लब्धे नेत्रानन्दे किमिन्दुना ॥ १७ ॥

शंभुरिति ॥ अद्येदानीम् । 'एषः' इति पाठे वर्णनीयोऽसौ राज
शंभुः समदृष्टितां द्विनेत्रत्वं स्वीकृत्य गृहीत्वा । समदृष्टिता स्वीकारस्तु
भाललोचनस्य गोपनेन विवक्षितः । अन्यथा आधिक्यं न सिध्येत् । पूर्वं
विषमदृष्टित्वादिति भावः । विश्वमवतु जगद्रक्षतु नतु संहरत्विति
भावः । अत्राधिक्याभेदरूपकम् । ताद्रूप्योदाहरणान्याह । अस्याः
कामिन्याः मुखेन्दुना वक्त्रचन्द्रेण नेत्रानन्दे लब्धे प्राप्ते सति इन्दुना
किं प्रयोजनम् । न किंचिदित्यर्थः । अत्रानुभयताद्रूप्यरूपकम् ॥ १७ ॥

साध्वीयमपरा लक्ष्मीरसुधासागरोदिता ।
अयं कलङ्किनश्चन्द्रान्मुखचन्द्रोऽतिरिच्यते ॥ १८ ॥

---

१ 'त्वय्यागते किमिति वेपत एष सिन्धु-
स्त्वं सेतुमन्थकृदतः किमसौ बिभेति ।
द्वीपान्तरेऽपि नहि तेऽस्त्यवशंवदोऽद्य
त्वां राजपुंगव निषेवत एव लक्ष्मीः ॥'

शंभुर्विश्वमित्यत्र विश्वरक्षकत्वं सादृश्यमुपात्तम् । इह तु नेति भेदः ।

२ 'किं पद्मस्य रुचिं न हन्ति नयनानन्दं विधत्ते न किं
वृद्धिं वा झषकेतनस्य कुरुते नालोकमात्रेण किम् ।
वक्त्रेन्दौ तव सत्ययं यदपरः शीतांशुरुज्जृम्भते
दर्पः स्यादमृतेन चेदिह तदप्यस्त्येव बिम्बाधरे ॥'

अस्या मुखेन्दुनेत्यत्र किमिन्दुनेति पुनरुपादानमात्रं भेदविवक्षाज्ञापकम् । इह
त्वपरशब्दस्याप्युपादानमिति विशेषः ।

३ 'अचतुर्वदनो ब्रह्मा द्विबाहुरपरो हरिः ।
अभाललोचनः शंभुर्भगवान्बादरायणः ॥'

४ 'किमसुभिर्ग्लपितैर्जड मन्यसे मयि निमज्जतु भीमसुतामनः ।
मम किल श्रुतिमाह तदर्थिकां नलमुखेन्दुपरां विबुधः स्मरः ॥'

अत्र दमयन्तीकृतचन्द्रोपालम्भे प्रसिद्धचन्द्रो न निर्वाणकालिकमनःप्रवेशतात्पर्य-
विषयः । 'मनश्चन्द्रे लीयते' इति श्रुतेः । किंतु नलमुखचन्द्र एवेति । ततोऽस्या-
धिक्यप्रतिपादनादधिकताद्रूप्यरूपकम् । रूपकस्य सावयवत्वनिरवयवत्वाभेदप्रपञ्चनं
तु चित्रमीमांसायां द्रष्टव्यम् ।

साध्वीति ॥ इयं साध्वी पतिव्रता असुधासागरोदिता सुधासमुद्रादनुत्पन्ना अपरा द्वितीया लक्ष्मीरिति न्यूनताद्रूप्यरूपकम्। अयं सुरचन्द्रः कलङ्किनश्चन्द्रादतिरिच्यते। निष्कलङ्कत्वादधिको भवतीत्यधिकताद्रूप्यरूपकम् ॥ १८ ॥

परिणामालङ्कारः।

परिणामः क्रियार्थश्चेद्विषयी विषयात्मना।
प्रसन्नेन दृगब्जेन वीक्षते मदिरेक्षणा ॥ १९ ॥

परिणाम इति ॥ विषयी आरोपविषयश्चन्द्रादिः विषयात्मना विषयो मुखादिः तद्रूपेण। क्रियार्थः क्रियायै इति क्रियार्थः क्रियासाधकश्चेत्तर्हि परिणामः। उदाहरणम्। मदिरेक्षणा मादकनेत्रा काचित्प्रसन्नेन दृगब्जेन दृग्भूतं अब्जं दृगब्जं तेन। मध्यमपदलोपी समासः। ननु मयूरव्यंसकादिः। तस्य रूपकविषयत्वात्। वीक्षते पश्यति। कमलं हि स्वयं द्रष्टुमशक्तं नेत्ररूपं भूत्वा पश्यतीति परिणामः। अत्र अब्जं दृक् संपद्यते तथाभूतं दृग्भूतमिति प्रथमार्थे तत्पुरुषः। एवं च परिणामाभिव्यक्तिर्न तु मयूरव्यंसकादिः। समासान्तस्य रूपकविषयत्वादिति नव्याः। एवमन्यत्र ॥ १९ ॥

उल्लेखालङ्कारः।

बहुभिर्बहुधोल्लेखादेकस्योल्लेख इष्यते।
स्त्रीभिः कामोऽर्थिभिः स्वर्द्रुः कालः शत्रुभिरैक्षि सः ॥२०॥

बहुभिरिति ॥ एकस्य वस्तुनः बहुभिः कर्तृभिः बहुधा बहुभिः प्रकारैः उल्लेखाद्वितर्कितोल्लेखनामालंकार इष्यते। उदाहरणम्। स कृष्णः स्त्रीभिः कामः कंदर्परूपः ऐक्षि वितर्कितः। अर्थिभिर्याचकैः स्वर्गद्रुमरूप ऐक्षि। शत्रुभिः कालः मृत्युरूप ऐक्षि। अत्र रूपकमपि ज्ञेयम् ॥ २० ॥

१ 'तीर्त्वा भूतेशमौलिस्रजममरधुनीमात्मनासौ तृतीय-
स्तस्मै सौमित्रिमैत्रीमयमुपकृतवानातरं नाविकाय।
व्यामप्राहस्तनीभिः शबरयुवतिभिः कौतुकोदञ्चदक्षं
कृच्छ्रादन्वीयमानः क्षणमचलमथो चित्रकूटं प्रतस्थे ॥'
आतरं मूल्यम्। कौतुकेन उदञ्चती अक्षिणी यस्मिन्कर्मणि यथा तथा।

२ 'गजत्रातेति वृद्धाभिः श्रीकान्त इति यौवतैः।
यथास्थितश्च बालाभिर्दृष्टः शौरिः सकौतुकम् ॥'

एकेन बहुधोल्लेखेऽप्यसौ विषयभेदतः ।
गुरुर्वचस्यर्जुनोऽयं कीर्तौ भीष्मः शरासने ॥ २१ ॥

एकेनेति ॥ एकेन कर्त्रा एकस्यैवि शेषः । विषयभेदतः स्थानकभेदात् । बहुधा उल्लेखेऽपि असावुल्लेखो ज्ञेयः । उदाहरणम् । अयं राजा वचसि वचनविषये गुरुर्महान्वाचस्पतिश्च । कीर्तौ यशसि अर्जुनः शुभ्रः पार्थश्च । शरासने धनुषि भीष्मो भयंकरो गाङ्गेयश्च । अत्र श्लेषो रूपकं च ज्ञेयम् ॥ २१ ॥

स्मृति–भ्रान्ति–संदेहालङ्काराः।

स्यात्स्मृतिभ्रान्तिसंदेहैस्तदङ्कालंकृतित्रयम् ।
पङ्कजं पश्यतः कान्तामुखं मे गाहते मनः ॥ २२ ॥

स्यादिति ॥ स्मृतिभ्रान्तिसंदेहैः स्मरणभ्रमसंशयैः करणैस्तदङ्कालंकृतित्रयं ते अङ्काः यस्य तत्तदङ्कं तद्वाचकशब्दयुक्तनामकं अलंकृतीनां त्रयं स्यात् । स्मृतिवर्णने स्मृतिमान्, भ्रान्तिवर्णने भ्रान्तिमान् संदेहवर्णने संदेहः । मत्वर्थीयोऽकारप्रत्ययान्तः संदेह इति केचित् । प्रथमज्ञानमनुभवः तस्य पुनर्नवीभावः स्मृतिः । मिथ्याज्ञानं भ्रान्तिः अनुभवभ्रमयोगः संदेहः । उदाहरणम् । पङ्कजं पश्यतः मे मनः कान्तामुखं गाहते प्रविशति स्मरतीत्यर्थः ॥ २२ ॥

अयं प्रमत्तमधुपस्त्वन्मुखं वेत्ति पङ्कजम् ।
पङ्कजं वा सुधांशुर्वेत्यस्माकं तु न निर्णयः ॥ २३ ॥

१ 'अङ्कशं कुचयोः कृशं विलग्ने विपुलं चक्षुषि विस्तृतं नितम्बे ।
अधरेऽरुणमाविरस्तु चित्ते करुणाशालिकपालिभागधेयम् ॥'

२ वितर्केऽपि ।

३ 'दिव्यानामपि कृतविस्मयां पुरस्ता-
दम्भस्तः स्फुरदरविन्दचारुहस्ताम् ।
उद्वीक्ष्य श्रियमिव कांचिदुत्तरन्ती-
मस्मार्षीज्जलनिधिमन्थनस्य शौरिः ॥'

पूर्वत्र स्मृतिमदुदाहरणे सदृशस्यैव स्मृतिरत्र सदृशलक्ष्मीस्मृतिपूर्वकं तत्सम्बन्धिनो जलनिधिमन्थनस्यापि स्मृतिरिति भेदः ।

४ 'पलाशकुसुमभ्रान्त्या शुकतुण्डे पतत्यलिः ।
सोऽपि जम्बूफलभ्रान्त्या तमलिं धर्तुमिच्छति ॥'

अत्रान्योन्यविषयभ्रान्तिनिबन्धनः पूर्वोदाहरणाद्विशेषः ।

५ 'जीवनग्रहणे नम्रा गृहीत्वा पुनरुन्नताः ।

अयमिति ॥ अयं प्रमत्तमधुपः उन्मत्तभ्रमरः । मत्तो मधपश्चेति श्लेषः । त्वन्मुखं पङ्कजं वेत्ति । अस्माकं तु पङ्कजं वा सुधांशुर्वेति निर्णयो नास्ति किंतु संदेहद्वयमस्तीत्यर्थः । मधुपस्य तु भ्रान्तिरेव ॥ २३ ॥

शुद्धापह्नुत्यलंकारः ।

शुद्धापह्नुतिरन्यस्यारोपार्थो धर्मनिह्नवः ।
नायं सुधांशुः किं तर्हि व्योमगङ्गासरोरुहम् ॥ २४ ॥

शुद्धेति ॥ अन्यस्याप्रस्तुतस्य आरोपार्थः आरोपहेतुको यो धर्मनिह्नवः अपलापः । निषेध इति यावत् । शुद्धा केवला अपह्नुतिरलंकृतिर्भवति । शुद्धत्वं च निह्नुतस्य परस्मिन्नारोपाभावः । उदाहरणम् । अयं दृश्यमानः सुधांशुः चन्द्रो न । तर्हि किम् । व्योमगङ्गासरोरुहं स्वर्गङ्गापुण्डरीकम् । अत्र सर्वनाम्ना धर्मनिर्देशः ॥ २४ ॥

हेत्वपह्नुत्यलंकारः ।

स एव युक्तिपूर्वश्चेदुच्यते हेत्वपह्नुतिः ।
नात्र इन्दुस्तीव्रो न निदर्कः सिन्धोरौर्वोऽयमुत्थितः ॥ २५ ॥

स इति ॥ स धर्मनिह्नवः युक्तिपूर्वो हेतुयुक्तश्चेत्तर्हि हेत्वपह्नुतिरुच्यते । हेतुयुक्ता अपह्नुतिर्हेत्वपह्नुतिः । उदाहरणम् । दृश्यमानः

किं कालिन्दी किमु [illegible] घटीयन्त्रस्य कुम्भः ॥'
[illegible] इति अत्र ।

१ 'अङ्क केऽपि शशाङ्किरे जलनिधेः पङ्कं परे मेनिरे
सारङ्गं कतिचिच्च संजगदिरे भूच्छायमैच्छन्परे ।
इन्दौ यद्दलितेन्द्रनीलशकलश्यामं दरीदृश्यते
तत्सान्द्रं निशि पीतमन्धतमसं कुक्षिस्थमाचक्ष्महे ॥'

[illegible]

[illegible]

[illegible]

[illegible]

[illegible]

[illegible]

[illegible]

[illegible]

[illegible]

तीव्रः संतापकारी अयमिन्दुर्न। निशि रात्रावर्कोऽपि न स्यात्। अस्ति इति शेषः। तर्हि कः? सिन्धोरुत्थित और्वः। 'और्वस्तु वाडवो वडवानलः' इत्यमरः। हरिवंशे उर्वस्य मुनेः कोपाग्निः सागरे स्थापित इति प्रसिद्धम्। कालिकापुराणे च कामदाहे हरकोपाग्निर्वाडवरूपेण ब्रह्मणा जठरे गृहीतोऽद्यापि समुद्रे रक्षित इति स्थितम्। तन्मध्ये प्रथमपक्षे उर्वाज्जात और्व इति व्युत्पत्तिः॥ २५॥

पर्यस्तापह्नुत्यलंकारः।

अन्यत्र तस्यारोपार्थः पर्यस्तापह्नुतिश्च सः।
नायं सुधांशुः किं तर्हि सुधांशुः प्रेयसीमुखम्॥ २६॥

अन्यत्रेति॥ अन्यत्र अन्यवस्तुनि तस्य प्रकृतस्यारोपार्थः यः धर्मनिह्नवः स पर्यस्तापह्नुतिः। उदाहरणम्। अयं सुधांशुश्चन्द्रो न तर्हि किं परन्तु सुधांशुरिति प्रश्नः। प्रेयसीमुखं सुधांशुरित्युत्तरम्। चन्द्रे चन्द्रत्वनिह्नवः प्रियामुखे तदारोपार्थः॥ २६॥

भ्रान्तापह्नुत्यलंकारः।

भ्रान्तापह्नुतिरन्यस्य शङ्कायां भ्रान्तिवारणे।
तापं करोति सोत्कम्पं ज्वरः किं न सखि स्मरः॥२७॥

---

१ 'हालाहलो नैव विषं विषं रमा जनाः परं व्यत्ययमत्र मन्वते।
निपीय जागर्ति सुखेन तं शिवः स्पृशन्निमां मुह्यति निद्रया हरिः॥'

विषं रमैवास्ति किंतु इत्यध्याहारः। परं केवलम्। व्यत्ययं वैपरीत्यम्।

२ अत्र तापं करोतीति भ्रान्त्युत्पादनं कथितं तस्य ज्वरसाधारण्यात्समुद्‌भूता अन्यथा ज्वरः किमिति पृष्टे, न सखि इति तत्त्वोक्त्या भ्रान्तिवारणं कृतम्।

यथा वा—

'नागरिक समधिकोन्नतिरिह महिषः कोऽयमुभयतःपुच्छः।
नहि नहि करिकलभोऽयं शुण्डादण्डोऽयमस्य न तु पुच्छः॥'

पूर्वोदाहरणे संदेहरूपभ्रान्तिविषयज्वरत्वापह्नवः। ज्वरः किमिति प्रश्नेन तद्विषयसंदेहावगमात्। इह तु महिषत्वनिश्चयरूपभ्रान्तिविषयस्य महिषत्वस्येति ततो भेदः।

जटा नेयं वेणीकृतकचकलापो न गरलं
गले कस्तूरीयं शिरसि शशिरेखा न कुसुमम्।

भ्रान्तेति ॥ अन्यस्य शङ्कायां सत्यां सत्यकथनेन भ्रान्तिवारणे कृते सति भ्रान्तापह्नुतिः । उदाहरणम् । हे सखि, सोत्कम्पं तापं कः करोतीति पृष्टा ज्वरः किमिति पृष्टे हे सखि, ज्वरो न किंतु स्मर इति सत्यकथने ज्वरत्वस्य निह्नवो भ्रान्तिवारणार्थः ॥ २७ ॥

कैतवापह्नुत्यलङ्कारः ।

कैतवापह्नुतिर्व्यक्तौ व्याजाद्यैर्निह्नुतैः पदैः ।
निर्यान्ति स्मरनाराचाः कान्तादृक्पातकैतवात् ॥ २८ ॥

कैतवेति ॥ व्याजोक्त्यादिपदैर्निह्नवे व्यक्ते सति कैतवापह्नुतिः । उदाहरणम् । कान्तादृक्पातकैतवात् कामिनीकटाक्षमिषात् स्मरनाराचाः कामबाणाः निर्यान्ति कटाक्षत्वं मिषमात्रं कामबाणत्वं तु सत्यमित्यपह्नवः ॥ २८ ॥

छेकापह्नुत्यलङ्कारः ।

छेकापह्नुतिरन्यस्य शङ्कातस्तथ्यनिह्नवे ।
प्रजल्पन्मत्पदे लग्नः कान्तः किं न हि नूपुरः ॥ २९ ॥

इयं भूमिर्गौर्हि त्रिदशविमदजन्मा धवलिमा
पुरारातिप्रान्त्याः कुसुमशर किं मां प्रहरसि ॥'

इत्यत्र त्वत्र तत्त्वाख्यानोपमेत्युपमाभेदं मेने । यदाह—
'न पद्मं मुखमेवेदं न भृङ्गौ चक्षुषी इमे ।
इति विस्पष्टसादृश्यात्तत्त्वाख्यानोपमा मता ॥' इति ।

अत्र [illegible] पूर्वपक्षाभावात् ।
निश्चयस्य [illegible] ।

१ 'किंतु धार्मिकतया विधिनोदितेषु
मध्याह्नजृम्भितमहातपतापनेषु ।
[illegible]
जिह्वा प्रसार्य तरवो जलमर्थयन्ते ॥'

२ [illegible] ।

३ 'शान्त्यै [illegible] शिक्षयति प्रणयत्यधरं तनोति रोमाञ्चम् ।
नागरिकः किं मिलितो नहि नहि सखि हैमनः पवनः ॥'

अत्र [illegible] वाक्यस्यान्यथा [illegible] ।

'पश्य त्वमग्रे स्मरामि [illegible] अधरकुन्तले
मौलिं मुरारेः किं करोमि महिते. प्रीतोऽस्मि ते विभ्रमैः ॥'

छेकेति ॥ अन्यस्य शङ्कातः शङ्कायां सत्याम् । सप्तम्यास्तसिल् । तथ्यनिह्नवे सति छेकापह्नुतिः छेकस्य चतुरस्यापह्नुतिः । उदाहरणम् । प्रजल्पन्सन् मत्पदे लग्न इति नायिकाया उक्तौ कान्तः किमिति सख्याः प्रश्नः । कान्तो नहि नैव किंतु नूपुरो मञ्जीरः । 'मञ्जीरो नूपुरोऽस्त्रियाम्' इत्यमरः । यद्यपि जल्पधातुर्व्यक्तायां वाचि प्रवर्तते तथापि धातूनामनेकार्थत्वादुपसर्गयोगाद्वा प्रजल्पन्निति नूपुरविशेषः ॥ २९ ॥

संभावनालंकारः ।

संभावना स्यादुत्प्रेक्षा वस्तुहेतुफलात्मना ।
उक्तानुक्तास्पदाद्यात्र सिद्धासिद्धास्पदे परे ॥ ३० ॥

संभावनेति ॥ वस्तुहेतुफलात्मना वस्तुहेतुफलस्वरूपेण तदन्येषामिति शेषः । संभावना उत्प्रेक्षा स्यात् । उत् ऊर्ध्वं गता प्रेक्षा दृष्टिः प्रज्ञा वा यस्यां सेति व्युत्पत्तेः । वितर्कं कुर्वतो दृष्टिर्हि तथा प्रसिद्धा । वर्णनीयस्य वस्तुनः तदन्यवस्तुस्वरूपेण वितर्कः वस्तूत्प्रेक्षा स्वरूपोत्प्रेक्षा चोच्यते । प्रकृतस्याहेतोर्हेतुत्वेनाफलस्य फलत्वेन च कल्पना क्रमेण हेतूत्प्रेक्षा फलोत्प्रेक्षा चोच्येते । हेतूत्प्रेक्षायां तृतीयान्तात्पञ्चम्यन्ताद्वा परं इवादिशब्दः । फलोत्प्रेक्षायां चतुर्थ्यन्तात्तुमन्ताद्वा परं इवादिरिति प्रायेण भेदः । इवादिस्तु इव नूनं किं प्रायः ध्रुवं मन्येऽपि किमु वा न ननु स्यात् स्वित् आहोस्वित् उत उताहो शङ्के वेद मन्ये क्रियापदं च वितर्कार्थमिति । व्याप्तव्याहारे गम्योत्प्रेक्षा । अव्याहृतत्वे स्यादपि 'कुम्भकुम्भ' इत्यादिश्लोकवाक्यस्थो गुण । सङ्केतनात् । अन्या वस्तूत्प्रेक्षा उक्तानुक्तास्पदा उक्तविषयाऽनुक्तविषया चेति द्विविधेत्यर्थः । परे द्वे सिद्धासिद्धास्पदे सिद्धविषये असिद्धविषये चेति प्रत्येकं द्विविधे । साधारणधर्मयोगेन च संभावनामूलम् ॥ ३० ॥

[illegible]
[illegible] पातु वः ॥'
'[illegible] पूर्णा [illegible] ।
[illegible] ।'
[illegible] ।
[illegible] ।
[illegible] ।

वस्तूत्प्रेक्षालङ्कारः ।

धूमस्तोमं तमः शङ्के कोकीविरहशुष्मणाम् ।
लिम्पतीव तमोऽङ्गानि वर्षतीवाञ्जनं नभः ॥ २१ ॥

उदाहरणम्—धूमेति ॥ तमो ध्वान्तं कोकीविरहशुष्मणां चक्रवाकीविरहाग्नीनाम् । 'चक्रवाके वृके कोकः' इति वैजयन्ती । 'बर्हिः शुष्मा कृष्णवर्त्मा' इत्यमरः । धूमस्तोमं धूमपटलं शङ्के । अत्र तमो विषयः धूमस्तोमो विषयीत्युत्प्रेक्षास्पदम् । तमः अङ्गानि लिम्पतीव व्याप्नोतीति दोषः । अत्र तमोव्यापनमध्याहृतविषयः । अङ्गलेपनं विषयीत्युत्प्रेक्षास्पदम् । श्लोकपूरणार्थं पुनरप्युदाहरणमाह । नभ आकाशं अञ्जनं कज्जलं वर्षतीव तमो व्याप्नोतीति दोषः । ततो-ऽनुत्प्रेक्षास्पदेयम् । प्रथमोदाहरणे पदार्थोत्प्रेक्षा द्वितीयोदाहरणे वाक्यार्थोत्प्रेक्षेति भेद इत्यवधेयम् ॥ २१ ॥

हेतूत्प्रेक्षालङ्कारः ।

रक्तौ तवाङ्घ्री मृदुलौ भुवि विक्षेपणाद्ध्रुवम् ।
इयन्मुरारे त्वच्छाया नूनं पर्यवरायते शशी ॥ २२ ॥

१ 'बालेन्दुवक्राण्यविकासभावाद्बभुः पलाशान्यतिलोहितानि ।
सद्यो वसन्तेन समागतानां नखक्षतानीव वनस्थलीनाम् ॥'

अत्र [illegible] निमित्तेन [illegible] सम्भावना [illegible] उत्प्रेक्षा । पूर्वोदाहरणे निमित्तभूतधर्मसम्बन्धो [illegible] । इह [illegible] इति भेदः । [illegible] । लिम्पतीवेत्यु-दाहरणे [illegible] ।

'पिनष्टीव तरङ्गाग्रैः समुद्रः फेनचन्दनम् ।
तदादाय करैरिन्दुर्लिम्पतीव दिगङ्गनाः ॥'

अत्र [illegible] ।

२ 'रक्तौ तवाङ्घ्री मृदुलौ भुवि विक्षेपणाद्ध्रुवम् ।
भूमौ [illegible] ॥'

[illegible]

रक्ताविति ॥ हे प्रिये, तव मृदुलौ कोमलावङ्घ्री चरणौ । 'पदङ्घ्रिश्चरणोऽस्त्रियाम्' इत्यमरः । भुवि विक्षेपणाद्भूमावारोपणात्किं रक्तौ स्त इति शेषः । महजरक्तत्वेनाहेतोरपि विक्षेपणस्य हेतुत्वं कल्पितं विक्षेपणं च प्रत्यक्षसिद्धमिति सिद्धविषया हेतूत्प्रेक्षा । अत्र हेतुत्वाभावोपेतं विक्षेपणं विषयः । हेतुत्वरूपो धर्मो विषयी बोध्यः । किंच शशी त्वन्मुखाभेच्छया त्वन्मुखकान्तिलिप्सया नूनं पद्मैः सह वैरायते वैरं करोति । अत्र चन्द्रस्य कामिनीमुखकान्तिलिप्सा नास्तीत्यसिद्धविषया हेतूत्प्रेक्षा । इयं कारणोत्प्रेक्षेति वदन्ति । 'हेतुर्ना कारणं बीजम्' इत्यमरोक्तेः । अत्र हेतुत्वाभावविशिष्टा कान्तिलिप्सा विषयः । हेतुत्वरूपो धर्मश्च विषयी ॥ ३२ ॥

फलोत्प्रेक्षालङ्कारः ।

मध्यः किं कुचयोर्धृत्यै बद्धः कनकदामभिः ।
प्रायोऽब्जं त्वत्पदेनैक्यं प्राप्तुं तोये तपस्यति ॥ ३३ ॥

मध्य इति ॥ मध्यः कामिनीमध्यभागः कुचयोर्धृत्यै किं कनक-

'विवस्वतानायिपतेव मिश्राः स्वगोसहस्रेण समं जनानाम् ।
गावोऽपि नेत्रापरनामधेयास्तेनेदमान्ध्यं खलु नान्धकारैः ॥'

अत्र विवस्वता कृत किरणैः सह जनलोचनानां नयनमस्तदेव रात्रावान्ध्य प्रति हेतुत्वेनोत्प्रेक्ष्यत इत्यसिद्धविषया हेतूत्प्रेक्षा । यथा गोपालेन परकीयाभिर्गोभिर्मिश्राः स्वीया गावो नीयन्ते । तथा गोपदवाच्यत्वसाम्यात्येन मिश्रिता विवस्वतापि नीता इवेत्यर्थ. । खलु सभावनायाम् । येन नयनेन हेतुना इदमान्ध्यं न त्वन्धकारै॰रित्यन्वय' । अत्र चानायिपतेवेति विषयोत्प्रेक्षणपूर्वक तस्य हेतुत्वेनोत्प्रेक्षणमिति पूर्वस्माद्भेदः । एव पूर्वत्र इच्छयेति गुणरूपो हेतुस्तु क्रियारूप इत्यपि द्रष्टव्यम् ।

१ 'पूरं विधुर्वर्धयितुं पयोधेः शङ्केयमेणाङ्कमणिं कियन्ति ।
पयांसि दोग्धि प्रियविप्रयोगे सशोककोकीनयने कियन्ति ॥'

अत्र चन्द्रेण कृत समुद्रस्य बृंहण सदेव तदा तेन कृतस्य चन्द्रकान्तद्रावणस्य कोकाङ्गनाबाष्पस्रावणस्य च फलत्वेनोत्प्रेक्षेति सिद्धविषया फलोत्प्रेक्षा ।

२ 'रथस्थितानां परिवर्तनाय पुरातनानामिव वाहनानाम् ।
उत्पत्तिभूमौ तुरगोत्तमानां दिशि प्रतस्थे रविरुत्तरस्याम् ॥'

रथस्थितानामिति । रवी रथे स्थिताना नियुक्ताना पुरातनानां वाहनानां अश्वानां परिवर्तनायेव तुरगोत्तमाना उत्पत्तिभूमावुत्तरस्यां दिशि प्रतस्थ इत्यन्वयः । अत्रोत्तरायणस्याश्वपरिवर्तनफलमसदेव फलत्वेनोत्प्रेक्ष्यत इत्यसिद्धविषया फलोत्प्रेक्षा । प्रायोऽब्जमित्यत्र कोमलत्वस्य गुणस्य फलत्वेनोत्प्रेक्षणमिह तु परिवर्तनक्रियाया इति ततो भेदः ।

दानभिः त्रिवलिरूपैः घद्धोऽस्ति । अत्र प्रत्यक्षसिद्धायाः कुचधृतेः फलत्वेन कल्पना सिद्धविषया फलोत्प्रेक्षा । अत्र फलत्वाभाववती कुचधृतिर्विषयः । फलत्वरूपो धर्मो विषयी । अब्जं पद्मं स्वपदेन सह ऐक्यं प्राप्तुं प्रायः । अत्रापि रूपकातिशयोक्तिः । तोये जले तपस्यति तपश्चरति । अत्र पद्मस्य प्रियापदसायुज्येच्छा नाम्नीयसिद्धविषया फलोत्प्रेक्षा । इमां कार्योत्प्रेक्षामाहुः । 'कार्यं फलं तथा व्युष्टि' इति कोशात् । 'उपमा दूरगम्यापि न तु संभावना तथा । रूपके निश्चितारोप उत्प्रेक्षायां त्वनिश्चित' ॥ २३ ॥

रूपकातिशयोक्तिः ।

रूपकातिशयोक्तिः स्यान्निगीर्याध्यवसानतः ।
पश्य नीलोत्पलद्वन्द्वान्निःसरन्ति शिताः शराः ॥ २४ ॥

रूपकेति ॥ निगीर्य विषयमिति शेषः । विषयमनिबध्येत्यर्थः । अध्यवसानत. आहार्यनिश्चयात् बाधकालीनमिच्छाजन्यं ज्ञानमाहार्यनिश्चयः । विषयिरूपेण विषयस्वीकारादित्यर्थः । रूपकातिशयोक्ति भवति । रूपकयुक्ताऽतिशयोक्तिरिति मध्यमपदलोपः । उदाहरणम नीलोत्पलद्वन्द्वात् नेत्रयुगलात् शिताः तीक्ष्णा शराः कटाक्षाः नि सरन्ति । हे मित्र, त्वं पश्य । अत्र नीलोत्पलद्वन्द्वशब्देन नेत्रयु शरशब्देन कटाक्षेषु च गौणी लक्षणा बोध्या । विशेषस्तु मत्कृते विद्यानन्दे द्रष्टव्य ॥ २४ ॥

सापह्नवातिशयोक्ति ।

यद्यपह्नुतिगर्भत्वं सैव सापह्नवा मता ।
त्वत्सूक्तिषु सुधा राजन्भ्रान्ताः पश्यन्ति तां विधौ ॥

यदीति ॥ यदि अपह्नुतिगर्भत्वं स्यादिति शेष । वा

1 'धार्या कापि स्फुरति गगने नन्दन मध्यपथा
सोपानाली मधुवनवनी काञ्चनीमिन्द्रनीली ।
अत्र शैलो मुहुरनिमुखी चन्दनच्छप्रदेशा
नक्षत्राली सुखममृत सन्निधानानुधारा ॥'

बाप न लो । १ ... ... ; ...

• 'रचितमो राज पद्मान्तद्गतान्यास्तु ध्रुवम् ।
सरो विशति न खातु गजस्नान हि निष्फलम् ॥
... मर प्रवदर्शन फल ... स्वनपद्म पदार्थ

क्षया सैव रूपकातिशयोक्तिर्मता बुधैरिति शेषः । उदाहरणम् । हे राजन्, त्वत्सूक्तिषु सुधा मधुरतारूपास्ति । भ्रान्तास्तां त्रिधौ चन्द्रे पश्यन्ति । अत्र सुधाशब्देन मधुरतायां लक्षणा बोध्या । तस्माच्चन्द्रेऽपह्नवोऽर्थसिद्धः ॥ ३५ ॥

भेदकातिशयोक्तिः ।

भेदकातिशयोक्तिस्तु तस्यैवान्यत्ववर्णनम् ।
अन्यदेवास्य गाम्भीर्यमन्यद्धैर्यं महीपतेः ॥ ३६ ॥

भेदकेति ॥ तस्य प्रकृतस्यैव अन्यत्ववर्णनं अन्यतया कथनं भेदकातिशयोक्तिः । भेदकस्य लोकोत्तरत्वस्यातिशयकथनात् । उदाहरणम् । अस्य महीपतेः गाम्भीर्यमन्यदेव लोकोत्तरमेव । धैर्यं चान्यदेव ॥ ३६ ॥

संबन्धातिशयोक्तिः ।

संबन्धातिशयोक्तिः स्यादयोगे योगकल्पनम् ।
सौधाग्राणि पुरस्यास्य स्पृशन्ति विधुमण्डलम् ॥ ३७ ॥

संबन्धेति ॥ अयोगे असंबन्धे योगकल्पनं संबन्धातिशयोक्तिः स्यात् । उदाहरणम् । अस्य पुरस्य नगरस्य सौधाग्राणि सौधानां राजगृहाणाम् । 'सौधोऽस्त्री राजसदनम्' इत्यमरः । अग्राणि शिरोभागाः विधुमण्डलं चन्द्रबिम्बं स्पृशन्ति ॥ ३७ ॥

योगेऽप्ययोगः संबन्धातिशयोक्तिरितीर्यते ।
त्वयि दातरि राजेन्द्र स्वर्द्रुमान्नाद्रियामहे ॥ ३८ ॥

योग इति ॥ योगेऽपि संबन्धेऽपि अयोग. असंबन्धकथनमपि

---

१ 'अस्येयं रूपसंपत्तिरन्या वैदग्ध्यधोरणी ।
मैषा मलिनपत्राक्षी सृष्टिः साधारणी विधेः ॥'
वैदग्ध्यधोरणी । वैदग्ध्यं चातुर्यम् । धोरणी परिपाटी ।

२ 'कतिपयदिवसैः क्षयं प्रयायात्कनकगिरिः कृतवासरावसान'।
इति मुदमुपयाति चक्रवाकी वितरणशालिनि वीररुद्रदेवे॥'
अत्र चक्रवाक्याः सूर्यास्तमयकारकमहामेरुक्षयसंभावनाप्रयुक्तसंतोषात्संबन्धो वर्णितः ।

३ अनयोरनवद्याङ्गि स्तनयोर्जृम्भमाणयोः ।
अवकाशो न पर्याप्तस्तव बाहुलतान्तरे ॥'
जृम्भमाणयोर्वर्धमानयोः ।

संबन्धातिशयोक्तिरितीर्यते कथ्यते। उदाहरणम्। हे राजेन्द्र राजन्. त्वयि दातरि सति स्वर्द्रुमान्कल्पवृक्षान्नाद्रियामहे न गणयामः । अत्र कल्पवृक्षादरसंभवेऽपि निःस्पृहत्वद्योतनायानादरोक्तिः ॥ ३८ ॥

अक्रमातिशयोक्तिः ।

अक्रमातिशयोक्तिः स्यात्सहत्वे हेतुकार्ययोः ।
आलिङ्गन्ति समं देव ज्यां शराश्च पराश्च ते ॥ ३९ ॥

अक्रमेति ॥ हेतुकार्ययोर्जनकजन्ययोः सहत्वे सद्भावे अक्रमातिशयोक्तिः स्यात्। सहभावाभिधानेन क्रमरहितत्वात्। उदाहरणम्। हे देव राजन्, 'देवः सुरे घने राज्ञि' इत्यमरः। ते शराः बाणाः च परे पराः शत्रवः। 'परोऽरिपरमात्मनोः' इति विश्वः। समं सहैव। 'साकं सार्धं समं सह' इत्यमरः। ज्यां मौर्वीं भूमिं च। 'मौर्वी ज्या सिञ्जिनी गुणः' इत्यमरः। 'ज्या कुर्वसुमती मही' इति चामरः। आलिङ्गन्ति स्पृशन्ति। शरसंधानकाले शत्रवः पतन्तीत्यर्थः ॥ ३९॥

चपलातिशयोक्तिः ।

चपलातिशयोक्तिस्तु कार्ये हेतुप्रसक्तिजे ।
यास्यामीत्युदिते तन्व्या वलयो भयदूर्मिका ॥ ४० ॥

चपलेति ॥ कार्ये जन्यवस्तुनि हेतुप्रसक्तिजे कारणप्रसङ्गजाते सति । चपलातिशयोक्तिः स्यात् । कारणप्रसङ्गमात्रेण कार्योत्पत्तिवर्णनाच्चापल्यम्। उदाहरणम् । तन्व्या कामिन्या ऊर्मिका अङ्गुलीभूषणं प्रियेण यास्यामीत्युदिते वलयः कङ्कणरूपमभजत्। कार्श्यातिशयात्- अङ्गुलीभूषणं कङ्कणस्थानीयतां गतमित्यर्थः ॥ ४० ॥

१ 'मुञ्चति मुञ्चति कोशं भजति च भजति प्रकम्पमरिवर्गः ।
हम्मीरवीरखड्गे त्यजति त्यजति क्षमामाशु ॥'

[illegible] कोशं [illegible] मुञ्चति [illegible] त्यजति [illegible] । अत्र [illegible] [illegible] ।

२ 'यामि न यामीति धवे वदति पुरस्तात्क्षणेन तन्वङ्ग्याः ।
गलितानि पुरो वलयान्यपराणि तथैव दलितानि ॥'

गुणोत्कृष्टैः समीकृत्य वचोऽन्या तुल्ययोगिता ।
लोकपालो यमः पाशी श्रीदः शक्रो भवानपि ॥ ४५

गुणेति ॥ गुणोत्कृष्टैः प्रसिद्धगुणैः समीकृत्य सदृशीकृत्य । व
प्रस्तुतस्येति शेषः । अन्या तुल्ययोगिता । उदाहरणम् । यमो ध
राजः पाशी वरुणः श्रीदः कुबेरः शक्रः इन्द्रः भवांस्त्वमपि ल
कपालः । लोकपालशब्दस्य प्रत्येकमन्वयः । तेन प्रकृतस्य रा
यमादिसमीकरणं बोध्यम् । अत्र लोकपालत्वेन प्रकृताप्रकृतयो
स्यत्वं वाच्यार्थः । प्रतापादिगुणोत्कर्षेण तुल्यत्वं ▮ व्यङ्ग्यार्थं
विशेषः । दीपके तु व्यङ्ग्यार्थो नास्ति ॥ ४५ ॥

दीपकालंकारः ।

वदन्ति वर्ण्यावर्ण्यानां धर्मैक्यं दीपकं बुधाः ।
मदेन भाति कलभः प्रतापेन महीपतिः ॥ ४६ ॥

वदन्तीति ॥ वर्ण्यावर्ण्यानां प्रकृताप्रकृतानां धर्मैक्यं धर्म
साम्यं बुधाः दीपकं वदन्ति । दीपयतीति दीपकं इति व्युत्पत्तेः
उदाहरणम् । कलभः करिशावः । 'कलभः करिशावकः' इत्यमरः
मदेन दानेन भाति । महीपतिश्च प्रतापेन भाति शोभते । अ
प्रकृताप्रकृतयोः शोभैकधर्मान्वयः ॥ ४६ ॥

---

१ 'संगतानि मृगाक्षीणां तडिद्विलसितान्यपि ।
क्षणद्वयं न तिष्ठन्ति घनारब्धान्यपि स्वयम् ॥'
इमा तुल्ययोगिता निन्दितान् [illegible] । यथाह जयदेव ।
'सिद्धिः ख्यातेषु चेन्नाम कीर्त्यते तुल्यतोक्तये ।
युवामेवेह विख्यातौ त्वं बलैर्जलधिर्जलैः ॥'

२ प्रस्तुताप्रस्तुतानामेकधर्मान्वयो दीपकम् । यथा कलभमहीपालयोः प्रस्तुत
ऽप्रस्तुतयोर्भानक्रियान्वयः । अत्रापि क्रियाविशेषणीभूतयोर्बिम्बप्रतिबिम्बभाव
बोध्यः ।

३ 'मणिः शाणोल्लीढः समरविजयी हेतिदलितो
मदक्षीणो नागः शरदि सरितः श्यानपुलिनाः ।
कलाशेषश्चन्द्रः सुरतमृदिता बालवनिता
तनिम्ना शोभन्ते गलितविभवाश्चार्थिषु नृपाः ॥'
अत्र प्रस्तुतानां नृपाणामवर्ण्यानां मण्यादीनां शोभैकधर्मान्वयः । पूर्वो
दाहरण आदिदीपकमिह त्वन्तदीपकमिति भेदः ।

आवृत्तिदीपकालङ्कारः ।

त्रिविधं दीपकावृत्तौ भवेदावृत्तिदीपकम् ।
वर्षत्यम्बुदमालेयं वर्षत्येषा च शर्वरी ॥ ४७ ॥

त्रिविधमिति ॥ दीपकावृत्तौ देहलीदीपकन्यायेनानेकोपकारस्य पदस्यार्थस्योभयोर्वा आवृत्तौ पुनरभिधाने त्रिविधं त्रिप्रकारमावृत्तिदीपकं भवेत्। आवृत्तिप्रधानं दीपकमिति व्युत्पत्तेः । उदाहरणम्। इयमम्बुदमाला मेघपङ्क्तिः वर्षति तोयं सिञ्चति । एषा शर्वरी रात्रिश्च वर्षति वर्षमिवाचरति । यद्यप्यत्र प्रथमं 'वृषु सेचने' इति धातोर्लटि रूपं द्वितीयं च वर्षशब्दस्याचारक्विबन्तस्येति पदभेदस्तथापि समानत्वेनाभेदाध्यवसायात्पदावृत्तिः ॥ ४७ ॥

उन्मीलन्ति कदम्बानि स्फुटन्ति कुटजद्रुमाः ।
माद्यन्ति चातकास्तृप्ता माद्यन्ति च शिखावलाः ॥ ४८ ॥

उन्मीलन्तीति ॥ कदम्बानि नीपकुसुमानि उन्मीलन्ति विकसन्ति

'सुवर्णपुष्पां पृथिवीं चिन्वन्ति पुरुषास्त्रयः ।
शूरश्च कृतविद्यश्च यश्च जानाति सेवितुम् ॥'

अत्र प्रस्तुतानां च युगपद्धर्मान्वयः । शालोलीढो निकषोपलपर्यन्तः । हेदिरलितो हेतिभिरायुधैर्दलितो विदीर्णितः, ध्यानपुलिना ध्यानानि छुप्तानि पुलिनानि जलनिर्मुक्तनटानि यासां ताः । ततिश्च तनो इवास्य भावतानिमा यस्य तेन । गलितविभवा गलित सकान्तो विभवः समृद्धिर्येषां ते ।

१ 'उत्कण्ठयति मेघानां माला वर्गं कलापिनाम् ।
यूनां चोत्कण्ठयत्यद्य मानसं मकरध्वजः ॥'

उत्कण्ठयति मेघानां माला पङ्क्तिः कलापिनां मयूराणां वर्गं वृन्दं उत्कण्ठयति ऊर्ध्वं कण्ठो यस्य तादृशं करोति । तथा मकरध्वजः मदनः यूनां तरुणानां मानसमुत्कण्ठयत्युत्सुकं करोतीत्यर्थभेदेऽपि शब्दसाम्यम् ।

२ 'शमयति जलधरधारा चातकयूनां तृषं चिरोत्पन्नाम् ।
क्षपयति च वधूलोचनजलधारा कामिनां प्रवासरुचिम् ॥'
'वदनेन निर्जितं तव निलीयते चन्द्रबिम्बमम्बुधरे ।
अरविन्दमपि च सुन्दरि निलीयते पाथसां पूरे ॥'

एवं आवृत्तीनां प्रस्तुताप्रस्तुतोभयविषयत्वभेदे दीपकत्व दीपकव्यपदेशः ।

'मील संश्लेषणे' इति धातोरुपसर्गयोगादर्थभेदः । किंच । कुटजद्रुमाः स्फुटन्ति विकसन्ति । लक्षणया वस्तुरूपाणि गृह्यन्ते । अत्र क्रियापद-द्वयस्यार्थमात्रावृत्तिः । चातकाः सारङ्गाख्यपक्षिणः तृप्ताः सन्तः माद्यन्ति हृष्यन्ति । शिखावलाः शिखिनश्च । शिखास्ति येषामिति मत्वर्थीयो वलच् प्रत्ययः । माद्यन्ति 'मदी हर्षे' इति धातोर्लटि रूपद्वयमित्युभयावृत्तिः ॥ ४८ ॥

प्रतिवस्तूपमालंकारः ।

वाक्ययोरेकसामान्ये प्रतिवस्तूपमा मता ।
तापेन भ्राजते सूरः शूरश्चापेन राजते ॥ ४९ ॥

वाक्ययोरिति ॥ वाक्ययोः प्रकृताप्रकृतार्थयोः । एकसामान्ये समान एव सामान्य. एकश्चासौ सामान्यश्चेति कर्मधारयः । एकस्मिन्समानधर्मत्वे सतीत्यर्थः । प्रतिवस्तूपमा मता । प्रतिवस्तु प्रत्यर्थमुपमा यस्यामिति व्युत्पत्तेः । उदाहरणम् । सूरः सूर्यः तापेन दीप्त्या भ्राजते शोभते । शूरस्तु चापेन धनुषा राजते शोभते । अत्र केषांचिदलंकाराणां परस्परं भेदः कुवलयानन्दे दर्शितः संक्षेपेणोच्यते । तुल्ययोगितायां द्वावप्यर्थौ कविवर्णनीयौ । दीपके त्वेको वर्ण्य इतरस्त्ववर्ण्यः । आवृत्तिदीपकं च वर्ण्यविषयमेव । प्रतिवस्तूपमा चोभयविषया । तत्र धर्मस्य द्विरुपादानं दीपके तु न तथेति ॥ ४९ ॥

दृष्टान्तालंकारः ।

चेद्बिम्बप्रतिबिम्बत्वं दृष्टान्तस्तदलंकृतिः ।
त्वमेव कीर्तिमान्राजन्विधुरेव हि कान्तिमान् ॥ ५० ॥

---

१ 'तवामृतस्यन्दिनि पादपङ्कजे निवेशितात्मा कथमन्यदिच्छति ।
स्थितेऽरविन्दे मकरन्दनिर्भरे मधुव्रतो नेक्षुरसं हि वीक्षते ॥'
अत्र यद्युपमेयवाक्येऽनिच्छा उपमानवाक्ये अवीक्षेति धर्मभेदः प्रतिभाति तथापि वीक्षणमात्रस्यापवर्जनीयस्य प्रतिषेधानर्हत्वादिच्छापूर्वकवीक्षाप्रतिषेधोऽयम-निच्छापर्यवसित एवेति धर्मैक्यमनुसंधेयम् ।

२ 'देवीं वाचमुपासते हि बहवः सारं तु सारस्वतं
जानीते नितरामसौ गुरुकुलक्लिष्टो मुरारिः कविः ।
अब्धिर्लङ्घित एव वानरभटैः किंत्वस्य गम्भीरता-
मापातालनिमग्नपीवरतनुर्जानाति मन्थाचलः ॥'

दिति ॥ चेद्यदि वाक्यार्थयोरिति शेषः । बिम्बप्रतिबिम्बत्व-
प्रसाकारतुल्यत्वं तर्हि दृष्टान्तो नामालंकृतिर्भवति । शब्द-
अहल्लिम्म् । उदाहरणम् । हे राजन्, अत्रेति शेषः । त्वमेव
मान् यशस्वी त्वत्तुल्यो नान्य इत्यर्थः । तथा विधुरेव कान्तिमान्
प्रभावः । विजातीयधर्मयोः साम्यं बिम्बप्रतिबिम्बभावः । सजा-
धर्मयोः साम्यं वस्तुप्रतिवस्तुभाव इति विवेकः ॥ ५० ॥

निदर्शनालंकारः ।

वाक्यार्थयोः सदृशयोरैक्यारोपो निदर्शना ।
या दातुः सौम्यता सेयं पूर्णेन्दोरकलङ्कता ॥ ५१ ॥

वाक्येति ॥ सदृशयोस्तुल्ययोर्वाक्यार्थयोरनेकपदार्थयोः । 'सु-
तिङन्तचयो वाक्यं क्रिया वा कारकान्विता' इत्यमरः । यत्तत्सामे-
क्यारोपः अभेदारोपः । निदर्शना निश्चित्य दर्शनं सादृश्यप्रकटनं नि-
दर्शना । दृशेर्ण्यन्तात् स्त्रियां भावे युच् । उदाहरणम् । या दातुः
पुंसः सौम्यता सोम इव सोमः स एव सौम्यः तस्य भावः सौम्यता
अकूरता सेयं पूर्णेन्दोः पूर्णचन्द्रस्य अकलङ्कता निष्कलङ्कता । इह
यत्तच्छब्दाभ्यामैक्यारोपः स्पष्टः । यदिति पाठे शक्यं सांतेः शुद्ध-
`सुमितिवत् सामान्ये नपुंसकत्वम् ॥ ५१ ॥

'कामं नृपाः सन्ति सहस्रशोऽन्ये राजन्वतीमाहुरनेन भूमिम् ।
नक्षत्रताराग्रहसङ्कुलापि ज्योतिष्मती चन्द्रमसैव भूमिः ॥'

पूर्वोदाहरणे बौधिकाल्लौकिकप्रतिबिम्बभावप्रयोजक मनोहारित्वस्य सा-
म्यमात्रमिह तु राजज्योतिषो प्राधान्यस्य तन्मात्रमिति भेद ।

१ 'योऽभीतो यशसौ नाम मदन समुपागम ।
मर्दापभयने सोऽयमिन्दोरमृतनिर्गम ॥'
'अप्यदर्शित कृत यावदाविर्मुद्रितम
स्वलेऽक्षमयरोपित सुचिरमृणं यन्तिम ।
स्वपुरुडमयमाभित बधिरकर्णजाप' कृतो
धृताऽन्धमुखदर्पणो यदबुधो जन सेवित ॥'
अत्रानुपपन्नमेवाया अत्यन्तोदात्तानां यन्तव्यैक्यारोप ॥

१ दानपुरुषसौम्यत्वस्योपमेयवाक्यार्थस्य पू -

पदार्थवृत्तिमप्येके वदन्त्यन्यां निदर्शनाम् ।
त्वन्नेत्रयुगलं धत्ते लीलां नीलाम्बुजन्मनोः ॥ ५२ ॥

पदार्थेति ॥ एके केचित् पदार्थवृत्तिमपि । पदार्थे वृत्तिरैक्यारोपस्थितिर्यस्यां तादृशीमपि अन्यां निदर्शनां वदन्ति । उदाहरणम् । हे प्रिये, त्वन्नेत्रयुगलं नीलाम्बुजन्मनोरिन्दीवरयोर्लीलां शोभां धत्ते तत्सदृशीमित्यर्थः । पूर्वत्र यत्तच्छब्दाभ्यामैक्यारोपः इह तु परकीयत्वेनेति भेदः ॥ ५२ ॥

अपरां बोधनं प्राहुः क्रियया सत्सदर्थयोः ।
नश्येद्राजविरोधीति क्षीणं चन्द्रोदये तमः ॥ ५३ ॥

अपरामिति ॥ प्रस्तुतस्य क्रियया असत्सदर्थयोः असतोऽनिष्टस्य सतः इष्टस्य चार्थस्य च बोधनं अपरां तृतीयां निदर्शनां प्राहुः। उदाहरणम् । तमो ध्वान्तं चन्द्रोदये सति राजविरोधी चन्द्रद्वेषि चेति श्लिष्टरूपकम् । 'राजा प्रभौ नृपे चन्द्रे यक्षे क्षत्रियशक्रयोः' इति विश्वः । नश्येदिति बोधयत् क्षीणं भवतीत्यनिष्टार्थबोधनमेतत् ५३

उदयन्नेव सविता पद्मेष्वर्पयति श्रियम् ।
विभावयत्समृद्धीनां फलं सुहृदनुग्रहम् ॥ ५४ ॥

उदयमिति ॥ सविता भानुरुदयन्नुद्गच्छन् । उत्पूर्वादयतेरात्मनेपदस्यानित्यत्वाच्छतृ शत्रादेशः । पद्मेषु श्रियं शोभां अर्पयति

१ 'वियोगे गौडनारीणां यो गण्डतलपाण्डिमा ।
अदृश्यत स खर्जूरीमञ्जरीगर्भरेणुषु ॥'
पूर्वस्मिन्नुदाहरणे उपमेय उपमानधर्मारोपः । इह तूपमाने उपमेयधर्मारोप इति भेदः ॥

२ अत्र पद्ये नेत्रयुगले नीलाम्बुजगतलीलापदारोपो निदर्शना ।

३ 'उन्नतं पदमवाप्य यो लघुर्हेलयैव स पतेदिति ब्रुवन् ।
शैलशेखरगतः पृषत्कणश्चारुमारुतधुतः पतत्यधः ॥'

४ 'चूडामणिपदे धत्ते यो देवं रविमागतम् ।
सतां कार्यातिथेयीति बोधयन्गृहमेधिनः ॥'
यथार्थ पर्वतः भगवन्तं रविं शिरसा धारयति एवं गृहमेधी समागतं सर्वं संमानयेदिति ।

निदधाति । किं कुर्वन् । सुहृदनुग्रहं स्वजनोपकारं समृद्धीनां तेजोवृद्धीनां फलं फलस्वरूपं विभावयन् बोधयन् समर्पयतीति पूर्वेणान्वयः । इष्टार्थबोधनमेतत् ॥ ५४ ॥

व्यतिरेकालंकारः ।

व्यतिरेको विशेषश्चेदुपमानोपमेययोः ।
शैला इवोन्नताः सन्तः किं तु प्रकृतिकोमलाः ॥ ५५ ॥

व्यतिरेक इति ॥ उपमानोपमेययोः विशेषः न्यूनाधिकगुणत्वं चेद्वर्ण्यते तर्हि व्यतिरेको नामालंकारः । व्यतिरेकशब्दो भावे घञन्तः । उदाहरणम् । सन्तः पुरुषाः शैला इव उन्नता उच्चतराः । किंतु प्रकृतिकोमलाः स्वभावमृदवः । शैलास्तु न तथेति विशेषः । अत्रोपमानोपमेयशब्दोपादानादुपमाविशेषो व्यतिरेक इति सूचितं । तेन न्यूनाधिकरूपकयोर्नातिव्याप्तिः । तत्र विषयविषयिशब्दाभ्यां व्यवहारात्किंचिन्न्यूनरूपकमधिकरूपकं च व्यतिरेकस्यैव प्रपञ्च इत्याहुः ॥ ५५ ॥

सहोक्त्यलंकारः ।

सहोक्तिः सहभावश्चेद्भासते जनरञ्जनः ।
दिगन्तमगमत्तस्य कीर्तिः प्रत्यर्थिभिः सह ॥ ५६ ॥

सहोक्तिरिति ॥ चेद्यदि जनरञ्जनश्चमत्कारकारी सहभावः सहभवनं सहैव द्वयोरेकक्रियाकरणमित्यर्थः । भासते तर्हि सहोक्तिः स्पष्टम् । उदाहरणम् । तस्य कीर्तिः प्रत्यर्थिभिः सह दिगन्तमगमत् । शत्रवो दिगन्तमगमन् । कीर्तिरपि तथेति नृपो-

१ 'सुधेव वसुधा सत्यमानन्दयति मानसम् ।
महात्मनामपि किं संपदा समेधयति सततम् ॥'
अत्रोपमानभूतसुधायाः उपमेयभूतवसुधायाः समाधिक्यवर्णनेन विशेष इति अर्थान्तरं व्यतिरेकालंकार इति केचिदाहुः ।

२ 'छाया संश्रयते तलं विटपिनां श्रान्तेव पान्थैः समं
मूलं याति सरोजलस्य जडता ग्लानेव मीनैः सह ।
आचामत्यहिमांशुदीधितिरपस्तप्तेव सर्वैः जनैः
निद्रा गर्भगृहं सह प्रविशति क्लान्तेव कान्ताजनैः ॥'
'अस्मद्भुजबलोद्भवपादनमविनिन्दितम् ।
विना जन्मभूता जन्म विना गुरुतरव्ययम् ॥' इत्युदाहरणे

त्कर्षस्य स्वकत्वाच्चमत्कारः । सह शिष्येणागतो गुरुरित्यादौ नास्ति चमत्कारः ॥ ५६ ॥

विनोक्त्यलंकारः ।

विनोक्तिश्चेद्विना किंचित्प्रस्तुतं हीनमुच्यते ।
विद्या हृद्यापि साऽवद्या विना विनयसंपदम् ॥ ५७ ॥

विनोक्तिरिति ॥ चेद्यदि किंचिद्विना प्रस्तुतं वर्ण्यं हीनमपकृष्टमुच्यते तर्हि विनोक्तिः स्पष्टम् । उदाहरणम् । विद्या हृद्यापि हृदयंगमापि हृदयस्य प्रिया हृद्या । 'हृदयस्य हृद्—' इत्यादिना यत्प्रत्यये हृदादेशः । विनयसंपदं सौजन्याधिक्यं विना सावद्या सदोषा । 'अवद्यपण्य—' इत्यादिना गर्ह्यार्थेऽवद्यशब्दो निपातितः । विना शिष्येणागतो गुरुरित्यादौ हीनत्वानुक्तेर्नालंकारः ॥ ५७ ॥

तच्चेत्किंचिद्विना रम्यं विनोक्तिः सापि कथ्यते ।
विना खलैर्विभात्येषा राजेन्द्र भवतः सभा ॥ ५८ ॥

तदिति ॥ चेद्यदि तत्प्रकृतं किंचिद्विना रम्यमुत्कृष्टमुच्यते तर्हि सापि विनोक्तिः कथ्यते । विधेयप्राधान्यात्स्त्रीलिङ्गनिर्देशः । उदाहरणम् । हे राजेन्द्र, एषा भवतः सभा खलैर्विना विशेषेण विभाति । अभक्ष्यं विना सर्वमभावीत्यत्र नालंकारः । रम्यत्वानुक्तेः ॥ ५८ ॥

समासोक्त्यलंकारः ।

समासोक्तिः परिस्फूर्तिः प्रस्तुतेऽप्रस्तुतस्य चेत् ।
अयमैन्द्रीमुखं पश्य रक्तश्चुम्बति चन्द्रमाः ॥ ५९ ॥

---

१ 'आधिभूते शशिनि तमसा मुच्यमानेव रात्रि-
नैशस्यार्चिर्हुतभुज इव छिन्नभूयिष्ठधूमा ।
मोहेनान्तर्धृतनुरियं लक्ष्यते मुक्तकल्पा
गङ्गारोधःपतनकलुषा गृह्णतीव प्रसादम् ॥'

२ 'मयि मुकुलितमालतीलतायां स्थितवति यानि दिनानि संगतानि ।
अहह विधिविधानतोऽधुनैवं कथमपि तानि पुनर्न वीक्षितानि ॥'
इति काव्यविलासे ।

'व्यापल्गत्कुचभारमाकुलकचं व्यालोलहारावलि
प्रेङ्खत्कुण्डलशोभि गण्डयुगलं प्रस्वेदि वक्त्राम्बुजम् ।
शश्वद्दत्तकरप्रहारमधिकश्वासं रसादेतया
यस्मात्कन्दुक सादरं सुभगया संसेव्यसे धन्यतो ॥'

समासोक्तिरिति ॥ यत्र यदि प्रस्तुते प्रकृतार्थे अप्रस्तुतस्य परिस्फूर्तिः प्रतीतिः स्यात्तर्हि समासोक्तिः । समासेन संक्षेपेण अर्थद्वयस्योक्तिरिति व्युत्पत्तेः । विशेषणमात्रस्यानेकार्थत्वात्संक्षेपः । विशेष्यस्यापि तथात्वे तु श्लेष एव । उदाहरणम् । अयं पुरोवर्ती चन्द्रमाः कामुकश्च रक्तो लोहित आसक्तश्च सन् ऐन्द्री इन्द्रस्येयमैन्द्री प्राची परवनिता च तस्याः मुखं पुरोभागं वदनं च चुम्बति स्पृशति मुखेनास्वादयति त्वं पश्य । अत्र रक्तादिपदश्लेषबलेन अप्रस्तुतयोः कामुकपरवनितयोः परिस्फूर्तिरिति लक्षणानुगमः । विस्तरः कुवलयानन्दे द्रष्टव्यः ॥ ५९ ॥

परिकरालंकारः ।

अलंकारः परिकरः साभिप्राये विशेषणे ।
सुधांशुकलितोत्तंसस्तापं हरतु वः शिवः ॥ ६० ॥

अलंकार इति ॥ विशेषणे साभिप्राये साकूते व्यङ्ग्यार्थसहिते सतीत्यर्थः । परिकरो नामालंकारः । अलंकारशब्दस्य सर्वत्र प्रतीयमानत्वेऽपि ध्वनित्वनिषेधार्थमुपादानम् । परिकरोति प्रकृतार्थमुपस्करोतीति परिकरः साभिप्रायशब्दः सोऽस्मिन्नस्तीति परिकरः । मत्वर्थीयोऽच् प्रत्ययः । भूषणार्थाभावात् सुडागमः । उदाहरणम् । सुधांशुकलितोत्तंसः सुधाकरनिबद्धावतंसः शिवो वस्तापं हरतु । अत्र विशेषणेन शिवस्य तापहरणसमर्थत्वं गम्यते । अत्र विशेषणस्य व्यङ्ग्यार्थगर्भत्वेन प्रकृतोपयोगित्वेन चारुत्वसिद्धिः तु वाच्यार्थस्यैव हेतुत्वमिति तस्मादस्य भेदः । तत्रापि व्यङ्ग्यार्थस्तूभयोः समान इति निर्णीतं कुवलयानन्दे ॥ ६० ॥

परिकराङ्कुरालंकारः ।

साभिप्राये विशेष्ये तु भवेत्परिकराङ्कुरः ।
चतुर्णां पुरुषार्थानां दाता देवश्चतुर्भुजः ॥ ६१ ॥

१ सुधांशुना कलित [illegible]
[illegible]
'तव प्रसादात्कुसुमायुधोऽपि सहायमेकं मधुमेव लब्ध्वा ।
कुर्यां हरस्यापि पिनाकपाणेर्धैर्यच्युतिं के मम धन्विनोऽन्ये ॥'
२ 'फणीन्द्रस्ते गुणान्वक्तुं लिखितुं हैहयाधिपः ।
मरुमात्रस्पन्दस्ते दातुं नाहमेव च ते गुणाः ॥'
यथेन्द्र [illegible]

साभिप्राय इति ॥ विशेष्ये वर्णनीयेऽपि साभिप्राये सति तु परिकराङ्कुरः । परिकरस्य अङ्कुर इति व्युत्पत्तेः । यथा वृक्षस्य अङ्कुरो वृक्षात्मकत्वाभावेऽपि परिकरसमानलिङ्गः । विशेष्यसाभि-प्रायेण विभावनाभावादङ्कुरत्वम् । उदाहरणम् । चतुर्भुजो देवः विष्णुः चतुर्णां पुरुषार्थानां धर्मार्थकाममोक्षाणां दाता भवति । एकैकहस्तेनैकै-कस्य दाने विलम्बो न स्यादिति भावो दातृत्वं गम्यते । अत्र चतु-र्भुजशब्दस्य 'वैकुण्ठो जलशायनश्चतुर्भुजः' इति हलायुधे । 'चक्र-पाणिश्चतुर्भुजः' इत्यमरकोशे च विष्णुनामस्वदर्शनात् । देवशब्दार्थं प्रति विशेषणत्वेऽपि न दोषः । अत्र विशेष्यशब्देन नाम एव वि-वक्षितत्वात् । देवशब्दार्थं विनापि प्रयोगयोग्यत्वात् । यथाह वामनः । 'विशेषणमात्रप्रयोगो विशेष्यप्रतिपत्तौ सागराम्बरादिवत्' इति । असाधारणविशेषणस्य विशेष्यनामधेयत्वादिति तदभिप्रायः ॥ ६१ ॥

श्लेषालंकारः ।

नानार्थसंश्रयः श्लेषो वर्ण्यावर्ण्योभयास्पदः ।
सर्वदोमाधवः पायात्स योगंगामदीधरत् ॥ ६२ ॥

नानार्थेति ॥ वर्ण्यावर्ण्योभयास्पदः प्रकृताप्रकृतोभयविषयः नानार्थसंश्रयः नानाविधस्यार्थस्याश्रयणं श्लेषः श्लिष्यतोऽर्थावस्मिन्निति व्युत्पत्तेः । क्रमेणोदाहरणानि । सर्वदः स माधवः विष्णुः मायाः रमाया धवः पतिः मधोर्गोत्रापत्यमिति वा व्युत्पत्तेः । पायात् रक्षतु । यो विष्णुः अगं मन्दरपर्वतं कूर्मावतारेण, गोवर्धनं वा कृष्णावतारेण, गां भूमिं वराहावतारेण, अदीधरत् दधारेति हरिपक्षे । सर्वदा नित्यं स उमाधवः पार्वतीपतिः पायात् । यः गङ्गां नाकनदीं जटायामदीधर-दिति हरपक्षे । अयं प्रकृतश्लेषः हरिहरयोरुपास्यत्वेन प्रकृत-त्वात् ॥ ६२ ॥

---

१ 'त्रातः काकोदरो येन द्रोग्धापि करुणात्मना ।
पूतनामा रणख्यातः स मेऽस्तु शरणं प्रभुः ॥'

त्रात इति । येन करुणायुक्तान्तःकरणेन द्रोहकर्तापि अदरो भयशून्यः काकजातो रक्षितः न तु हतः । स पवित्रनामा रणे लब्धवर्णः ख्यातो विभुः रामो मे शरण-मस्त्वित्यर्थः । कृष्णपक्षे तु काकोदरः कालियसर्पः, पूतनाया मारणेन ख्यात इति विशेषः । अत्र स्तोतव्यत्वेन प्रकृतयोः श्लेषः ।

अब्जेन त्वन्मुखं तुल्यं हरिणाहितसक्तिना ।
उद्यद्भूरिकीलालः शुशुभे वाहिनीपतिः ॥ ६२ ॥

अब्जेनेति ॥ त्वन्मुखं हरिणा हितसक्तिना मृगोत्पादितसंगेन अब्जेन चन्द्रेण । 'अब्जो जैवातृकः सोमः' इति हैमः । तुल्यं सदृशं वर्तते । अथवा हरिणा सूर्येण आहितशक्तिना उत्पादितसामर्थ्येन । 'हरिर्वातार्कचन्द्रेन्द्रयमोपेन्द्रमरीचिषु' इति विश्वः । अब्जेन जलजेन तुल्यं इत्यप्रकृतश्लेषः । मुखस्य वर्ण्यत्वेन अब्जयोरप्रकृतत्वात् श्लेषालंकारे सकारशकारयोरभेदोपचारः प्रसिद्ध एव । उद्यद्भूरिकीलालः प्रभवद्बहुरुधिरो वाहिनीपतिः भीष्मः शुशुभे इति

---

१ 'नीतानामाकुलीभावं लुब्धैर्भूरिशिलीमुखैः ।
सदृशे वनवृद्धानां कमलानां त्वदीक्षणे ॥'

नीतानामिति । दयितां प्रति नायकोक्तिः । तव ईक्षणे नेत्रे कमलानां पद्मानां हरिणानां च सदृशे इत्यन्वयः । कीदृशानाम् । वने जले अरण्ये च वृद्धिं प्राप्तानां तथा लुब्धैर्लोलुपैर्भूरिभिः शिलीमुखैर्भ्रमरैराकुलीभावं व्यसनं नीतानामिति पद्मपक्षे । हरिणपक्षे तु लुब्धैर्व्याधैः कर्तृभिर्भूरिशिलीमुखैर्बाणैः करणभूतैराकुलीभावं व्यसनं नीतानामित्यर्थः । 'मृगभेदे कमले' इति विश्वः । अत्रोपमानत्वेनाप्रकृतयोः पद्महरिणयोः श्लेषः ।

'अस्तादुदयमारूढः कान्तिमान् रक्तमण्डलः ।
राजा हरति लोकस्य हृदयं मृदुभिः करैः ॥'

[illegible] । उदयं शैलमभिवृद्धिं च रक्तं रक्तवर्णमनुरक्तं च मण्डलं बिम्बं देशश्च । राजा चन्द्रो नृपश्च । मृदुभिरतिक्लेशरहितैः करैः किरणैः [illegible] हृदयं । अत्र राजा इति लोकार्थेन वर्णनप्रकृतस्य प्रदोषेऽभिवन्द्यस्य [illegible] नृपस्य प्रकृतयोः श्लेषः । प्रदोषेऽभिवन्द्यस्य अभिनवोदितचन्द्रस्येत्यर्थः ।

२ 'आबद्धकृत्रिमजटाजटिलांसभित्ति-
रारोपितो मृगपतेः पदवीं यदि श्वा ।
मत्तेभकुम्भतटपाटनलम्पटस्य
नादं करिष्यति कथं हरिणाधिपस्य ॥'

आबद्धा या कृत्रिमा जटा [illegible] जटिला अंसभित्तिः स्कन्धदेशो यस्य सः । श्वा यदि मृगपतेः सिंहस्य पदवीमारोपितोऽपि स्यात् तदपि मत्तानामिभानां गजानां कुम्भतटस्य पाटने विदारणे लम्पटस्य आसक्तस्य हरिणाधिपस्य नादं सिंहनादं कथं करिष्यतीत्यर्थः । अत्र [illegible] प्रस्तुते तन्मात्रे कृत्रिमवेषमात्रधारिणि [illegible]

प्रकृतार्थः । उपरज्यद्रविकीलालः प्रसरद्बुद्बुदोदकः । 'कीलालं रुधिराम्भ-सोः' इति शाश्वतः । वाहिनीपतिः नदीपतिः । 'नदी सेना च वा-हिनी' इति यादवः । शुशुभे इत्यप्रकृतार्थः । अत्र समुद्रः शब्दश्लेष अप्रकृतस्यार्थश्लेष इति केचित् । अत्र विशेषो मत्कृते कोविदानन्दे द्रष्टव्यः ॥ ६३ ॥

अप्रस्तुतप्रशंसालंकारः ।

अप्रस्तुतप्रशंसा स्यात्सा यत्र प्रस्तुताश्रया ।
एकः कृती शकुन्तेषु योऽन्यं शक्रान्न याचते ॥ ६४ ॥

अप्रस्तुतेति ॥ अप्रस्तुतप्रशंसानामालंकारः स्यात् । यत्र सा अप्रस्तुतार्थस्य प्रशंसावर्णना प्रस्तुताश्रया प्रस्तुतमाश्रयतीति प्रस्तुताश्रया प्रकृतार्थपरा भवति । उदाहरणम् । शकुन्तेषु पक्षिषु । 'शकुन्तिपक्षिशकुनिशकुन्तशकुनद्विजाः' इत्यमरः । एकः चातक एव कृती कृतमनेनेति कृती कृतार्थः । 'इष्टादिभ्यश्च' इतीनिप्रत्ययः । यः शक्रादन्यं । 'अन्याराम्–' इत्यादिना अन्यशब्दयोगे पञ्चमी । न याचते किंतु शक्रमेव याचते । अत्र याचकेष्वेक एव मनस्वी धन्यः यः सार्वभौमादन्यं न याचत इति तुल्ये प्रकृतार्थे पर्यवसानम् ॥ ६४ ॥

कार्ये निमित्ते सामान्ये विशेषे प्रस्तुते सति ।
तदन्यस्य वचस्तुल्ये तुल्यस्येति च पञ्चधा ॥ ६५ ॥

---

१ सामान्यनिबन्धना यथा—

'विधाय वैरं सामर्षे नरोऽरौ य उदासते ।
प्रक्षिप्योदर्चिषं कक्षे शेरते तेऽभिमारुतम् ॥'

विधायेति । ये नरो मनुष्याः सक्रोधेऽरौ शत्रौ वैरं विधायोदासीना भवन्ति ते कक्षे तृण उदर्चिषमग्निं निक्षिप्याभिमारुतं पवनाभिमुखं शेरते । निद्रां कुर्वन्तीत्यर्थः । अत्र माघेन सामर्षे शिशुपाले रुक्मिणीहरणादिना वैरं दृढीकृतवता कृष्णेन तस्मिन्नुदासितुमयुक्तमिति विशेष्ये वक्तव्येऽर्थे प्रस्तुते तत्प्रत्यायनार्थं सामान्यमभिहितम् ।

विशेषनिबन्धनो यथा—

'अङ्काधिरोपितमृगश्चन्द्रमा मृगलाञ्छनः ।
केसरी निष्ठुरक्षिप्तमृगयूथो मृगाधिपः ॥'

अङ्केति । मृगलाञ्छन इत्युच्यत इति शेषः । निष्ठुरं क्षिप्तानि मृगयूथानि येन

कार्ये इति ॥ कार्ये प्रस्तुते सति तदन्यस्य कारणस्य च क-
थननिमित्ते कारणे प्रस्तुते सति तदन्यस्य कार्यस्य । एवं सामान्ये
विशेषस्य, विशेषे च सामान्यस्य, तुल्ये च तुल्यस्येत्यसौ पञ्चधा
भवति । तत्र तुल्योदाहरणं दर्शितम् । अस्य श्लोकस्य प्रक्षिप्तत्वाद-
न्यान्युदाहरणानि न सन्ति । ततो नूतनानि कृत्वा बालबोधाय
प्रदर्श्यन्ते—'संसारानलतप्तोऽयं हरिं शरणमिच्छति । हरेर्भक्ता हि
यद्यो मुक्ताः संसारबन्धनात् ॥ १ ॥' अत्र पूर्वार्धे संसारानलतप्तस्य
तापशान्तिलक्षणमुक्तिरूपकार्ये प्रस्तुते हरिशरणरूपकारणमभिहितं
ततः कार्यावगतिः । अत्र उत्तरार्धे च मुमुक्षुभिर्हरिर्भक्तिः सर्वथा
कर्तव्येति कारणे प्रस्तुते सति भक्तजनमुक्तिरूपकार्यमभिहितं ततः
कारणावगतिः ॥ १ ॥ 'अजामिलो दुराचारः स्मृतिमात्रादमुच्यत ।
धन्यो नारायणं जल्पस्नानादपि मुक्तिभाक् ॥ २ ॥' अत्र पूर्वार्धे
नवविधभक्तिसामान्यमाहात्म्ये प्रस्तुते स्मृतिरूपविशेषमाहात्म्यम-

---

नाऽतः वैमरी गिरो गुणाधिप स्तुयन इति शेषः । अत्र तु [illegible]
वाक्ये मार्दव रूपपरं पूर्वप्रस्तावनानुसारेण दूर एव [illegible]
गतुरिति सामान्ये वक्तव्ये नम्रत्वापनार्थमप्रस्तुतो विशेषोऽभिहितः ।

कार्यनिबन्धना यथा—

'नाथ त्वदङ्घ्रिनखधावनतोयलग्न-
लाक्षाग्निलक्षकणिका जलधिं प्रविष्टा ।
ता एव तस्य दहनेन घनीभवन्त्यो
नूनं समुद्रनवनीतपदं प्रपन्ना ॥'

नाथेति । हे नाथ विष्णो, [illegible]
[illegible]
[illegible] । अत्र [illegible]
[illegible]
[illegible]
प्रतीयते ।

कारणनिबन्धना यथा—

हृतसारमिवेन्दुमण्डलं दमयन्तीवदनाय वेधसा ।
कृतमध्यबिलं विलोक्यते धृतगम्भीरखनीखनीलि[illegible]

अत्रापि [illegible] इन्दुमण्डलस्य [illegible] दमयन्तीवदनस्य [illegible]
हृतेन सारभूतया [illegible]
विशेषः प्रतीयते ।

मिहितं ततः सामान्यावगतिः । उत्तरार्धे च अजामिलो धन्य इति विशेषे फल्ये मुक्तिभाक् धन्य इति सामान्यमभिहितं ततो विशेषावगतिः ॥ २ ॥ 'हंसो धन्यो नदीरन्यास्त्यक्त्वा गङ्गां य आश्रितः । प्रभिन्नकारिकाः प्रोक्ताः पञ्च भेदाः प्रदर्शिताः ॥ ३ ॥' अत्र मत्स्यो धन्यः यः क्षुद्रफलदा इतरदेवतोपासनास्त्यक्त्वा मुक्तिफलदां हरिभक्तिमेवाश्रित इति तुल्ये प्रस्तुते तत्तुल्यो वाक्यार्थोऽभिहितस्ततः प्रस्तुतावगतिः ॥ ३ ॥ ॥ ६५ ॥

प्रस्तुताङ्कुरालंकारः ।

प्रस्तुतेन प्रस्तुतस्य द्योतने प्रस्तुताङ्कुरः ।
किं भृङ्ग सत्यां मालत्यां केतक्या कण्टकेद्धया ॥ ६६॥

प्रस्तुतेनेति ॥ प्रस्तुतेन वाक्यार्थेन प्रस्तुतस्य वाक्यार्थस्य द्योतने कृते सति प्रस्तुताङ्कुरः । व्युत्पत्तिः स्पष्टा । उदाहरणम् । हे भृङ्ग, मालत्यां सत्याम् । 'सुमना मालती जातिः' इत्यमरः । मालती भिन्नेति केचित् । 'कण्टकेद्धया केतक्या किं प्रयोजनं स्यात् । अत्र वाटिकायां कामुके शृण्वति सति भृङ्गं प्रतीयमुक्तिरित्युभयोः प्रस्तुतत्वाल्लक्षणानुगमः ॥ ६६ ॥

पर्यायोक्तं तु गम्यस्य वचो भङ्ग्यन्तराश्रयम् ।
नमस्तस्मै कृतौ येन मुधा राहुवधूकुचौ ॥ ६७ ॥

पर्यायेति ॥ गम्यस्य व्यङ्ग्यस्य भङ्ग्यन्तराश्रयं भङ्ग्यन्तरं प्रकारान्तरमाश्रयतीति तथाभूतं वचस्तु पर्यायोक्तम् । व्युत्पत्तिः स्पष्टा । पर्यायशब्द प्रकारान्तरवाची साहचर्यात् । उदाहरणम् । तस्मै नम अस्तु । येन राहुवधूकुचौ मुधा कृतौ मिथ्या कृतौ । राहुशरीरनाशनेन भोगरहितौ कृताविति अर्थः । एतेन कृष्णाय नमस्कारो गम्यते । राहुशिरश्छेत्ता हि स एवेति लक्षणानुगमः ॥६७॥

---

१ 'अन्यासु तावदुपमर्दसहासु भृङ्ग
लोलं विनोदय मनः सुमनोलतासु ।
बालामजातरजस कलिकामकाले
व्यर्थं कदर्थयसि किं नवमल्लिकायाः ॥'

२ 'लोकं पश्यति यस्याङ्घ्रिः स यस्याङ्घ्रिं न पश्यति ।
ताभ्यामप्यपरिच्छेद्या विद्या विश्वगुरोस्तव ॥'
अत्र गौतमः पतञ्जलिश्च साधाधारणरूपाभ्यां गम्यौ रूपान्तराभ्यामभिहितौ ।

पर्यायोक्तालंकारः ।

पर्यायोक्तं तदप्याहुर्यद्व्याजेनेष्टसाधनम् ।
यामि चूतलतां द्रष्टुं युवाभ्यामास्यतामिह ॥ ६८ ॥

पर्यायेति ॥ व्याजेन कपटेन परस्य स्वस्य वा यदिष्टसाधनं तदपि पर्यायोक्तमाहुः । तत्रापि प्रकारान्तरकल्पनामरत्वात् । उदाहरणम् । अहं चूतलतां द्रष्टुं पुष्पिता न वेति निश्चेतुं यामि । युवाभ्यां स्त्रीपुंसाभ्यामिह आस्यतां स्थीयताम् । रहःसंपादनाय दूत्याः कपटोक्तिरियमिति लक्षणानुगमः ॥ ६८ ॥

उक्तिर्व्याजस्तुतिर्निन्दास्तुतिभ्यां स्तुतिनिन्दयोः ।
कः स्वर्धुनि विवेकस्ते नयसे पापिनो दिवम् ॥ ६९ ॥

उक्तिरिति ॥ निन्दास्तुतिभ्यां नियताभ्यां स्तुतिनिन्दयोर्गम्यमानयोरुक्तिर्व्याजस्तुतिः । व्युत्पत्तिः स्पष्टा । उदाहरणम् । हे स्वर्धुनि गङ्गे । 'वाहिनी तटिनी धुनी' इति शाश्वतः । ते तव को विवेकः । यत् पापिनो दिवं नयसे । अत्र गङ्गाया निन्दाव्याजेन स्तुतिर्गम्यते ॥ ६९ ॥

---

१ रमणीयेन व्याजेन किंचिन्नाम्ना परस्य वा इष्टस्य यत्साधनं संपादनं तदपि पर्यायोक्तम् ।

२ अत्र नायिका नायकेन उपगम्य चूतलतादर्शनव्याजेन तिरस्कृता सती तत्संगमस्पर्शसंपादनप्रयोजनव्याजेन पर्यायोक्तम् ।

'देहि मत्कन्दुकं राधे परिधाननिगूहितम् ।
इति विस्रंसयन्नीवीं तस्याः कृष्णो मुदेऽस्तु वः ॥'

पूर्वत्र परेष्टसाधनमत्र कन्दुकशोधनार्थं नीवीविस्रंसनव्याजेनेष्टसाधनमिति भेदः । परिधाननिगूहितं परिधानेनाधरवस्त्रेण निगूहितमाच्छादितमित्यर्थः ।

३ निन्दया स्तुतेः स्तुत्या निन्दाया वा अवगमनं व्याजस्तुतिः ।

४ 'कस्ते शौर्यमदो योद्धुं त्वय्येकः सप्तिमास्थिते ।
सप्तसप्तिसमारूढा भवन्ति परिपन्थिनः ॥'

'अर्धं दानववैरिणा गिरिजयाप्यर्धं शिवस्याहृतं
देवेत्थं जगतीतले स्मरहराभावे समुन्मीलति ।
गङ्गा सागरमम्बरं शशिकला नागाधिपः क्ष्मातलं
सर्वज्ञत्वमधीश्वरत्वमगमत्त्वां मां तु भिक्षाटनम् ॥'

अत्राद्योदाहरणे राजगतशौर्यस्तुतिर्निन्दाव्याजेन स्तुतिर्गम्यते, द्वितीयोदाहरणे सर्वज्ञः सर्वेश्वरोऽसीति राज्ञः स्तुत्या व्याजरूपया महीदेवदुष्पादि दारिद्र्यं सूच्यते ।

साधु दूति पुनः साधु कर्तव्यं किमतः परम् ।
यन्मदर्थे विलूनासि दन्तैरपि नखैरपि ॥ ७० ॥

साध्विति ॥ हे दूति, साधु कृतम् । अतः परं किं साधु कर्तव्यम् । मदर्थमागत्यापि । विलूना असि । दन्तैर्नखैश्च विलूनासि । अतिशयरूपं [illegible] । अत्र कामिनीसम्भोगचिह्नदर्शनेन [illegible] निन्दा गम्यते ॥ ७० ॥

व्याजनिन्दा ।

निन्दाया निन्दया व्यक्तिर्व्याजनिन्देति गीयते ।
विधे स निन्द्यो यस्ते प्रागेकमेवाहरच्छिरः ॥ ७१ ॥

निन्दाया इति ॥ निन्दया निन्दायाः [illegible], सूचना व्याजनिन्दा इति गीयते । उदाहरणम् । हे विधे हे ब्रह्मन्, स शिवो निन्द्यः । अत्र पर्यायोक्तेन शिवो सूच्यते । यः शिवः ते तव प्राक् पूर्वमेकमेव पञ्चमं शिरोऽहरत् । सर्वाण्यपि [illegible]कारणेन हरनिन्दया दुःखमनवरतकर्तृत्वेन ब्रह्मनिन्दा गम्यते ॥ ७१ ॥

आक्षेपालङ्कारः ।

आक्षेपः स्वयमुक्तस्य प्रतिषेधो विचारणात् ।
चन्द्र संदर्शयात्मानमथवास्ति प्रियामुखम् ॥ ७२ ॥

आक्षेप इति ॥ स्वयमुक्तस्यार्थस्य विचारणात् स्वयमेव प्रति-

१ साधु इत्युदाहरणे [illegible] निन्दया [illegible] । किन्तु [illegible] प्रकारेणाभि- निन्दागम्यते ।

२ अत्र हरनिन्दया विषमविपाक [illegible] विधेरभिव्यक्तया निन्दा व्याजनिन्दा ।

'विधिरेव विशेषगर्हणीयः करट त्वं रट कस्तवापराधः ।
सहकारतरौ चकार यस्ते सहवासं सरलेन कोकिलेन ॥'

'शिखरिणि क्व नु नाम कियच्चिरं किमभिधानमसावकरोत्तपः ।
तरुणि येन तवाधरपाटलं दशति बिम्बफलं शुकशावकः ॥'

शिखरिणीति । नायिकां प्रति नायकस्योक्तिः । हे तन्वि असौ शुकबालकः न विन्द्ये । क्व नु कस्मिञ्छिखरिणि पर्वते कियन्कालं चिरं किमभिधानं किंनामकं तपः अकरोत्, येन हेतुना तवाधरवत्पाटलं रक्तवर्णं बिम्बफलं दशतीत्यन्वयः । अत्र शुकशावकस्तुत्या नायिकाधरसौभाग्यातिशयस्तुतिर्व्यज्यते ।

...य आक्षेपः स्पष्टम् । उदाहरणम् । हे चन्द्र, आत्मानं संदर्शयाऽथवा
...मयास्ति मुखमस्त्येव । आह्लादकत्वेन मुखमेव चन्द्रकार्यकारीति चन्द्रा-
...दर आक्षेपः ॥ ७२ ॥

निषेधाभाससमाक्षेपं बुधाः केचन मन्वते ।
नाहं दूती तनोस्तापस्तस्याः कालानलोपमः ॥ ७३ ॥

निषेधेति ॥ केचन बुधाः पण्डिताः निषेधाभासं निषेधवदाभास-
...नं वचः आक्षेपं आक्षेपालंकारं मन्वते । उदाहरणम् । अहं दूती
। मिथ्यावादिनी नेत्यर्थः । तस्यास्तनोः शरीरस्य कालानलोपम-
...स्यान्ताग्निसमः । अतिदाहक इत्यर्थः । तापः कामज्वरो वर्तते ।
...समात्मा नोपेक्ष्येति भावः । नायकं प्रति दूतीवचनमिदम् । अत्र
नाहं दूतीति निषेधस्य मिथ्यावादित्वे पर्यवसानादाभासत्वम् ॥७३॥

आक्षेपान्तरम् ।

आक्षेपोऽन्यो विधौ व्यक्ते निषेधे च तिरोहिते ।
गच्छ गच्छसि चेत्कान्त तत्रैव स्याज्जनिर्मम ॥ ७४ ॥

आक्षेप इति ॥ विधौ व्यक्ते प्रकटे सति निषेधे च तिरोहिते
गूढे सति अन्यः प्रागुक्तभिन्न आक्षेपः स्यात् । विधिः कर्त-
व्योपदेशः निषेधस्तु तद्विपरीतः । उदाहरणम् । हे कान्त, गच्छसि
चेत् गच्छ । कामचारानुज्ञायां लोट् । मम जनिर्जन्म तत्रैव तस्मि-
न्नेव देशे स्यात् भवेत् । सम्भावनायां लिङ् । अन्ते या मतिः सा
गतिरिति न्यायेन त्वद्विरहाक्षमाया मम विरहजन्यमरणानन्तरं त्व-
त्समागमयोग्ये देशे जन्म भविष्यतीत्यर्थः । मज्जीवनमिच्छसि चे-
न्मा गच्छेति निषेधो गूढः ॥ ७४ ॥

विरोधाभासालंकारः ।

आभासत्वे विरोधस्य विरोधाभास इष्यते ।
विनापि तन्वि हारेण वक्षोजौ तव हारिणौ ॥ ७५ ॥

१ केचिदलक्ष्य... [illegible]
...वचो बाधितं समधान्तरं... [illegible]

२ 'न चिरं मम तापाय तव यात्रा भविष्यति ।
यदि यास्यसि यातव्यमलमाशङ्कयापि ते ॥'
अत्रापि न चिरं मम ... [illegible]

३ आभासत्वे ... [illegible] ... विरोधस्य ।

आभासत्वे इति ॥ विरोधस्य आभासत्वे सति विरोधाभासो नामालंकार इष्यते । अस्माभिरिति शेषः । अन्यैस्तु विरोध इति । उदाहरणम् । हे तन्वि, तव वक्षोजौ स्तनौ हारेण एकावल्यादिना विनापि हारिणौ हारवन्ताविति विरोधः । हरतश्चित्तमिति व्युत्पत्त्यर्थान्तरकल्पनेन तत्परिहारादाभासत्वम् । इदमुदाहरणं श्लेषमर्यादाप्रकारान्तरेणापि काव्यादर्शे दृश्यते । काव्यप्रकाशे तु जात्यादिभिर्दादशविधोऽयम् । वस्तुतस्तु श्लेषमूलश्चमत्कारकारीति स एवात्रोक्तः ॥ ७५ ॥

विभावनालंकारः ।

> विभावना विनापि स्यात्कारणं कार्यजन्म चेत् ।
> अपि लाक्षारसासिक्तं रक्तं त्वच्चरणद्वयम् ॥ ७६ ॥

विभावनेति ॥ कारणं प्रसिद्धकारणोक्तिं विनेत्यर्थः । कार्यजन्म कार्योत्पत्तिरभिधीयते चेत्तर्हि विभावनालंकारः स्यात् । विभाव्यते विचार्यते कारणमस्यामिति व्युत्पत्तेः । बाहुलकादधिकरणे युच् । उदाहरणम् । त्वच्चरणद्वयं लाक्षारसासिक्तमप्यलक्तकाच्छुरितमपि । पाठान्तरे लाक्षारसेनासमन्तात्सिक्तं न भवतीति रक्तमस्ति । स्वभावादेवेति भावः । पूर्वत्र विरोधोक्त्या चमत्कारः । इह तु कारणान्तरोक्त्या चमत्कार इति भेदः । अत्र श्लेषमूलत्वं नास्तीत्यपरो विशेष ॥ ७६ ॥

१ विभाव्यते कारणान्तरं यस्यामिति व्युत्पत्तेः । कारणाभावश्च ।

२ अत्र लाक्षारसासेकरूपकारणाभावेऽपि रक्तिमा कथित. । स्वाभाविकत्वेन विरोधपरिहार । यथा वा—

> 'अपीतक्षीबकादम्बमसंमृष्टामलाम्बरम् ।
> अप्रसादितशुद्धाम्बु जगदासीन्मनोहरम् ॥'

शरद्वर्णनमेतत् । अपीतेति । अपीताः पानरहिताः क्षीबा मत्ताः कादम्बाः कलहंसा यत्र तथा असंमृष्टं संमार्जनशून्यममलमम्बरमाकाशं यत्रैवमप्रसादितं कतकफलक्षोदप्रक्षेपादिना यत्प्रसादनं तच्छून्यं शुद्धं स्वच्छमम्बु यत्रैवंभूतं जगन्मनोहरमासीदित्यन्वयः ।

कार्योत्पत्त्यन्तरप्रकारः ।

हेतूनामसमग्रत्वे कार्योत्पत्तिश्च सा मता ।
अस्त्रैरतीक्ष्णकठिनैर्जगज्जयति मन्मथः ॥ ७७ ॥

हेतूनामिति ॥ किंच हेतूनां कारणानामसमग्रत्वे अपुष्कलत्वे सत्यपि कार्योत्पत्तिः सहृदयैरित्यर्थः । सा विभावना मता । उदाहरणम् । मन्मथः कामः अतीक्ष्णकठिनैः तीक्ष्णानि खड्गादीनि कठिनानि गदादीनि तद्भिन्नैः पुष्परूपैः कोमलैरस्त्रैः जगद्विश्वं जयत्यभिभवति । 'जि अभिभवे' इति धातोर्लट् । 'जि जये' त्वकर्मकः । अत्र अस्त्राणामेव तीक्ष्णत्वाभावात्पुष्कलत्वं तथाविधानामपि त्रिधाप्रयोगेण जगत्त्रयसाधनत्वमिति विधायकयोर्जितस्य कामस्य प्रसिद्धत्वनिरपेक्षत्वेन सामग्र्यसंपादकत्वाभिधानाच्चमत्कारः । अत्रापि विरोधोक्तौ तात्पर्यं नास्ति ॥ ७७ ॥

अन्या कार्योत्पत्तिः ।

कार्योत्पत्तिस्तृतीया स्यात्सत्यपि प्रतिबन्धके ।
नरेन्द्रानेव ते राजन्दशत्यसिभुजङ्गमः ॥ ७८ ॥

कार्येति ॥ प्रतिबन्धके बाधकारणे सत्यपि कार्योत्पत्तिः तृतीया पूर्वोक्तप्रकारद्वयापेक्षया सा ज्ञेया । कार्योत्पत्तौ प्रतिबन्धकाभावस्यापि कारणत्वं नाङ्गीकारात् । उदाहरणम् । हे राजन्, ते तव असिः खड्गः स एव भुजङ्गमः सर्पः नरेन्द्रानेव नृपान् विषवैद्यानिति श्लिष्टरूपकम् । 'नरेन्द्रो वार्तिके राज्ञि विषवैद्येऽपि वाच्यवत्' इति विश्व [illegible] दशति [illegible] इत्यर्थः । अत्र विषवैद्यत्वं दंशनक्रियायाः प्रति[illegible] [illegible] चमत्कारः ॥ ७८ ॥

[illegible]

१ अत्र [illegible]

२ [illegible]

'[illegible] लोचने ॥'

उद्दमयन्ति [illegible] । अत्र बाष्पोद्गमनो[illegible]

[illegible]

[illegible]

[illegible]

'नित्यं तपति राजेन्द्र प्रतापतपनस्तव ।
अनातपत्रमुत्सृज्य सातपत्रं द्विषद्गणम् ॥'

चित्रमिति । प्रतापरूप तपनः सूर्यः । 'तपनः सविता रविः' इत्यमर[illegible] [illegible] मूर्ध्नि सातपत्रम् ।

अकारणात्कार्यजन्म चतुर्थी स्याद्विभावना ।
शङ्खाद्वीणानिनादोऽयमुदेति महदद्भुतम् ॥ ७९ ॥

अकारणादिति ॥ अकारणात् कारणत्वेनाप्रसिद्धात् वस्तुनः कार्यजन्म चतुर्थी प्रागुक्तभिन्नप्रकारा विभावना स्यात् । उदाहरणम् । शङ्खात् शङ्खत्वेनाध्यवसितात्कामिनीकण्ठादिति रूपकातिशयोक्तिः । अयं वीणानिनादः मधुरालाप एव । वीणानिनाद इत्यत्रापि रूपकातिशयोक्तिः । उदेतीति महदद्भुतमस्ति । घोरध्वनिकारणस्य शङ्खस्य मधुरालापकारणत्वमित्याश्चर्यम् । तत्रापि परकीयकार्यकारित्वमिति महत्त्वं वीणाशङ्खयोः शब्दकारणत्वेन सादृश्यं नञर्थः । यथाहुः शाब्दिकाः 'तत्सादृश्यं तदन्यत्वं तदल्पत्वं विरोधिता । अप्राशस्त्यमभावश्च नञर्थाः षट् प्रकीर्तिताः ॥' इति ॥ ७९ ॥

विभावनाभेदः ।

विरुद्धात्कार्यसंपत्तिर्दृष्टा काचिद्विभावना ।
शीतांशुकिरणास्तन्वीं हंत संतापयन्ति ताम् ॥ ८० ॥

विरुद्धादिति ॥ विरुद्धात् प्रसिद्धकारणविरुद्धादित्यर्थः । कार्यसंपत्तिः कार्योत्पत्तिः काचिद्विभावना दृष्टा । उदाहरणम् । हन्तेति खेदे । शीतांशुकिरणाः उष्णांशुविरुद्धा इति गम्यते । तां प्रोषितभर्तृकां तन्वीं कामिनीं संतापयन्ति । अत्र केषुचिच्छ्लोकेषु पादपूरणार्थं प्रयुक्तान्यधिकान्यपि पदानि सन्ति । न तत्र दोषः शङ्क्यः प्रकृतसङ्गतत्वात् । एवं चैवाहीत्यादीनामसङ्गतानामेवाधिकत्वं दोष-

१ 'उदिते कुमारसूर्ये कुवलयमुल्लसति भाति नक्षत्रम् ।
मुकुलीभवन्ति चित्रं परराजकुमारपाणिपद्मानि ॥'

उदित इति । कस्यचिद्राजकुमारस्य प्रशंसावर्णनम् । कुमारसूर्ये सूर्ये उदिते सति कोः पृथिव्याः वलयं मण्डलमेव कुवलयं कुमुदमुल्लासं प्राप्नोति । अत्र क्षत्रियकुलं न भाति, अथ च नक्षत्रं भातीति चित्रम् । तथा परेषां राजकुमाराणां पाणिकमलानि मुकुलीभवन्ति संकुचन्ति । अञ्जलिबन्धयुक्तानि भवन्तीत्यर्थः ।

'तिलपुष्पात्समायाति वायुश्चन्दनसौरभः ।
इन्दीवरयुगाच्चित्रं निःसरन्ति शिलीमुखाः ॥'

२ 'अविवेकि कुचद्वन्द्वं हन्तु नाम जगत्त्रयम् ।
श्रुतिप्रणयिनोरक्ष्णोरयुक्तं जनमारणम् ॥'

पूर्वोदाहरणयोः कारणस्य कार्यविरोधित्वं स्वाभाविकम् । इह तु श्रुतिप्रणयित्वरूपागन्तुकगुणप्रयुक्तमिति भेदः ।

[illegible]धिकारात् । एवं च विक्लृप्तपदत्वमपि न दोषः । आकाङ्क्षितपदाध्या-
[illegible]स्य सकलसाम्यसंभवत्वात्झटिप्रतीताध्याहारे तु दोषः ॥ ८० ॥

विभावनालंकारः ।

कार्यात्कारणजन्मापि दृष्टा काचिद्विभावना ।
यशःपयोराशिरभूत्करकल्पतरोस्तव ॥ ८१ ॥

कार्यादिति ॥ कार्यात् कार्यत्वेन प्रसिद्धात् वस्तुनः कारण-
[illegible] कारणत्वेन प्रसिद्धस्योत्पत्तिः काचिद्वैपरीत्येन चमत्कारका-
रिणी विभावना दृष्टा । उदाहरणम् । हे नृप, तव करकल्पतरोः
[illegible] पयोराशिरभूत् । अत्र पयोराशिः कारणं कल्पतरुश्च कार्य-
मिति प्रसिद्धिः । तद्विपरीतवर्णनात् रूपकसंकीर्णा विभावना । सं-
[illegible] दोषो नास्तीत्यग्रे वक्ष्यामः ॥ ८१ ॥

विशेषोक्त्यलंकारः ।

कार्याजनिर्विशेषोक्तिः सति पुष्कलकारणे ।
हृदि स्नेहक्षयो नाभूत्स्मरदीपे ज्वलत्यपि ॥ ८२ ॥

कार्येति ॥ पुष्कलकारणे पूर्णा कला यस्येति पुष्कलमन्यूनां [illegible]
[illegible]म् । पूर्णोत्पादिन्यामापु । तथाविधे कारणे सत्यपि कार्याजनि[illegible]
कार्यानुत्पत्तिकथनं विशेषोक्तिः विशेषस्य नवीनप्रकारस्योक्तिरिति [illegible]
[illegible] । उदाहरणम् । स्मरदीपे अनङ्गदीपके हृदि हृदये । 'प्र[illegible]
[illegible] हृदयस्य इत्यादि । यद्वा हृदि मनसि । 'स्वान्तं हृन्मा[illegible]
[illegible] [illegible] । [illegible] दीप्यमाने सत्यपि स्नेहस्य स्नेह प्री[illegible]
[illegible] [illegible] । 'स्नेहस्तैलादिके रसे द्रव्ये स्यात् [illegible]
[illegible] [illegible] । [illegible] जात । दीपज्वलने सत्यपि
[illegible] । [illegible] । न चात्र विशेष[illegible]
[illegible] न जात [illegible] । नापि विभावना ।
[illegible] । [illegible] ॥
[illegible]

जाता लता हि शैले जातु लतायां न जायते शैलः [illegible]
सम्प्रति तद्विपरीतं कनकलतायां गिरिद्वयं जातम् ॥'

अनुरागवती सन्ध्या दिवसस्तत्पुरःसरः ।
अहो दैवगतिश्चित्रा तथापि न समागमः ॥'

[illegible] । [illegible] [illegible] निमित्तस्योक्त[illegible]
पूर्वोदाहरणेऽनु । [illegible]
[illegible] ।

असंभवालंकारः ।

अर्थनिष्पत्तेरसंभाव्यत्ववर्णनम् ।
को वेद गोपशिशुकः शैलमुत्पाटयिष्यति ॥ ८३ ॥

असंभव इति ॥ अर्थनिष्पत्तेः प्रकृतार्थसिद्धेः असंभाव्यत्वस्य आश्चर्यत्वस्य वर्णनमसंभवः । उदाहरणम् । गोपशिशुकः नन्दकुमारः । स्वार्थे कः अल्पार्थे वा । शैलं गोवर्धनं उत्पाटयिष्यतीति को वेद आश्चर्यमेतदित्यर्थः । गोपग्रहणं तयोरत्यन्तासंभाव्यसूचनार्थम् ॥ ८३ ॥

असंगत्यलंकारः ।

विरुद्धं भिन्नदेशत्वं कार्यहेत्वोरसंगतिः ।
विषं जलधरैः पीतं मूर्च्छिताः पथिकाङ्गनाः ॥ ८४ ॥

विरुद्धमिति ॥ कार्यहेत्वोः कार्यकारणयोः । 'लक्षणहेत्वोः' इति ज्ञापकात् हेतुशब्दस्य परनिपातः । विरुद्धमप्रसिद्धं भिन्नदेशत्वं भिन्नौ देशौ ययोस्तौ भिन्नदेशौ तयोर्भावो भिन्नदेशत्वं भिन्नदेशावस्थानवर्णनमित्यर्थः । असंगतिः । उदाहरणम् । यद्वा जलधरैर्मेघैर्विषं उदकं गरलं चेति श्लिष्टरूपकम् । 'विषं तु गरले जले' इति शाश्वतः । पीतमात्मनि निहितं सदा पथिकाङ्गनाः पान्थस्त्रियो मूर्च्छिताः मोहं प्राप्ताः । 'मूर्च्छा मोहसमुच्छ्राययोः' इति धातोः कर्तरि क्तः । अत्र विरुद्धमित्युक्तेर्गृहस्थः क्षेत्रधान्यमुत्पादयतीत्यत्र नासंगतिः ॥ ८४ ॥

---

१ 'अयं धारामेको निलय इति रत्नाकर इति
श्रितोऽस्माभिस्तृष्णातरलितमनोभिर्जलनिधिः ।
क एवं जानीते निजकरपुटीकोटरगतं
क्षणादेनं ताम्यत्तिमिमकरमापास्यति मुनिः ॥'

२ ययोः कार्यहेत्वोर्भिन्नदेशत्वं विरुद्धं तयोर्भिन्नदेशत्ववर्णनमसंगत्यलङ्कारः । यथात्र विषपानमूर्च्छयोर्भिन्नदेशत्वम् ।

'अहो खलभुजङ्गस्य विपरीतो वधक्रमः ।
अन्यस्य दशति श्रोत्रमन्यः प्राणैर्वियुज्यते ॥'
'उपकारिमुखेन्दुभ्यमन्यदेव वचोऽमृतम् ।
क्वचित्स्रवति कस्यापि जायते जीवितोदयः ॥'

अन्यत्र करणीयस्य ततोऽन्यत्र कृतिश्च सा ।
अन्यत्कर्तुं प्रवृत्तस्य तद्विरुद्धकृतिस्तथा ॥ ८५ ॥

अन्यत्रेति ॥ अन्यत्र करणीयस्यार्थस्य ततोऽन्यत्र तस्मादन्यस्थले कृतिः करणं साऽसंगतिः । अन्यत् क्रियमाणभिन्नं वस्तु कर्तुं प्रवृत्तस्य तद्विरुद्धकृतिः तस्माद्विरुद्धार्थस्य करणं च तथा असंगतिरित्यपरो भेदः । अत्रैकस्मिन् श्लोके प्रक्रमभङ्गमनादृत्य भेदद्वयं लक्षितं उत्तरश्लोके च तदुदाहृतं परंतु प्रथमभेदोदाहरणानन्तरं द्वितीयभेदस्य लक्षणोदाहरणे क्रमेण वक्तुं युक्तं अविलम्बेनार्थबोधे चमत्काराधिक्यात् ॥ ८५ ॥

अपारिजातां वसुधां चिकीर्षन्द्यां तथाऽकृथाः ।
गोत्रोद्धारप्रवृत्तो हि गोत्रोद्भेदं पुराकरोः ॥ ८६ ॥

अपारिजातामिति ॥ हे भगवन्, वसुधां अपारिजातां अपगतं अरिजातं शत्रुवृन्दं यस्यास्तादृशीं चिकीर्षन् कर्तुमिच्छन् द्यां दिवम् । 'सुरलोको द्योदिवौ द्वे स्त्रियाम्' इत्यमरः । तथा अपारिजा-

१ अत्र कृष्णं प्रति सत्यस्य लोपालम्भवचने भुवि चिकीर्षितस्य तत्र करणीयस्य अपारिजातस्य दिवि कृतमित्येकासंगतिः । पुरा गोत्राया उद्धारे प्रवृत्तेन वराहरूपिणा तद्विरुद्धं गोत्राणां दलनं [illegible] कृतमिति द्वितीयापि श्लेषोत्थापिता ।

२ 'त्वत्खड्गखण्डितसपत्नविलासिनीनां
भूषा भवन्त्यभिनवा भुवनैकवीर ।
नेत्रेषु कङ्कणमथोरुषु पत्रवल्ली
चोलेन्द्रसिंह तिलकं करपल्लवेषु ॥'

हे भुवनैकवीर, चोलेन्द्रसिंह [illegible] त्वत्खड्गखण्डिता ये सपत्नाः शत्रवस्तद्विलासिनीनामभिनवा अपूर्वा भूषा भूषणानि भवन्ति । यथा नेत्रेषु क[illegible] [illegible] कङ्कणमेव वलयं [illegible] । अर्थात् अश्रुधारा । ऊरुषु च पत्रवल्ली [illegible] करपल्लवेषु तिलकमिति [illegible] अलंकारभूषणमिति श्लोका[illegible] यथा [illegible]

'मोह जगत्त्रयभुवामपनेतुमेत-
दादाय रूपमखिलेश्वर देहभाजाम् ।
निःसीमकान्तिरससीरधिनामुनैव
मोह प्रवर्धयसि मुग्धविलासिनीनाम् ॥'

मोहमिति । हे अखिलेश्वर, जगत्त्रयवर्तिनां देहधारिणां मोहमपनेतुं [illegible] कृष्णाधरिमादाय मर्यादातिक्रान्तकान्तिरससमुद्रेणामुनैव रूपेण सुन्द[illegible] मोहं प्रवर्धयसीत्यन्वयः ।

नामकृष्णः फलवान् । पारिजातहरणेन नाभि पारिजातो यस्यां सा तथोक्तामिति श्लिष्टरूपकं द्वितीयम् । उदाहरणम् । गोत्रोद्धारप्रवृत्त गोत्रायाः पृथिव्याः उद्धारे मनुष्यादुद्धृत्य स्थापने वराहरूपेण प्रवृत्तस्त्वं गोत्रोद्भेदं पर्वतोद्भेदं भिनत्सि च श्लिष्टरूपम् । पुरा पूर्वमकरो । यद्वा कृष्णावतारे गोत्रोद्धारप्रवृत्तः गुरो भारहरणेन स्थापने प्रवृत्तोऽपि गोत्रोद्भेदं गोवर्धनोद्भेदमिति । अथवा गोत्रस्य यदुकुलस्य उद्धारे विप्रशापनिवर्तनेन संकटादुद्धरणे प्रवृत्तस्त्वं गोत्रोद्भेदं कुलोच्छेदमिति विरुद्धकृतिः ॥ ८६ ॥

विषमालंकारः ।

विषमं वर्ण्यते यत्र घटनाऽननुरूपयोः ।
क्वेयं शिरीषमृद्वङ्गी क्व तादृङ्मदनज्वरः ॥ ८७ ॥

विषममिति ॥ यत्र द्वयोरर्थयोरननुरूपयोः मनोरसंघटनत्वेन विवक्षितयोरित्यर्थः । घटना अनुरूपत्वनिषेधरूपा वर्ण्यते वैलक्षण्यवाचकशब्दप्रयोगेण स्फुटीक्रियते । तत्र विषमं समाद्विपरीतं विषममिति व्युत्पत्तेः । उदाहरणम् । शिरीषमृद्वङ्गी शिरीषकुसुमकोमलशरीरेयं क्व । स इव दृश्यते इति तादृक् अनिर्वचनीय । यद्वा स इवेति तादृक् 'तादृगादौ सूत्रमते कर्मकर्तरि कृत्स्वत । महाभाष्ये त्विवेत्यर्थे दृगदृशौ तद्धितौ मतौ ॥' इति वामन । मदनज्वर मदनकृतो ज्वर संतापो मदनज्वर इति मध्यमपदलोपी समास । क्व । नोभयं समत्वेन घटत इत्यर्थ । प्रायेणायं क्वशब्दद्वये सत्येव भवति ॥ ८७ ॥

विरुद्धकार्यस्योत्पत्तिरपरं विषमं मतम् ।
कीर्तिं प्रसूते धवलां श्यामा तव कृपाणिका ॥ ८८ ॥

विरुद्धेति ॥ विरुद्धकार्यस्य कारणविरोधित्वेन प्रसिद्धस्य कार्यस्य उत्पत्तिर्वर्णनमपर विषम मतम् । 'विरूपकार्यस्य' इति पाठे- . : । विरुद्धं रूपं यस्य तत् । उदाहरणम् । तव श्यामा कृ[illegible]णिका तरवारि धवलां शुभ्रां कीर्तिं प्रसूते । अत्रासितायाः कृ-

१ 'अभिलषसि यदीन्दो वक्त्रलक्ष्मीं मृगाक्ष्याः
पुनरपि सकृदब्धौ मज्ज संक्षालयाङ्गम् ।
सुविमलमथ बिम्बं पारिजातप्रसूनैः
सुरभय वद नोचेत्त्वं क्व तस्या मुखं क्व ॥'

लिकाया. सितत्वेन विरुद्धायाः कीर्तेरुत्पत्तिकरेति लक्षणानुगमः। ...भास्य कारणस्यापि विरुद्धत्वाद्विभावनायामन्तर्भावः। यत्र कार- ...मात्र प्रकृतविरुद्धत्वविवक्षा तत्र विभावना। यत्र च कार्यस्य तथा- ...त्वविवक्षा तत्र विषमम्। यत्र चोभयोस्तत्र संकर इति सिद्धान्तात्। ...वस्तुतस्तु कारणतावच्छेदकभावरूपे विरुद्धत्वे विभावनायां प्रकारभेदरूपं विरुद्धत्वं विषमालंकारे इति भेदः। एवंच विरूपकार्यस्येति पाठः साधुः। विभिन्नं भिन्नप्रकारं रूपं यस्येति विरूप तादृशं च तत्कार्यं चेति व्युत्पत्तिः ॥ ८८ ॥

विषमभेदः।

अनिष्टस्याप्यवाप्तिश्च तदिष्टार्थसमुद्यमात्।
भक्ष्याशयाहिमञ्जूषां दृष्ट्वाखुस्तेन भक्षितः ॥ ८९ ॥

इष्टार्थसमुद्यमात् इष्टार्थेति इष्टार्थः स चासौ अनिष्टस्येति ॥ ...समुद्यमस्तस्मात् अनिष्टस्याप्यवाप्तिः। अपिशब्दादिष्टानवाप्तिश्च तदि- ...मम्। उदाहरणम्। आखुर्मूषकः भक्ष्याशया मोदकादितृष्णया ...अहिमञ्जूषां सर्पपेटिकां दृष्ट्वा विलोक्य प्रविष्ट इति शेषः। 'दृष्ट्वा' इति पाठे विदार्येत्यर्थः। केचित्तु दृष्ट्वेति क्त्वाप्रत्ययान्तं वधोगे मञ्जू- ...पासाध्यन्न 'न लोक-' इत्यादिना षष्ठीप्रतिषेधः। तादृश स तेना- ...हिना भक्षितः। अत्र भक्ष्यलाभो न जातः स्वयं चाहिना भक्षितः ...र्ति इष्टानवाप्तिरनिष्टावाप्तिश्चात्र। प्रकारान्तरमपि कुवलयानन्दे ...द्रष्टव्यम् ॥ ८९ ॥

समालंकारः।

समं स्यादृर्णनं यत्र द्वयोरप्यनुरूपयोः।
स्वानुरूपं कृतं सद्म हारेण कुचमण्डलम् ॥ ९० ॥

...द्वयोरप्य... नर्मामिति ॥ ...नुरूपयोः सम्बन्धयोर्योग्ययोर्वा द्वयोर्यं...

'दि ...मरन पुत्र नमार्हीप्य दशाननः।
...यम्य पुरन्दर यशो दहनमन्वभूत ॥
...थे कलङ्कमपहानुमय मृगाङ्को
जातो मुख तव पुनस्तिलकच्छलेन।
नयापि कल्पयसि नन्वि कलङ्करेखां
नायं समाश्रितजन हि कलङ्कयति ॥'

कौमुदीव तुहिनांशुमण्डलं जाह्नवीव हिमशैलमण्ड...
...कीर्तिरनुरूपमाश्रिता त्वां विभाति नरसिंह भू...

र्णनं तत्रापि समम‍लंकारः स्यात् । सह तुल्यतया मीयते इति सम
मिति व्युत्पत्तेः । 'मांसैरपि शक्यं क्षुद्वर्णनेतुम्' इति भाष्यप्रयोग
रसामान्ये नपुंसकत्वम् । उदाहरणम् । हरिण गुच्छादिना कुच
ष्टवं स्वानुरूपं समदर्शं स्वयोग्यं वा सद्म स्थानं कृतम् । अत्रोभय
र्वतुल्यरुचिरत्वाभ्यामनुरूपत्वम् ॥ ९० ॥

सारूप्यमपि कार्यस्य कारणेन समं विदुः ।
नीचप्रवणता लक्ष्मि जलजायास्तवोचिता ॥ ९१ ॥

सारूप्यमिति ॥ कार्यस्य कारणेन सह सारूप्यं समानं स
ययोस्ते सरूपे तयोर्भावः सारूप्यं तुल्यरूपत्वमपि समं विदुः
उदाहरणम् । हे लक्ष्मि, जलजायाः सागरोद्भूतत्वाज्जलजायास्तव नी
चप्रवणता नीचं प्रदेशं अधमं च प्रकर्षेण वनति श्रयतीति नीचप्र
णा । 'वन षण संभक्तौ' इति धातोः पचाद्यच् । तस्या भावो नीच
प्रवणता उचिता योग्या । 'उच समवाये' इति धातोः कर्मणि क
॥ ९१ ॥

विनानिष्टं च तत्सिद्धिर्यमर्थं कर्तुमुद्यमः ।
युक्तो वारणलाभोऽयं शालते वारणार्थिनः ॥ ९२ ॥

विनेति ॥ यमर्थं कर्तुमुद्यमः क्रियते । अनिष्टमन्तरायं विना
तत्सिद्धिश्च समम् । उदाहरणम् । वारणार्थिनो गजार्थिनो निषेध
र्थिनश्चेति श्लिष्टरूपकम् । युक्तः उचितोऽयं वारणलाभः प्रतिबन्धप्र
निगजप्राप्तिश्चेति श्लिष्टरूपकम् । शालते शोभते । न चात्र प्रतिबन्ध
लाभस्यानिष्टत्वं शङ्क्यम् । लोकदृष्ट्या अनिष्टत्वेऽपि श्लेषभित्तिकार्थे
साध्यसमायेन तत्प्राप्तीति । यद्वा । अर्थद्वयसमाश्रित्य समालंका
प्रवृत्तौ पुनः श्लेषालंकारप्रवृत्त्या चमत्कारातिशय इति यथो नानी
ति । एवमन्यत्रापि बोध्यम् । लक्षणे 'यदर्थं कर्तुमुद्यमः' इति केच
चित्पाठः स्पष्टार्थः ॥ ९२ ॥

१ 'दवदहनादुत्पन्नो धूमो घननामुपेत्य वर्षैस्त्वम् ।
यच्छमयति तदयुक्तं सोऽपिहि दवमेव निहन्ति ॥'

२ 'उर्वी(?)मुद्दामसस्यां जनयतु विसृजन्वासवो वृष्टिमिष्टां
त्वामाश्रयेऽहं चिरादुचितोऽस्मि राजन् ।
उद्यान्त स्वमपि लभयसे तद्दृच
मामद्य नैव विफला महतां हि सेवा ॥'

विचित्रालङ्कारः ।

विचित्रं तत्प्रयत्नश्चेद्विपरीतफलेच्छया ।
नमन्ति सन्तस्त्रैलोक्यादपि लब्धुं समुन्नतिम् ॥९३॥

विचित्रमिति ॥ यदि विपरीतफलेच्छया प्रयत्नः स्यात्तर्हि विचित्रं स्पष्टम् । उदाहरणम् । सन्तः साधवः त्रैलोक्यादपि । त्रयो लोका एव त्रैलोक्यमित्यत्र चातुर्वर्ण्यादित्वात् ष्यञ् । 'पञ्चमी विभक्ते' इति पञ्चमी । समुन्नतिं उत्कर्षं उन्नतत्वं चेति श्लिष्टरूपकम् । ...ं नमन्ति प्रह्वीभवन्ति अनुन्नतस्वभावा भवन्ति चेति श्लिष्टम् । अत्र नमतिरकर्मकः वन्दनार्थस्तु सकर्मक इति प्रपञ्चितं ...बिन्दौ ॥ ९३ ॥

अधिकालङ्कारः ।

अधिकं पृथुलाधारादाधेयाधिक्यवर्णनम् ।
ब्रह्माण्डानि जले यत्र तत्र मान्ति न ते गुणाः ॥९४॥

अधिकमिति ॥ पृथुलाधारात् विशालाधिकरणात् आधेयस्य ...स्तुनः आधिक्यवर्णनमधिकत्वोक्तिरधिकम् । उदाहरणम् । यत्र जले ब्रह्माण्डानि मान्ति तत्र तस्मिन्ने तव गुणा न मान्तीति गुणानामाधिक्यवर्णनादधिकम् । अत्र गुणशब्देन तद्गणनार्थो वर्णविन्यासो लभ्यते ॥ ९४ ॥

पृथ्व्याधेयाद्यदाधाराधिक्यं तदपि तन्मतम् ।
कियद्वाग्ब्रह्म यत्रैते विश्राम्यन्ति गुणास्तव ॥ ९५

पृथ्व्विति ॥ पृथ्व्याधेयाद्विशालादाधेयात् यत् आधाराधि...

१ 'मलिनयितु खलवदन विमलयति जगन्ति देव कीर्तिस्ते ।
मित्राह्लादं कर्तुं मित्राय द्रुह्यति प्रतापोऽपि ॥'
'युगान्तकालप्रतिसंहृतात्मनो
जगन्ति यस्यां सविकाशमासत ।
तनौ ममुस्तत्र न कैटभद्विषः
स्तपोधनाभ्यागमसम्भवा मुदः ॥'
२ 'अहो विशालं भूपाल भुवनत्रितयोदरम् ।
माति मातुमशक्योऽपि यशोराशिर्यदत्र ते ॥'

तदपि तदधिकं मतम् । उदाहरणम् । यागत्रय शब्दस्य किपन् कि परिमाणमस्येति कियत् । 'किमिदंभ्यां वो घः' इति वतोर्वस्य स्य यादेशः । यत्रैते तव गुणाः विश्राम्यति गद्यपद्यात्मके हि ब्रह्मणि वर्णितानां गुणानां विश्रामो भवति । एतच्छब्देन प्रश्नवाचिना असंख्यातत्वं विवक्षितमिति लक्षणानुगतिः ॥ ९५ ॥

अल्पालंकारः ।

अल्पं तु सूक्ष्मादाधेयाद्यदाधारस्य सूक्ष्मता ।
मणिमालोर्मिका तेऽद्य जपमालायते करे ॥ ९६ ॥

अल्पमिति ॥ सूक्ष्मादाधेयात् यत् आधारस्य सूक्ष्मता वर्ण्यते तत्तु अल्पमलंकारः । तुशब्दः पूर्वालंकारवैलक्षण्यद्योतकः । उदाहरणम् । अद्य ते तव करे मणिमालोर्मिका मणिपङ्क्तिखचितमुद्रिका जपमालायते । अतिविशाला भवतीत्यर्थः । तेन अङ्गुल्याः करस्य वा सूक्ष्मता गम्यते ॥ ९६ ॥

अन्योन्यालंकारः ।

अन्योन्यं नाम यत्र स्यादुपकारः परस्परम् ।
त्रियामा शशिना भाति शशी भाति त्रियामया ॥९७॥

अन्योन्यमिति ॥ यत्र परस्परं क्रियाविशेषणमेतत् । उपकारः सत्कारः उपयोगो वा स्यात् तत्र अन्योन्यं नामालंकारः । उदाहरणम । त्रियामा रात्रि । प्रथमयामस्य धर्मशास्त्रे दिवसतुल्यत्वाभिधानात्त्रियामत्वम । अथवा द्विमुहूर्ता सायंसंध्या द्विमुहूर्ता च प्रातःसंध्या तदवशिष्टा च रात्रिरिति त्रियामत्वम् । शशिना चन्द्रेण भाति, शशी च त्रियामया भाति इत्यन्योन्यसत्कारपक्षे । उपयोगपक्षे तु 'अन्योन्यतः पथि बताविभतामिभोष्ट्रौ' इत्युदाहरणम् । अन्योन्यमास्मेपातुपमरत इत्यत्र तु नालंकारः । चमत्कारभावात् ॥९७॥

१ 'यन्मध्यदेशादपि ते सूक्ष्मं लोलाक्षि दृश्यते ।
मृणालसूत्रमपि ते नैव माति स्तनान्तरे ॥'

यदिति । हे चपलाक्षि तव मध्यभागादपि यत्सूक्ष्मं दृश्यते तन्मृणालसूत्रमपि तव स्तनयोरन्तरे मध्ये न मातीत्यन्वयः ।

२ 'विनयेर्भाति विद्येयं विनयो भाति विद्यया ।
धनेराभान्ति दानानि दानैर्भान्ति धनान्यपि ॥'

विशेषालंकारः।

विशेषः ख्यातमाधारं विनाप्याधेयवर्णनम्।
गतेऽपि सूर्ये दीपस्थास्तमश्छिन्दन्ति तत्कराः॥ ९८॥

विशेष इति॥ ख्यातं प्रसिद्धं आधारं विनापि आधेयवर्णनं विशेषः स्पष्टम्। उदाहरणम्। सूर्ये गतेऽपि अस्तमिते दीपस्थास्तत्कराः किरणाः। 'सूर्यतेजः सायमग्निं प्रविशति' इत्यागमः। तमो ध्वान्तं छिन्दन्ति नाशयन्ति। अत्र सूर्यकिरणानामाधारः सूर्य एव प्रसिद्धः। सूर्ये दूरं गतेऽपि तस्यैव करास्तमश्छिन्दन्तीत्याधारं विनाधेयकथनं विशेषः॥ ९८॥

विशेषालंकारः।

विशेषः सोऽपि यद्येकं वस्त्वनेकत्र वर्ण्यते।
अन्तर्बहिः पुरः पश्चात्सर्वदिक्ष्वपि सैव मे॥ ९९॥

विशेष इति॥ यदि एकं वस्तु अनेकत्र स्थितं वर्ण्यते तर्हि सोऽपि विशेषः। उदाहरणम्। अन्तर्मनसि बहिर्बाह्यप्रदेशे पुरः संमुखप्रदेशे पश्चात्पृष्ठप्रदेशे। किं बहुना, मे मम सर्वदिक्ष्वपि सैव प्रेयसी भासते। इत्येकस्याः कामिन्याः युगपदनेकदेशवर्तित्वकथनं विशेषः॥ ९९॥

किंचिदारम्भतोऽशक्यवस्त्वन्तरकृतिश्च सः।
त्वां पश्यता मया लब्धं कल्पद्रुमनिरीक्षणम्॥ १००॥

१ 'दिवमप्युपयातानामाकल्पमनल्पगुणा येषाम्।
रमयन्ति जगन्ति गिरः कथमिव कवयो न ते वन्द्याः॥'

दिवमिति। दिवमुपयातानामपि येषामनल्पगुणगुम्फा गिर आकल्पं कल्प... जगन्ति भुवनानि रमयन्तीत्यन्वयः।

२ 'हृदयान्नापयातोऽसि दिक्षु सर्वासु दृश्यसे।
वत्स राम गतोऽसीति संतापेनानुमीयसे॥'

३ 'स्फुरदद्भुतरूपमुत्प्रतापज्वलनं त्वां सृजतानवद्यविद्यम्।
विधिना ससृजे नवो मनोभूर्भुवि सत्यं सविता बृहस्पतिश्च॥'

स्फुरदिति। उत्कटः प्रतापरूपो ज्वलनोऽग्निर्यस्येत्यर्थः। उक्तविशेषण त्वा सृजता विधिना भुवि नवो मनोभवादिः ससृजे सत्यं इति सम्बन्धः।

किंचिदिति ॥ किंचिदारम्भतः कस्यचिदारम्भः किंचिदारम्भः मयूरव्यंसकादित्वात्समासः । ततः पञ्चम्यास्तसिल् । अशक्यवस्त्वन्तरकृतिः अशक्यस्य वस्त्वन्तरस्यान्यवस्तुनः कृतिः करणं च सः । उदाहरणम् । हे राजन्, त्वां पश्यता मया कल्पद्रुमनिरीक्षणं देववृक्षावलोकनं लब्धम् । अत्र त्वमेव कल्पवृक्ष इति रूपकालंकारो व्यज्यते । तन्मूला च पृथिव्यां कर्तुमशक्यकल्पद्रुमावलोकनस्य कृतिरिति विशेषः ॥ १०० ॥

व्याघातालंकारः ।

स्याद्व्याघातोऽन्यथाकारि तथाकारि क्रियेत चेत् ।
यैर्जगत्प्रीयते हन्ति तैरेव कुसुमायुधः ॥ १०१ ॥

स्यादिति ॥ चेद्यदि तथाकारि प्रसिद्धार्थकर्तृ वस्तु अन्यथाकारि तद्विपरीतकारि क्रियेत निबध्येतेति यावत्। तर्हि व्याघातो नामालंकारः स्यात् । यैः पुष्पैः जगत्प्रीयते तुष्यति । प्रीणातेः कर्मकर्तरि लट् । तैरेव पुष्पैः कुसुमायुधः कामो हन्ति ताडयति । अत्र प्रीतिकरत्वेन प्रसिद्धानां कुसुमानां ताडनकरणत्वमन्यथाकारित्वं तानि कुसुमानि प्रोक्तानि । नर्मदामाहात्म्ये । 'अशोकमरविन्दं च चूतं च नवमल्लिका । शिरीषकुसुमं चैते पञ्चबाणस्य सायकाः ॥' वस्तुतस्तु शब्दादयः पञ्च विषया एव बाणत्वेन वर्ण्यन्ते इत्याहुः ॥ १०१ ॥

सौकर्येण निबद्धापि क्रिया कार्यविरोधिनी ।
दया चेद्बाल इति मय्यपरित्याज्य एव ते ॥ १०२ ॥

सौकर्येणेति ॥ यत्र सौकर्येण सुकरत्वेन । सुखकरत्वेनेत्यर्थः । निबद्धा प्रारब्धा क्रिया कार्यविरोधिनी सुकरत्वविरोधिनी दुःखकारिणी भवति अत्रापि व्याघातः । उदाहरणम् । हे राजन्, यदि बाल इति मत्वा दया चेत् अस्ति तर्हि रणे जिगमिषुणा ते त्वयाहमपरित्याज्य एव गेहे न स्थापनीय एव । किंतु युद्धे सदैव नेतव्य

१ 'दृष्ट्वा दग्धं मनसिजं जीवयन्ति दृशैव याः ।
विरूपाक्षस्य जयिनीस्ताः स्तुवे वामलोचनाः ॥'

२ 'कृपणो न विसृजत्यर्थं नरो दारिद्र्यशङ्कया ।
दातापि विसृजत्यर्थं तयैव ननु शङ्कया ॥'

इत्यर्थः । अत्र राजा गुरुत्वेन प्रारब्धं गेहे रक्षणं शूरस्य कुमारस्य दुःस्वतरं जातमिति कार्यविरोधित्वम् ॥ १०२ ॥

कारणमालालंकारः ।

गुम्फः कारणमाला स्याद्यथा प्रक्रान्तकारणैः ।
नयेन श्रीः श्रिया त्यागस्त्यागेन विपुलं यशः ॥१०३॥

गुम्फ इति ॥ यथा प्रक्रान्तकारणैः प्रक्रान्तानि प्रथमोच्चरिता-न्यनतिक्रम्य इति यथाप्रक्रान्तं यथाप्रक्रान्तमुक्तानि कारणानि यथा-प्रक्रान्तकारणानि । मध्यमपदलोपी समासः । तैस्तथोक्तैर्गुम्फो रचना कारणमाला स्फुटम् स्यात् । उदाहरणम् । नयेन कारणेन श्रीः कार्यं भवति । श्रिया कारणेन त्यागः कार्यं भवति । तेन त्यागेन च विपुलं यशो भवति । अत्र यद्यपि कार्याणामपि माला विद्यते तथापि कारणगुणवर्णनमेव कविसंरम्भ इति विवक्षापूर्विका हि शब्दार्थप्र-तिपत्तिरिति न्यायेन कारणमालेत्यभिधानम् ॥ १०३ ॥

एकावल्यलंकारः ।

गृहीतमुक्तरीत्यार्थश्रेणिरेकावली मता ।
नेत्रे कर्णान्तविश्रान्ते कर्णौ दोःस्तम्भदोलितौ ॥ १०४ ॥

गृहीतेति ॥ गृहीतमुक्तरीत्या आदौ गृहीतं पश्चान्मुक्तमिति गृहीतमुक्तं तस्य रीत्या निबन्धनप्रकारेण । यद्वा गृहीतं मुक्तं यस्यां सा गृहीतमुक्ता सा चासौ रीतिश्चेति तयेति विग्रहः । अर्थश्रेणिः

१ उत्तरोत्तरकारणभूतपूर्वपूर्वैः पूर्वपूर्वकारणभूतोत्तरोत्तरैर्वा वस्तुभिः गुम्फो गुम्फः कारणमाला । यथा वा ।

'भवन्ति नरकाः पापात्पापं दारिद्र्यसंभवम् ।
दारिद्र्यमप्रदानेन तस्माद्दानपरो भवेत् ॥'

२ नेत्रे इति । तस्य भूभुज इति सर्वत्र संबध्यते । दोःस्तम्भयोर्भुजस्तम्भयोर्दोलितमान्दोलनं ययोस्तौ । दोलनाविति पाठे दोला दोलनं ययोस्ताविति विग्रहः ।

'मधूनि पद्मे पिबति द्विरेफः पद्मं विभाति श्रवणे प्रियायाः ।
स्पृशत्यमुष्याः श्रवणं च नेत्रं निर्यान्ति नेत्राच्छुरत्कटाक्षाः ॥'

इति काव्यविलासे । उत्तरोत्तरस्य पूर्वपूर्वविशेषणभावः । पूर्वपूर्वस्योत्तरोत्तरस्य विशेषणभावो वा गृहीतमुक्तरीतिः ।

अर्थपङ्क्तिः एकावली मता । एकावली हारविशेषः । तत्सदृशत्वात् । उदाहरणम् । तस्य महीभुज इत्युत्तरश्लोकादपकृष्यते । नेत्रे कर्णान्तविश्रान्ते कर्णपर्यन्तमायते कर्णौ च दोःस्तम्भदोलितौ भुजस्तम्भलम्बिनौ । 'भुजबाहू प्रवेष्टो दोः' इत्यमरः ॥ १०४ ॥

> दोःस्तम्भौ जानुपर्यन्तप्रलम्बनमनोहरौ ।
> जानुनी रत्नमुकुराकारे तस्य महीभुजः ॥ १०५ ॥

दोःस्तम्भाविति ॥ दोःस्तम्भौ जानुपर्यन्तप्रलम्बनमनोहरौ । जानुनी च रत्नमुकुराकारे रत्नदर्पणतुल्ये । 'मुकुरो मणिभेदे स्यान्मल्लिकायां च दर्पणे' इति केशवः । अत्र पूर्वपदानां विशेष्यत्वमुत्तरपदानां च विशेषणत्वमिति संप्रदायः । प्रकारान्तरं च कुवलयानन्दे द्रष्टव्यम् । अत्र केषांचित्पदानां पुनरुक्तत्वेऽपि दोषो नाशङ्क्यः । सकलकविसंमतत्वाच्चमत्कारित्वाच्च । एवमावृत्तिदीपकेऽपि बोध्यम् ॥ १०५ ॥

मालादीपकालङ्कारः ।

> दीपकैकावलीयोगान्मालादीपकमुच्यते ।
> स्मरेण हृदये तस्यास्तेन त्वयि कृता स्थितिः ॥१०६॥

दीपकेति ॥ दीपकैकावलीयोगात् दीप इव दीपकम् । अनेको-

---

१ 'न तज्जलं यन्न सुचारुपङ्कजं न पङ्कजं तद्यदलीनषट्पदम् ।
न षट्पदोऽसौ कलगुञ्जितो न यो न गुञ्जितं तन्न जहार यन्मनः ॥'

> 'मम श्रयति पुण्येन विवेकं मणिरङ्गता ।
> विवेकस्तु [illegible] हरिपदद्वयम् ॥'

इति [illegible] ।

२ '[illegible] येन [illegible] [illegible]ताम् ।
कोदण्डेन [illegible] भूमण्डलं
तेन त्वं भवता च कीर्तिरतुला कीर्त्या च लोकत्रयम् ॥'

[illegible] । कोदण्डेन धनुषा [illegible] [illegible] तेन [illegible] [illegible] भूमण्डलं [illegible] [illegible] भवता कीर्ति[illegible] [illegible] ।

पदार्थपदं तस्य वैकावल्याख्य योगाढेनोमांल्लादीपकं नामोच्यते। मालया एकावल्या युक्तं दीपकमिति व्युत्पत्तेः। क्रमेण तस्याः का- मिन्याः हृदये स्थितिः कृता। तेन च कामिनीमनसा हृदयि स्थितिः कृता। अत्र स्थितिपदस्यावृत्तेर्दीपकत्वं हृदयादेश्च गृहीतमुक्तत्वा- देकावली चेत्युभयोर्योगः ॥ १०६ ॥

सारालंकारः।

उत्तरोत्तरमुत्कर्षः सार इत्यभिधीयते।
मधुरं मधु पीयूषं तस्मात्तस्मात्कवेर्वचः ॥ १०७ ॥

उत्तरोत्तरमिति ॥ उत्तरोत्तरं यथोत्तरमुत्कर्षं सार इत्यभिधी-

१ 'सारं लोकेषु विज्ञानरत्नेषु सारं विवेकिनः।
भेष्यगुणगणानरत्नेषु तेषु परागुणाः ॥'
इति काव्यादर्शे।
'गुणाः सुमनमूलात्मूलादपि च पादपाः।
पादुका किं न नीतोऽसौ मामवं मार्गवर्तिनि ॥'
'निर्मिंदाभिर्वापिधर्मदानन्देन्द्रो मदनः।
तस्मादपि मदहन तनोऽप्याला मरीयसी ॥'

यते कथ्यते । उदाहरणम् । मधु क्षौद्रं मधुरं स्वादु तस्माच्च पीयूषममृतं मधुरं तस्मात् कवेर्वचो मधुरम् । 'पञ्चमी विभक्ते' इति पञ्चमी ॥ १०७ ॥

यथासंख्यालंकारः ।

यथासंख्यं क्रमेणैव क्रमिकाणां समन्वयः ।
शत्रुं मित्रं विपत्तिं च जय रञ्जय भञ्जय ॥१०८॥

यथासंख्यमिति ॥ क्रमिकाणां क्रमप्राप्तानां क्रमेणैव समन्वयो यथासंख्यं स्पष्टम् । उदाहरणम् । हे राजन्, त्वं शत्रुं जय पराभव । 'जि अभिभवे' इति धातोर्लोट् । मित्रं च रञ्जय प्रीणय । विपत्तिं लोकानां कष्टं च भञ्जय । न चायं शब्दालंकारः । अन्वयकालेऽपि क्रमस्य विवक्षितत्वात् ॥ १०८ ॥

पर्यायालंकारः ।

पर्यायो यदि पर्यायेणैकस्यानेकसंश्रयः ।
पद्मं मुक्त्वा गता चन्द्रं कामिनीवदनप्रभा ॥ १०९॥

पर्याय इति ॥ यद्येकस्य वर्णनीयवस्तुनः पर्यायेणानुक्रमेण अनेकसंश्रयः अनेकपदार्थाश्रयणं निबध्यते तर्हि पर्यायः । परिपूर्वादयतेर्भावे घञ् । उदाहरणम् । कामिनीवदनप्रभा कान्तास्यकान्तिः पद्मं पङ्कजं मुक्त्वा चन्द्रं ग्लावं गता रात्राविति शेषः । निदर्शनासंकीर्णमेतत् ॥ १०९ ॥

एकस्मिन्यद्यनेकं वा पर्यायः सोऽपि संमतः ।
अधुना पुलिनं तत्र यत्र स्रोतः पुराऽजनि ॥ ११० ॥

एकस्मिन्निति ॥ यदि वा एकस्मिन्पदार्थे अनेकं वस्तु वर्ण्यते सोऽपि पर्यायः संमतः । उदाहरणम् । यत्र यस्मिन् प्रदेशे पुरा

---

1 'तन्व्याश्रयस्थितिरियं तव कालकूट
केनोत्तरोत्तरविशिष्टपदोपदिष्टा ।
प्रागर्णवस्य हृदये वृषलक्ष्मणोऽथ
कण्ठेऽधुना वससि वाचि पुनः खलानाम् ॥'

तन्व्याश्रयेति । हे कालकूट, उत्तरोत्तरविशिष्टमुत्कृष्टं पदं स्थानं यस्यां तादृशीत्वदाश्रयस्थितिस्तव केनोपदिष्टेत्यन्वयः ।

स्रोतः अजनि जायते स्म । 'दीपजन' इत्यादिना कर्तरि च्लेश्चिण् । अधुना संप्रति तत्र पुलिनं वर्तते । अत्रैकस्मिन्सरित्प्रान्ते वर्षासु प्रवाहो ग्रीष्मे च पुलिनत्वमित्यनेकवर्णनम् । 'स्रोतोऽम्बुसरणं स्वतः' इति 'तोयोत्थितं तत्पुलिनम्' इत्यमरः । नन्वनेकशब्दस्यैकवचनमयुक्तं द्विबहुभाषित्वादिति चेन्न । अभिधीयमानसमुदायस्यैकवचनबाधाभावात् । यथा माघे 'सेव्यतेऽनेकया सम्रतापाङ्गया' इति । 'भवन्त्यनेके जलधेरिवोर्मयः' इत्यत्र त्ववयवपरत्वात्समुदायबाहुल्याद्बहुत्वं युक्तमेवेति दिक् ॥ ११० ॥

परिवृत्त्यलंकारः ।

परिवृत्तिर्विनिमयो न्यूनाभ्यधिकयोर्मिथः ।
जग्राहैकं शरं मुक्त्वा कटाक्षात्स रिपुश्रियः ॥ १११ ॥

परिवृत्तिरिति ॥ न्यूनाभ्यधिकयोः स्वल्पाधिकयोः मिथः परस्परम् । 'मिथोऽन्योन्यं रहस्यपि' इत्यमरः । विनिमयो व्यत्ययः परिवृत्तिः परिवर्तनं व्यत्ययकरणं परिवृत्तिरिति व्युत्पत्तेः । उदाहरणम् । स राजा एकं एकत्वसंख्याविशिष्टम् । संख्यागुणवाचिना एकशब्देन तद्विशिष्टद्रव्ये लक्षणा । 'एकोऽन्यार्थे प्रधाने च प्रथमे केवले तथा । साधारणे समानेऽल्पे संख्यायां च प्रयुज्यते' इति मेदिनी । शरं बाणं मुक्त्वा रिपुं प्रति क्षिप्त्वा दत्त्वा चेति श्लिष्टं रूपकम् । रिपुश्रियः अरिलक्ष्म्याः गजतुरगादिसंपत्तिरूपायाः पद्मायाश्चेति श्लिष्टरूपकम् । 'शोभासंपत्तिपद्मासु लक्ष्मीः श्रीरिव दृश्यते' इति केशवः । कटाक्षान् तदीयकृपालाभानित्यर्थः । कृपासूचकत्वसादृश्येन तेषु कटाक्षत्वारोपात् बहूनित्यर्थः । 'बहुषु बहुवचनम्' इति सूत्राद्बहुशब्दाभावेऽपि कटाक्षाणां बहुत्वं एकशब्दप्रयोगादेकवचनाच्च शरस्यैकत्वमिति न्यूनाधिकभाव । जग्राह स्वीचकार, उपाददे चेति श्लिष्टरूपकम् । ततश्च राज्ञः शूरत्व रिपूणां च पलायनं गम्यते ॥ १११ ॥

१ 'तस्य च प्रवयसो जटायुषः स्वर्गिणः किमिव शोच्यतेऽधुना ।
येन जर्जरकलेवरव्ययात्क्रीतमिन्दुकिरणोज्ज्वलं यशः ॥'

तस्य चेति । प्रवयसोऽतिवृद्धस्य जटायुषो गृध्रविशेषस्य स्वर्गं गतवतः किमिव शोचनीयम् । न किंचिदित्यर्थः । जर्जरं जीर्णं कलेवरं शरीरं तस्य व्ययो रावणेन सह युद्धे त्यागस्तस्माद्धेतोः क्रीतम् । शरीरं दत्त्वा यशो गृहीतमित्यर्थः ॥

परिसंख्यालंकारः ।

परिसंख्या निषिध्यैकमेकस्मिन्वस्तुयन्त्रणम् ।
स्नेहक्षयः प्रदीपेषु न स्वान्तेषु नतभ्रुवाम् ॥ ११२ ॥

परिसंख्येति ॥ एकस्मिन्प्रकृते एकं किंचिद्वस्तु निषिध्य यन्त्रणं तस्यान्यत्र नियमनं परिसंख्या । परित्यज्य संख्यानं नियमनं परिसंख्येति व्युत्पत्तेः । उदाहरणम् । स्नेहक्षयः तैलक्षयः प्रीतिक्षयश्चेति श्लिष्टरूपकं प्रदीपेष्वेव भवति । नतभ्रुवां कामिनीनां स्वान्तेषु चित्तेषु तु न भवति । अत्र स्नेहक्षयस्य प्रदीपेषु नियमनं सुन्दरीस्वान्तेषु तन्निषेधस्पष्टीकारार्थमिति लक्षणानुगमः । स यथा सायं प्रातर्वाशनमिति श्रुतावशनस्य सायंप्रातःकालयोर्नियमेन अन्यकाले तन्निवृत्तिरर्थलभ्या । 'परिसंख्या विधेः फलम्' इति मीमांसकाः । तथापि स्नेहक्षयस्य नियमादर्थलभ्योऽन्यत्र निषेधः स्पष्टप्रतिपत्तये निबद्ध इति परिसंख्याविधिसादृश्यात् परिसंख्यालंकाराभिधानम् । केचित्तु काव्यार्थापत्तिकाव्यलिङ्गयोरिव तान्त्रिकाभिमतविधिवैलक्षण्याय काव्यपदं पूरणीयमित्याहुः । मुखं व्यादाय स्वपितीत्यादिवत् नियमनोत्तरकालं निषेधेऽपि निषिध्येत्यत्र क्त्वाप्रत्ययः पूर्वभावस्य बुद्धौ स्थापितत्वात् । एवं च कुवलयानन्दे संगतानि मृगाक्षीणामिति श्लोके स्त्रीसंगतस्य क्षणिकत्वोक्तिर्विरुद्धेति चेन्न । तत्र हि स्नेहस्य विषयभेदविवक्षा न तु नाशविवक्षेति ॥ ११२ ॥

विकल्पालंकारः ।

विरोधे तुल्यबलयोर्विकल्पालंकृतिर्मता ।
सद्यः शिरांसि चापान्वा नमयन्तु महीभुजः ॥११३॥

विरोधे इति ॥ तुल्यबलयोः समप्राधान्ययोर्विरोधे बाध्यबाधकभावे सति विकल्पालंकृतिः विकल्पनामालंकारः मता बुधैः स्वीकृता । उदाहरणम । महीभुजो नृपाः सद्यः शिरांसि नमयन्तु । चक्रवर्तिनो विजययात्रारम्भमात्रेण त्वा संधिं कुर्वन्त्वित्यर्थः । अथवा

१ 'निर्पाय मदिरां' दुरोदरवशो यसापद्विलं
सदास्ति पिहितं हितं न खलु वेद नैवाहितम् ।
अयं यतति धावति भ्रमति मूर्च्छति ध्यायति
प्रताम्यति पलायते प्रजपति स्फुरत्यश्रुति ॥'
इति काव्यविलासे ।

चापान्कोदण्डान् 'अर्धर्चाः पुंसि च' इति पुंस्त्वम् । नमयन्तु नमने-
नाधीनान्कृत्वा निग्रहं कुर्वन्त्वित्यर्थः । अत्र दूतवाक्ये संधिविग्रहयो-
र्बाध्यबाधकत्वाद्विरोधः । गम्यमानस्याप्यलंकृतिशब्दस्य पुनरुपादा-
नात् चारुत्वाभावेनालंकारः । यथा 'शृगालः काको वा स्पृशतु यदि
वा पाण्डुतनयः' इत्यादौ बाध्यबाधकभावो न चारुत्वहेतुः ॥ ११३ ॥

समुच्चयालंकारः ।

बहूनां युगपद्भावभाजां गुम्फः समुच्चयः ।
नश्यन्ति पश्चात्पश्यन्ति भ्रश्यन्ति च तव द्विषः ॥ ११४ ॥

बहूनामिति ॥ युगपद्भावभाजां युगपद्भवनं युगपद्भावः तद्भज-
नशीलानां बहूनामर्थानां गुम्फः संदर्भः समुच्चयः स्पष्टम् । उदाह-
रणम् । हे नृप, तव द्विषः नश्यन्ति पलायन्ते पश्चात्पश्यन्ति पृष्ठे
निरीक्षन्ते । किंच भ्रश्यन्ति अधः पतन्ति । भ्रमादिति भावः । अत्र
पौर्वापर्ये सत्यपि शतपत्रपत्रशतभेदन्यायेन युगपद्भावो बोध्यः ।
अत्रापि चारुत्वानुभूतेः । हरिस्त्वां मां च रक्षत्वित्यत्र समुच्चयमात्रं
नालंकारः ॥ ११४ ॥

अहंप्रथमिकाभाजामेककार्यान्वयोऽपि सः ।
कुलं रूपं वयो विद्या धनं च मदयत्यमुम् ॥ ११५ ॥

अहमिति ॥ अहं प्रथमो यस्यामित्यहंप्रथमिका । 'शेषाद्विभाषा'
इति कः समासान्तः । यद्वा अहंपूर्विकाशब्दस्य श्रीस्वामिनोक्त-
व्युत्पत्तिर्दर्शिता । पूर्वप्रथमशब्दयोरभिन्नार्थत्वात् । तथाहि । अहं पू-
र्वमिति यत्र तत्र पूर्वे या अहंपूर्विका । स्वार्थे कन् । मत्वर्थीयो
ठन् । एवं चाहंप्रथमिकाहंपूर्विकानाम युगपदेककार्यकरणत्वरा
सा च मृत्यादीनामचेतनत्वात्तत्र असंभवतीति तदनुभावानन्वययोग्यता-
लक्षणा तां भजन्तीति तद्भाजामर्थानां परस्परोपमर्देनान्वय-
योग्यतावतामित्यर्थः । एककार्येऽन्वय एकक्रियासंबन्धोऽपि सः समु-

- 'कृतं प्राज्यं राज्यं जलधिपरिखे भूमिवलये
मही भुक्ता मुक्ता निरवधि कृतं कार्यमखिलम् ।
इदानीं शय्यायां समुचितपदं वीरशयने
शृगालः काको वा स्पृशतु यदि वा पाण्डुतनयः'

चयः। उदाहरणम् । कुलं गोत्रम् । 'कुलं गोत्रे गणे गृहे' इति विश्वः । रूपं सौन्दर्यं वयो यौवनं तस्यैव मदहेतुत्वात् विद्या श्रुतादिः धनं वसु च अमुं भाग्यवन्तं मदयति मदमुन्मेकं करोतीति मदयति । 'तत्करोति तदाचष्टे' इति णिजन्तात्कर्तरि लटो रूपम् । अत्र कुलादीनां खलेकपोतन्यायेन समप्राधान्यं चारुत्वहेतुः ॥ ११५ ॥

कारकदीपकालंकारः ।

क्रमिकैकगतानां तु गुम्फः कारकदीपकम् ।
गच्छत्यागच्छति पुनः पान्थः पश्यति पृच्छति ११६

क्रमिकेति ॥ क्रमिकैकगतानां क्रमजातानामेकाश्रयाणां च बहूनामर्थानां गुम्फो रचना कारकदीपकं कारकं कर्तृकर्मादि दीप इव दीपकम् । अनेकोपकारकं यत्रेति व्युत्पत्तेः । उदाहरणम् । पान्थः गच्छति पुनरागच्छति पश्यति पृच्छति च किंचिदिति शेषः । अत्र पान्थशब्दस्य कर्तृकारकस्यानेकक्रियान्वितत्वाद्दीपकसादृश्यम् । अत्र क्रियाणां यौगपद्यं न विवक्षितमिति समुच्चयाद्भेदः ॥ ११६ ॥

समाध्यलंकारः ।

समाधिः कार्यसौकर्यं कारणान्तरसंनिधेः ।
उत्कण्ठिता च कुलटा जगामास्तं च भानुमान् ११७

समाधिरिति ॥ कारणान्तरसंनिधेः अन्यकारणसांनिध्यात् कार्यसौकर्यं कार्योत्पत्तिलाघवं समाधिः सम्यगाधानमुत्पादनमिति व्युत्पत्तेः । उदाहरणम् । च यदा कुलटा पांसुला उत्कण्ठा उत्सुकता संजाता यस्या इत्युत्कण्ठिता । तारकादित्वादितच् । च तदा भानुमानस्तं जगाम । अत्रौत्सुक्यमात्रस्य पांसुलेप्सितसंपादकत्वेऽपि सूर्यास्तोल्लसिततमोरूपकारणान्तरसांनिध्यात्सौकर्यं जातमिति लक्षणानुगमः ॥ ११७ ॥

---

१ 'निद्राति स्नाति भुङ्क्ते चलति कचभराञ्शोषयत्यन्तरास्ते
दीव्यत्यक्षैर्न चायं गदितुमवसरो भूय आयाहि याहि ।
इत्युद्दण्डैः प्रभूणामसकृदधिकृतैर्वारितान्द्वारि दीना-
न्पद्यास्मान्ये सरसिरुहदृशामन्तरङ्गैरपाङ्गैः ॥'

प्रत्यनीकालङ्कारः ।

प्रत्यनीकं बलवतः शत्रोः पक्षे पराक्रमः ।
जैत्रनेत्रानुगौ कर्णावुत्पलाभ्यामधः कृतौ ॥ ११८ ॥

प्रत्यनीकमिति ॥ बलवतः शत्रोः पक्षे सहायबले । 'पक्षः पार्श्वगरुत्साध्यसहायबलभित्तिषु' इत्यमरः । पराक्रमः पराभवः ताडनमिति यावत् । प्रत्यनीकं अनीके इति प्रत्यनीकम् । विभक्त्यर्थेऽव्ययीभावः । यद्वा अनीकं लक्षीकृत्येति प्रत्यनीकम् । 'लक्षणेनाभिप्रती आभिमुख्ये' इत्यव्ययीभावः । उदाहरणम् । उत्पलाभ्यां कमलाभ्यां जैत्रनेत्रानुगौ साधु यथा तथा जयतः ते जेतृणी । 'आक्रेस्तच्छीलतद्धर्मतत्साधुकारिषु' इति साधुकारिणि तृन् प्रत्ययः । जेतृणी एव जैत्रे जैत्रे च ते नेत्रे च जैत्रनेत्रे तयोरनुगौ समीपवर्तिनौ सेवकौ चेति श्लिष्टरूपकम् । कर्णावधःकृतौ भारेणाक्रान्तौ तिरस्कृतौ चेति श्लिष्टरूपकेण लक्षणानुगमः । नेत्र चोत्पलयोर्विजिगीषुत्वारोपो व्यज्यते इत्यलंकारेणालंकारध्वनिः । भेदान्तरं कुवलयानन्दे द्रष्टव्यम् ॥ ११८ ॥

काव्यार्थापत्त्यलंकारः ।

कैमुत्येनार्थसंसिद्धिः काव्यार्थापत्तिरिष्यते ।
स जितस्त्वन्मुखेनेन्दुः का वार्ता सरसीरुहम् ॥ ११९ ॥

कैमुत्येनेति ॥ कैमुत्येन किमुतभावः कैमुत्यं तेन किमुतशब्दप्रयोगेणेत्यर्थः । अर्थसंसिद्धिः व्यङ्ग्यार्थप्रतिपत्तिः । काव्यार्थापत्तिः

---

१ यत्र शत्रुर्बलीयान् स्वयं जेतुमशक्यः तत्र तत्पक्षाभिनतुर्बलस्य विजयः कृत इति वर्णितं प्रत्यनीकमलंकारः ।

'प्रतापोऽयं तापस्तव यदमलीन्दुर्यविजये
सुधाधामा धामप्रसरमसादेत्य सहसा ।
सरोजानां जातु स्फुटमनुकारीति मलिनो
निशायां स्याद्धावपि मलिनयत्येव सहसा ॥'

इति बालविलासे ।

'मधुमतीपः कुपितः स्वकीयमधुमपापवर्तिमीलनेन ।
बिम्बं समासाद्य बलान्सुधांशोः कलङ्कमङ्के प्रथमातनोति ॥'

२ 'अधरोऽयमधीराक्ष्या बन्धुजीवप्रभाहरः ।
अन्यजीवप्रभां हन्त हरतीति किमद्भुतम् ॥'

काव्यसंबन्धिन्यर्थापत्तिः । काव्यपदं वाक्त्रिकार्थापत्तेर्वारणार्थं तस्याः प्रमाणालंकारेष्वन्तर्भावात्। इष्यते बुधैरिति शेषः । उदाहरणम्। हे प्रिये, त्वन्मुखेन सः प्रसिद्धः पद्मसंकोचक इन्दुर्जितस्तर्हि सरसीरुहं पद्मं जितमिति तु का वार्ता । वार्ता विनापि जातमेवेत्यर्थः । कैमुत्यशब्दस्योपलक्षणत्वात् तदर्थशब्दान्तरस्यापि प्रयोगे इत्याहुः । अत्र पद्मजेतरि चन्द्रे जिते पद्मं जितमेवेति दण्डापूपिकान्यायेन व्यङ्ग्यार्थाक्षेपः ॥ ११९ ॥

काव्यलिङ्गालंकारः ।

समर्थनीयस्यार्थस्य काव्यलिङ्गं समर्थनम् ।
जितोऽसि मन्द कन्दर्प मच्चित्तेऽस्ति त्रिलोचनः १२०

समर्थनीयस्येति ॥ समर्थनीयस्य समर्थनसापेक्षस्यार्थस्य समर्थनं दृढीकरणम्। हेतुषु दर्शनमिति यावत् । काव्यलिङ्गं काव्याभिमतं लिङ्गं तर्कशास्त्राभिमतलिङ्गव्यावर्तनीयं काव्यपदम् । न्यायेऽनुमानं हेतुश्च लिङ्गं युक्तिः समर्थका इति गोवर्धनः । हेतुस्वरूपं चोक्तमग्निपुराणे—'सिसाधयिषितार्थस्य हेतुर्भवति साधकः । कारको ज्ञापकश्चेति द्विधा सोऽप्युपदिश्यते ॥' इति । तत्र दण्डेन घट इत्यादिकारकहेतौ चमत्काराभावान्न काव्यलिङ्गत्वम् । उदाहरणम् । हे मन्द मूढ कन्दर्प, मया जितोऽसि त्वमिति शेषः । यतः मच्चित्ते त्रिलोचनः शिवोऽस्ति । अत्र स्मरस्य जयो दुष्करत्वात्समर्थनसापेक्षः । तस्य समर्थनं च त्रिलोचनस्य हृदि स्थित्या कृतमिति वाक्यार्थहेतुकं काव्यलिङ्गम्। पदार्थहेतुकं तु दर्शितं कुवलयानन्दे । अत्र त्रिलोचनपदस्य साभिप्रायत्वात्परिकराङ्कुरेण परिकरेण वा अस्य संकर इति दिक् ॥ १२० ॥

अर्थान्तरन्यासालंकारः ।

उक्तिरर्थान्तरन्यासः स्यात्सामान्यविशेषयोः ।
हनूमानब्धिमतरद्दुष्करं किं महात्मनाम् ॥ १२१ ॥

१ [illegible]

उक्तिरिति ॥ सामान्यविशेषयोः महद्व्यापकाल्पव्यापकयोरर्थयोरुक्तिः युगपदिति शेषः । अर्थान्तरन्यासः स्पष्टम् । उदाहरणम् । हनूमान् यस्मात् अब्धिं सागरमतरत् उल्लङ्घितवान् । धातूनामनेकार्थत्वात् । तथा हि । महात्मनामलौकिकानां दुष्करं किम् न किंचिदित्यर्थः । अत्र प्रकृतार्थविशेषस्य समर्थनार्थं सामान्यार्थोक्तिः । सामान्यविशेषत्वेनोक्तिरर्थान्तरन्यासः । हेतुहेतुमद्भावेनोक्तिः काव्यलिङ्गमिति निर्णयः कुवलयानन्दे । कार्यकारणभावेनोक्तिस्तु काव्यलिङ्गेऽन्तर्भवति । अर्थान्तरन्यासे इति केचित् ॥ १२१ ॥

विशेषस्य सामान्येन समर्थनमुदाहृत्य सामान्यस्य विशेषेण समर्थनमुदाहरति—

> गुणवद्वस्तुसंसर्गाद्याति स्वल्पोऽपि गौरवम् ।
> पुष्पमालानुषङ्गेण सूत्रं शिरसि धार्यते ॥ १२२ ॥

गुणवदिति ॥ गुणवद्वस्तुसंसर्गात् गुणयुक्तपदार्थयोगात् स्वल्पोऽपि पदार्थो गौरवं महत्त्वं याति । तथाहि । सूत्रं कार्पासादितन्तु पुष्पमालानुषङ्गेण कुसुमसङ्ग्रथनेन शिरसि धार्यते । शिरःशब्दोऽत्र [illegible] । अत्र गन्धगुणयुक्तानां पुष्पाणामनुषङ्गात् सूत्रस्य तन्तुपदार्थस्य गौरवं आदरणीयत्वं [illegible] वा जात इति लक्षणानुगमः । अत्र पुष्पाणां [illegible] गुणवत्त्वमिति केचित् । [illegible] तु [illegible] । गुणशब्दो हि [illegible] प्रसिद्धो ननु [illegible] । तथाच केशवः — 'गुणोऽप्रधाने रूपादौ मौर्व्यां सूदे वृकोदरे । [illegible] [illegible]' इति ॥ १२२ ॥

विकस्वरः[1] ।

> यस्मिन्विशेषसामान्यविशेषाः स विकस्वरः ।
> स न जिग्ये महान्तो हि दुर्धर्षाः सागरा इव ॥ १२३ ॥

१ 'अनन्तरत्नप्रभवस्य यस्य हिमं न सौभाग्यविलोपि जातम् ।
एको हि दोषो गुणसन्निपाते निमज्जतीन्दोः किरणेष्विवाङ्कः'

यस्मिन्निति ॥ यस्मिन् विशेषसामान्यविशेषाः क्रमेण भवन्ति स विकस्वरः । विकसन् साधुकरोति विकस्वर इति व्युत्पत्तेः । 'कसु विकासे' इति धातोः साधुकारिणि वरप् । शब्दविस्तारोऽर्थविस्तारश्च विकसनत्वेनाभिमतः । ततश्चमत्कारविस्तारोऽलंकारः । उदाहरणम् । स राजा परैर्न जिग्ये । हि यस्मान्महान्तो दुर्धर्षाः दुर्जया भवन्ति । क इव । सागरा इव । यथा महत्त्वात्सागरा दुर्धर्षाः । अस्योदाहरणा- विधयार्थत्रयविन्यासः प्रकारान्तरमप्यस्ति कुवलयानन्दे । प्रायो म[illegible] स्यार्थान्तरन्यासयोः संकरोऽयं न त्वलंकारान्तरं तस्यैव नामान्तरं वा ॥ १२३ ॥

प्रौढोक्त्यलंकारः ।

प्रौढोक्तिरुत्कर्षाहेतौ तद्धेतुत्वप्रकल्पनम् ।
कचाः कलिन्दजातीरतमालस्तोममेचकाः ॥ १२४ ॥

प्रौढोक्तिरिति ॥ उत्कर्षाहेतोः उत्कर्षस्य प्रकृतार्थगतस्याहेतोः तद्धेतुत्वप्रकल्पनं वर्णनीयस्योत्कर्षाभिधानं प्रौढोक्तिः । प्रौढानां धीमतां उक्तिरिति व्युत्पत्तेः । विचित्रकल्पनाशालिनो हि धीमन्तः । उदाहरणम् । कृष्णस्य कचाः केशाः कलिन्दजातीरतमालस्तोममेचकाः । कलिन्दजा कलिन्दपर्वतप्रभवा यमुना तस्यास्तीरे ये तमालस्तोमाः त इव मेचकाः श्यामाः । 'मेचकः श्यामकृष्णयोः' इति केशवः । अत्र [illegible] श्यामत्व[illegible] यमुनातीरत्वम् [illegible] तु न हेतुरित्येतेनाप्य[illegible] [illegible] इति धृतिमाश्रित्य तमालेऽतिशोभने कल्पि[illegible] [illegible]

सम्भावनालंकारः ।

सम्भावना यदीत्थं स्यादित्यूहोऽन्यस्य सिद्धये ।
यदि शेषो भवेद्वक्ता कथिताः स्युर्गुणास्तव ॥१२५॥

सम्भावनेति ॥ [illegible] [illegible] अन्यस्य सिद्धये

[illegible]

[illegible]

[illegible]

[illegible]

[illegible]

प्रतीतये यदीत्थं स्यादित्येवंविध ऊहो वितर्कः संभावनं स्मृतम् । यदादिप्रयोगपूर्वकत्वाभिधानाज्जातिव्याप्तिः । उदाहरणम् । हे देव, यदि वक्ता शेषः सहस्रमुखो भवेत् शेषो वा वक्ता भवेत् तर्हि तेन तव गुणाः कथिताः स्युः । अत्र यदादिप्रयोगपूर्वकवितर्केण गुणानामगण्यत्वसिद्धिः ॥ १२५ ॥

मिथ्याध्यवसित्यलंकारः ।

किंचिन्मिथ्यात्वसिद्ध्यर्थं मिथ्यार्थान्तरकल्पनम् ।
मिथ्याध्यवसितिर्वेश्यां वशयेत्खस्रजं वहन् ॥ १२६ ॥

किंचिदिति ॥ कस्यचिन्मिथ्यात्वं किंचिन्मिथ्यात्वम् । षष्ठीतत्पुरुषः । किमः सविभक्तिकात् स्वार्थे चिदिति निपातः प्रत्ययो वा । चिदन्तस्य तत्पुरुषे षष्ठ्या लुक् । तस्य सिद्धये इति सिद्ध्यर्थं मिथ्यार्थान्तरकल्पनं मिथ्याभूतस्यार्थान्तरस्य कल्पनं मिथ्याभूतमध्यवसानं मिथ्याध्यवसितिरिति व्युत्पत्तेः । उदाहरणम् । खस्रजं गगनकुसुममालां वहन् सन् वेश्यां गणिकां वशयेत् वशीकुर्यात् । अत्र खपुष्पमालावहनोक्त्या वेश्यावशीकरणस्य मिथ्यात्वसिद्धिः । यदादिप्रयोगाभावाच्च पूर्वस्माद्भेदः ॥ १२६ ॥

ललितालंकारः ।

प्रस्तुते वर्ण्यवाक्यार्थप्रतिबिम्बस्य वर्णनम् ।
ललितं निर्गते नीरे सेतुमेषा चिकीर्षति ॥ १२७ ॥

'अद्य क्षोणिपतेः परार्धपरया हस्तीकृताः संपदः
[illegible] विलासवीतयः ।
[illegible] आनेन [illegible]
[illegible] कुर्वंसमवीक्षुषोदधे [illegible] ॥'

आर्येति । [illegible] उपलक्षिताः [illegible] सा [illegible] । [illegible] कुर्वंत प्रत्येव [illegible] नीरे । मिथ्याध्यवसितिरियमेव [illegible] ।

१ 'ख. सूर्यप्रभवो वंशः क्व चाल्पविषया मतिः ।
तितीर्षुर्दुस्तरं मोहादुडुपेनास्मि सागरम् ॥'

अत्रापि [illegible] । [illegible] सूर्यवंश [illegible] तितीर्षुरस्य- [illegible] सागरं [illegible] ।

प्रस्तुत इति ॥ प्रस्तुते प्रकृते वर्ण्ये वर्णनीये यो वाक्यार्थ-स्तस्य प्रतिबिम्बः प्रतिनिधिस्तस्य वर्णनं ललितं स्यात् । उदाहरणम् । यथा नायिका नीरे निर्गते सति सेतुं पालिं चिकीर्षति कर्तुमिच्छति । अत्र प्रकृता नायिका यस्या नायके गते सति तदानयनं कर्तुमिच्छ-तीति वर्णनीयो वाक्यार्थः । तत्प्रतिनिधिभूतार्थवर्णनाल्लक्षणानुगतिः । एषेति प्रस्तुतनिर्देशादप्रस्तुतप्रशंसासमासोक्तिप्रभृतितो भेदः ॥ १२७ ॥

प्रहर्षणालंकारः ।

उत्कण्ठितार्थसंसिद्धिर्विना यत्नं प्रहर्षणम् ।
तामेव ध्यायते तस्मै निसृष्टा सैव दूतिका ॥ १२८ ॥

उत्कण्ठितेति ॥ यत्नं प्रयासं विना उत्कण्ठितार्थसंसिद्धिः उ-त्कण्ठितस्य संजातोत्कण्ठस्यार्थिनः अर्थसंसिद्धिः कार्यनिष्पत्तिः प्रह-र्षणं स्यात् । उदाहरणम् । तामेव प्रियानुनयकुशलतयाभीप्सितामेव दूतीं ध्यायते चिन्तयते तस्मै नायकाय । क्रियाग्रहणाच्चतुर्थी । तमु-द्दिश्येत्यर्थः । सैव तदभीष्टैव दूतिका चेटिका निसृष्टा प्रहिता सा मानिनी मां प्रत्यनुकूलां दूतीं कदा प्रेषयिष्यति इत्युत्कण्ठितस्य नाय-कस्य यत्नं विना दैवात्नायिकया सैव दूती प्रेषितेति लक्षणानुगमः । उत्कण्ठालक्षणं चोक्तं कुवलयानन्दे ॥ १२८ ॥

वाञ्छितादधिकार्थस्य संसिद्धिश्च प्रहर्षणम् ।
दीपमुद्योतयेद्यावत्तावदभ्युदितो रविः ॥ १२९ ॥

---

१ 'प्रेमैर्मेदुरमम्बरं वनभुवः श्यामास्तमालद्रुमै-
र्नक्तं भीरुरयं त्वमेव तदिमं राधे गृहं प्रापय ।
इत्थं नन्दनिदेशतश्चलितयोः प्रत्यध्वकुञ्जद्रुमं
राधामाधवयोर्जयन्ति यमुनाकूले रहः केलयः ॥'

अत्र राधामाधवयोः परस्परमुत्कण्ठितप्रसिद्धतरं अत्र ग्रन्थकारेण निबद्धमि-त्यत्रोदाहरणे लक्षणानुगतिः ।

२ 'चातकस्त्रिचतुरः पयःकणान्याचते जलधरं पिपासया ।
सोऽपि पूरयति विश्वमम्भसा हन्त हन्त महतामुदारताम् ॥'

पद्यमिति शेषः ।

याञ्छितादिति ॥ वाञ्छितार्थीप्सितार्दधिकार्थस्याधिकगुणस्यार्थान्तरस्य संसिद्धिर्लाभश्च प्रहर्षणम्। चकारबलेन प्रतीतावपि पुनर्ग्रहणं चारुतरत्वार्थम्। उदाहरणम्। यावद्दीपं उद्योतयेत्तावद्रविरभ्युदितः। अत्र दीपेच्छोरर्कलाभः। प्रभातो यत्नं विना जात इति लक्षणानुगतिः॥ १२९॥

यत्नादुपायसिद्धर्थात्साक्षाल्लाभः फलस्य च।
निध्यञ्जनौषधीमूलं खनतासादितो निधिः॥ १३०॥

यत्नादिति॥ उपायसिद्धर्थात्कारणलाभनिमित्तात्प्रयत्नात् साक्षात्फलस्य कार्यस्य लाभश्च प्रहर्षणमिति संबध्यते। उदाहरणम्। निध्यञ्जनौषधीमूलं निधिपेक्षकमञ्जनं निध्यञ्जनं निध्यञ्जनार्थं ओषधी निध्यञ्जनौषधी। 'ओषध्यः फलपाकान्ताः' इति कोशात्। 'कृदिकारादक्तिनः' इति ङीपन्तोऽपि ओषधीशब्दोऽस्ति। हेमस्तु 'ओषधिः स्यादोषधीश्च फलपाकावसानिका' इत्याह। तस्याः मूलं खनता विहरणता पुंसा निधिर्धनसंचयः आसादितः प्राप्तः। 'निधिर्ना शेवधिर्भेदाः पद्मशङ्खादयो निधेः' इत्यमरः। अत्राञ्जनसंपादकमूलिकाग्रहणाय भूमिं खनतस्तत्रैव निधेर्दर्शनं जातमिति लक्षणानुगमः॥ १३०॥

विषादनालङ्कारः।

इष्यमाणविरुद्धार्थसंप्राप्तिस्तु विषादनम्।
दीपमुद्योतयेद्यावन्निर्वाणस्तावदेव सः॥ १३१॥

इष्यमाणेति॥ इष्यमाणविरुद्धार्थसंप्राप्तिः इष्यमाणादीप्सितार्थात् विरुद्धो विपरीतो योऽर्थस्तस्य संप्राप्तिः सम्यग्लाभस्तु विषादनं स्पष्टम्। उदाहरणम्। यावद्दीपमुद्योतयेत् स्नेहार्पणेन प्रदीपयेत् तावदेव प्रदीपो निर्वाणं नष्टः। 'निर्वाणो वाते' इति निष्ठानत्वम्। 'निर्वाणं निर्वृतौ मोक्षे विनाशे गजमज्जने' इत्यमरः॥ १३१॥

१ 'रात्रिर्गमिष्यति भविष्यति सुप्रभातं
भास्वानुदेष्यति हसिष्यति पङ्कजश्रीः।
इत्थं विचिन्तयति कोशगते द्विरेफे
हा हन्त हन्त नलिनीं गज उज्जहार॥'

उल्लासालङ्कारः ।

एकस्य गुणदोषाभ्यामुल्लासोऽन्यस्य तौ यदि ।
अपि मां पावयेत्साध्वी स्नात्वेतीच्छति जाह्नवी १३२

एकस्येति ॥ एकस्य कस्यचिद्वस्तुनः गुणदोषाभ्यामुत्कर्षापकर्षाभ्यां अन्यस्य वस्तुनो यदि तौ गुणदोषौ वर्ण्येते तदोल्लासः स्पष्टम् । यद्यपि गुणदोषाभ्यामित्यत्र साहित्यासंभवात् द्वन्द्वसमासो दुर्घटस्तथापि भिन्नानि लक्षणानि बुद्धिस्थानि कृत्वा साहित्यं समाधेयम् । उदाहरणम् । साध्वी 'सती साध्वी पतिव्रता' इत्यमरः । स्नात्वा मामपि पावयेत् इति जाह्नवी नित्यमित्यच्छति । अत्र साध्व्याः पवित्रतागुणेन जाह्नव्याः स गुणो वर्णित इति लक्षणानुगमः ॥ १३२ ॥

दोषेण दोषो यथा—

काठिन्यं कुचयोः स्रष्टुं वाञ्छन्त्यः पादपद्मयोः ।
निन्दन्ति विश्वधातारं त्वद्धाटीष्वरियोषितः ॥१३३॥

---

१ 'यदयं रथसंक्षोभादंसेनांसो निपीडितः ।
एकः कृती शरीरेषु शेषमङ्गं भुवो भरः ॥'
अत्र नायिकांसनिष्पीडनेन तदंसनिपीडितस्य सौभाग्यगुणो वर्णितः ।

२ यत्र कस्यचिद्गुणेनान्यस्य गुणो दोषेण दोषो गुणेन दोषो दोषेण गुणो [illegible] र्ण्यते स उल्लासः । उदाहरणानि ।

'लोकानन्दन चन्दनद्रुम सखे नास्मिन्वने स्थीयतां
दुर्वंशैः कठिनैः [illegible]
[illegible]
न स्थास्यन्ति [illegible] सर्वं दहेयुर्वनम् ॥'

अत्र वेणूनां [illegible] दोषो वर्णितः ।

'दानार्थिनो मधुकरा यदि कर्णतालै-
र्दूरीकृताः करिवरेण मदान्धबुद्ध्या ।
तस्यैव गण्डयुगमण्डनहानिरेषा
भृङ्गाः पुनर्विकचपद्मवने चरन्ति ॥'

[illegible] दोषेणैव वर्णितः ।

'आघ्रातं परिचुम्बितं परिमुहुर्लीढं पुनश्चर्वितं
त्यक्तं वा भुवि नीरसेन मनसा तत्र व्यथां मा कृथाः ।
हे सद्रत्न तवैतदेव कुशलं यद्वानरेणादृतो-
[illegible] कृतं सादरम् ॥'

[illegible] गुणेनैव वर्णितः ।

काठिन्यमिति ॥ कुचयोः मृष्टं काठिन्यं पलायनकाले पाद्-पद्मयोर्वाञ्छन्त्योऽरियोषितः निहतवैरिवनिताः स्थल्यादीषु धाराभि-रटन्तीति धात्वः । पृषोदरादित्वात्साधुः । वाजिवाद्भिन्यः तासागतासु विश्वधातारं प्रमाणं निन्दन्ति । मर्तृवधान्नातवैधव्यानामस्माकं व्यर्थं कुचकाठिन्यं सृष्टवन्तं पलायनोपयोगिपादवलकाठिन्यं चासृष्टव-न्तमचतुरं विधातारं धिगिति दुःखाद्गर्हयन्तीत्यर्थः । अत्र कुचका-ठिन्यव्यर्थत्वदोषेण विधातुर्निन्दादोषो वर्णितः ॥ १३३ ॥

गुणेन दोषो यथा—

> तद्भाग्यं धनस्यैव यन्नाश्रयति सज्जनम् ।
> लाभोऽयमेव भूपालसेवकानां न चेद्वधः ॥ १३४ ॥

तदिति ॥ तत् धनस्यैव अभाग्यं भाग्यहीनत्वम् । तत्किमित्यत आह । यद्यस्मात्सज्जनं साधुम् । 'साधुसभ्यार्यसज्जनाः' इत्यमरः । नाश्रयति न सेवते । अत्र सज्जनस्य सेव्यत्वगुणेन धनस्याभाग्यत्व-दोषो वर्णितः । दोषेण गुणो यथा—चेद्यदि भूपालसेवकानां वधो न भवेत्तर्हि धनप्राप्तिं विनाप्ययमेव जीवनरूप एव लाभः । अत्र राज्ञः क्रौर्यदोषेण सेवकानां वधाभावो गुणत्वेन वर्णितः । केचित्तु हे भूपालेति संबोध्य राजानं प्रति सेवकस्येयमुक्तिरित्याहुस्तन्न । सेव-कस्यैवंविधप्रागल्भ्यानौचित्यात् ॥ १३४ ॥

अवज्ञालंकारः ।

> ताभ्यां तौ यदि न स्यातामवज्ञालंकृतिस्तु सा ।
> स्वल्पमेवाम्बु लभते प्रस्थं प्राप्यापि सागरम् ।
> मीलन्ति यदि पद्मानि का हानिरमृतद्युतेः ॥ १३५ ॥

---

१ 'मदुक्तिश्चेदन्तर्मदयति सुधीभूय सुधियः
किमस्या नाम स्याद्रसपुरुषानादरभरैः ।
यथा यूनस्तद्वत्परमरमणीयापि रमणी
कुमाराणामन्तःकरणहरणं नैव कुरुते ॥'

मदुक्तिरिति । ममोक्तिः । कविता सुधियोऽन्तः करणं सुधीभूयामृतीभूय चेन्मदयति तोषयति तदास्या मदुक्तेः रसानां नीरसानां पुरुषाणामनादरसमूहैः किं नाम स्यात्'

ताभ्यामिति ॥ यदि ताभ्यां गुणदोषाभ्यां तौ गुणदोषौ न स्यातां तर्हि सा अवज्ञालंकृतिः । अत्र गम्यमानोऽप्यलंकृतिनामधेय-मत्कारात्पत्तेऽपि बाधामात्रद्योतनार्थः । उदाहरणम् । गुणेन गुणाभावो यथा । प्रस्थं प्रस्थपरिमितजलपात्रं सागरं वारिधिं प्राप्यापि स्वल्पमेवाम्बु सलिलं लभते । अत्र सागरस्य महत्त्वगुणेन प्रस्थस्याधिकजललाभगुणाभावो वर्णितः । दोषे दोषाभावो यथा—मीलन्तीति ॥ यदि चन्द्रोदये पद्मानि मीलन्ति संकुचन्ति तर्हि अमृतद्युतेः सुधांशोः का हानिः । अत्र पद्मनिमीलनदोषेण चन्द्रस्य हानिरूपदोषाभावो वर्णितः । सुधांशुत्वगुणबलेन पद्मद्वेषरूपदोषस्य तिरस्कारात् पद्पदी ॥ १३५ ॥

अनुज्ञालंकारः ।

दोषस्याभ्यर्थनानुज्ञा तत्रैव गुणदर्शनात् ।
विपदः सन्तु नः शश्वद्यासु संकीर्त्यते हरिः ॥१३६॥

नकिंचिदित्यर्थः । क्वचिदलसेति पाठः । परमरमणीयापि रमणी स्त्री यूनस्तरुणस्य यथान्तःकरणं मदयति न तथा बालाना तद्वदित्यन्वयः ।

'त्वं चेत्संचरसे वृषेण लघुता कानाम दिग्दन्तिनां
व्यालैः कङ्कणभूषणानि कुरुषे हानिर्न हेम्नामपि ।
मूर्धानं कुरुषे जलांशुमयशः किं नाम लोकत्रयी-
दीपस्याम्बुजबान्धवस्य जगतामीशोऽसि किं ब्रूमहे ॥'

त्वं चेदिति शिवं प्रति कस्यापि कवेरुक्तिः । जलांशु चन्द्र पक्षे जडांशुम् । अम्बुजबान्धव सूर्यं । अन्यत्स्पष्टम् । अत्राद्ये कवितारमणीगुणाभ्यामलसबालहृदयोन्मादगुणाभावो वर्णितः । द्वितीये परमेश्वरानङ्गीकारदोषेण दिग्गजादीनां लघुत्वादिदोषाभावो वर्णितः । इत्यवज्ञालंकारः ।

१ 'मय्येव जीर्णतां यातु यत्त्वयोपकृतं कपे ।
नरः प्रत्युपकारार्थी विपत्तिमभिकाङ्क्षति ॥'

इय हनूमन्तं प्रति राघवस्योक्तिः । अत्र प्रत्युपकाराभावो दोषः तदभ्युपगमहेतुर्गुणो विपत्त्याद्यभावा अप्रगल्भि- सा च व्यतिरेकमुखप्रयुक्तेन सामान्येन विशेषसमर्थनरूपेणार्थान्तरन्यासेन दर्शिता । यथा वा—

'भजेम भवदन्तिकं प्रकृतिमेत्य पैशाचिकीं
किमित्यमरसंपदं प्रमथनाथ नाथामहे ।
भवद्भवनदेहलीविकटतुण्डदण्डाहति-
त्रुटन्मुकुटकोटिभिर्मघवदादिभिर्भूयते ॥'

दोषस्येति ॥ दोषस्याप्रियस्याप्यभ्यर्थना अनुज्ञानामालंकृतिः । दोषाभ्यर्थनायां हेतुमाह । तत्रैव दोषे एव गुणदर्शनात् । गुणकल्पनादित्यर्थः । उदाहरणम् । नोऽस्माकं भक्तानां शश्वन्नित्यं विपदः सन्तु । यासु विपत्सु हरिर्विष्णुः संकीर्त्यते । अत्र विपद्दोषप्रार्थना हरिकीर्तनगुणानुगुणत्वादिति लक्षणसंगतिः ॥ १३६ ॥

लेशालंकारः ।

लेशः स्याद्दोषगुणयोर्गुणदोषत्वकल्पनम् ।
अखिलेषु विहङ्गेषु हन्त स्वच्छन्दचारिषु ।
शुक पञ्जरबन्धस्ते मधुराणां गिरां फलम् ॥ १३७ ॥

लेश इति ॥ दोषगुणयोः असमत्समर्थयोः गुणदोषत्वकल्पनं दोषस्य गुणत्वकल्पने गुणस्य च दोषत्वकल्पनमित्यर्थः । लेशोऽलंकारः स्यात् । लेशः कल्पनालेशोऽस्यास्तीति लेशः । रूपकादिष्विव सोपपत्तिकल्पनाभावाल्लेशत्वम् । उदाहरणम् । हन्तेति खेदे । अखिलेषु सर्वेषु विहंगेषु पक्षिषु स्वच्छन्दचारिषु स्वेच्छाविहारिषु सत्सु हे शुक, ते तव पञ्जरबन्धः पञ्जरारोपणरूपो बन्धः मधुराणां प्रियाणां गिरां वाचां फलम् । अत्र सर्वपक्षिणामवाग्मित्वदोषो गुणत्वेन शुकस्य वाग्मित्वगुणो दोषत्वेन च वर्णितः । अप्रस्तुतप्रशंसाप्यत्र संभवति ॥ १३७ ॥

मुद्रालंकारः ।

सूच्यार्थसूचनं मुद्रा प्रकृतार्थपरैः पदैः ।
नितम्बगुर्वी तरुणी दृग्युग्मविपुला च सा ॥ १३८ ॥

सूच्यार्थेति ॥ प्रकृतार्थपरैः प्रस्तुतार्थप्रतिपादकैः पदैः सूच्या-

१ दोषस्य गुणत्वकल्पनं गुणस्य दोषत्वकल्पनं च लेशः ।

२ 'सन्तः सच्चरितोदयव्यसनिनः प्रादुर्भवद्यन्त्रणाः
सर्वत्रैव जनापवादचकिता जीवन्ति दुःखं सदा ।
अव्युत्पन्नमतिः कृतेन न सता नैवासता व्याकुलो
युक्तायुक्तविवेकशून्यहृदयो धन्यो जनः प्राकृतः ॥'

३ 'अश्विनी वसतु भूप मन्दिरे मन्दिरे वसतु ते पुनर्वसु
रेवतीप्रतिकनिष्ठयेव या कीर्तिरत्नमधिका सो भव ॥'

यंसूचनं व्यञ्जनार्थसूचनं मुद्रा मुद्रणम् । प्रकृतार्थे अप्रकृतार्थनिवेशनं मुद्रेति स्फुटमेव । उदाहरणम् । सा तन्वी युवतिः नितम्बगुर्वी नितम्बयोर्गुर्वी पीननितम्बेत्यर्थः । दृग्युग्मविपुला च विशालनयनयुगलेत्यर्थः । अत्र प्रस्तुतार्थपरे दृग्युग्मविपुलाशब्दे छन्दोनानुप्रसक्तछन्दोविशेषाभिधानं सूच्यते । अस्य श्लोकस्य तद्विरचनत्वात् । एवं हलायुधकृतायां छन्दःशास्त्रवृत्तौ सर्वच्छन्दोनामानि सूचितानि । विष्णुभक्तिकल्पलतायां च तिथिवारादिनामानि सूचितानि । तत्र मुद्रानामैवालंकारः ॥ १३८ ॥

रत्नावल्यलंकारः ।

क्रमिकाप्रकृतार्थानां न्यासं रत्नावलीं विदुः ।
चतुरास्यः पतिर्लक्ष्म्याः सर्वज्ञस्त्वं महीपते ॥ १३९ ॥

क्रमिकेति ॥ क्रमिकाप्रकृतार्थानां क्रमं प्राप्तानामप्रस्तुतवस्तूनां न्यासं निवेशनं रत्नावलीं विदुः । कथयन्तीत्यर्थः । गौणोऽयं रत्नावलीशब्दः । यथा रत्नपङ्क्तिः सुवर्णे रचिता भवति तथा प्रस्तुतार्थपङ्क्तिः प्रस्तुतवाक्ये निवेशिता यत्र भवतीति सादृश्यानुगमात् । उदाहरणम् । हे महीपते, त्वं चतुरास्यः सुन्दरवदन चतुर्मुखश्चेति श्लिष्टरूपकम् । लक्ष्म्याः पतिः संपत्तिशाली रमापतिश्चेति श्लिष्टरूपकम् । सर्वज्ञः सर्ववित् शंकरश्चेति श्लिष्टरूपकम् । 'सर्वज्ञस्त्रिपुरान्तकस्त्रिनयनः' इति हलायुधः । अत्र प्रकृते राशि प्रसिद्धक्रमाणां ब्रह्मादीनामारोपः मुद्रालंकारे सूच्यार्थस्य प्रकृतान्वयो नास्ति इह सोऽस्तीति भेदः ॥ १३९ ॥

तद्गुणालंकारः ।

तद्गुणः स्वगुणत्यागादन्यदीयगुणग्रहः ।
पद्मरागायते नासामौक्तिकं तेऽधरत्विषा ॥ १४० ॥

---

१ 'रत्याप्तप्रियलाञ्छने कठिनतावासे रसालिङ्गिते
प्रह्लादैकरसे क्रमादुपचिते भूभृद्गुरुत्वापहे ।
कोकस्पर्धिनि भोगभाजि जनितानङ्गे खलीनोन्मुखे
भाति श्रीरमणावतारदशकं बाले भवत्याः स्तने ॥'
जनितानङ्गे जनित अनङ्ग अङ्गरहित मीनादि येन तस्मिन् । इत्यनेन दशावतार सूचितः ।

२ 'वीर त्वद्रिपुरमणी परिधातुं पल्लवानि संस्पृश्य ।
न हरति वनभुवि निजकररुहरुचिखचितानि पाण्डुपत्रधिया ॥'

तद्गुण इति ॥ स्वगुणत्यागात् स्ववर्णपरिहारेण अन्यदीयगुणग्रहः परकीयवर्णग्रहणं तद्गुणः सः । परकीयगुणो यस्मिन्निति व्युत्पत्तेः । अत्र गुणशब्दो वर्णवाची कोशस्तु प्रागुक्तः । उदाहरणम् । हे प्रिय, ते तव नासामौक्तिकं नासाभरणं मौक्तिकमिति मध्यमपदलोपी समासः । अधरत्विषा अधरोष्ठकान्त्या पद्मरागायते कुरुविन्दायते । 'कर्तुः क्यङ्' इत्याचारे क्यङ् प्रत्ययः । अत्र मौक्तिकस्य शुभ्रगुणत्यागेनाधरशोणवर्णग्रहणात् तद्गुणः । अत्र गृह्यमाणगुणस्योत्कृष्टत्वमर्थसिद्धमिति नोक्तम् ॥ १४० ॥

पूर्वरूपालंकारः ।

पुनः स्वगुणसंप्राप्तिः पूर्वरूपमुदाहृतम् ।
हरकण्ठांशुलिप्तोऽपि शेषस्त्वद्यशसा सितः ॥ १४१ ॥

पुनरिति ॥ पुनः स्वगुणसंप्राप्तिः स्वगुणस्य परेण तिरोहितस्य पुनः संप्राप्तिः पूर्वरूपम् । पूर्वं प्राचीनं रूपं यस्मिन्निति व्युत्पत्तेः । उदाहृतमुदाहरणम् । हरकण्ठांशुलिप्तोऽपि हरकण्ठांशुभिर्नीलवर्णी-

वीरेति । हे वीर, त्वदरिकामिनी वनभुवि परिधानं कर्तुं पल्लवानि करेण संस्पृश्य [illegible] न हरति न गृह्णाति । [illegible] । [illegible] रक्ता [illegible] व्यामोहोऽर्थः ।

१ 'विभिन्नवर्णा गरुडाग्रजेन सूर्यस्य रथ्याः परितः स्फुरन्त्या ।
रत्नैः पुनर्यत्र रुचा रुचं स्वामानिन्यिरे वंशकरीरनीलैः ॥'

विभिन्नेति । [illegible] । गरुडाग्रजेनारुणेन विभिन्नवर्णा भिन्न[illegible] सूर्यस्य रथ्या अश्वा [illegible] परितः स्फुरन्त्या रुचा [illegible] आनीतवन्तः । रथ्या विभिन्नवर्णा इति वान्वयः ।

द्वारं खड्गिभिरावृतं बहिरपि प्रस्विन्नगण्डैर्गजै-
रन्तः कञ्चुकिभिः स्फुरन्मणिधरैरध्यासिता भूमयः ।
आक्रान्तं महिषीभिरेव शयनं त्वद्विद्विषां मन्दिरे
राजन्सैव चिरन्तनप्रणयिनी शून्येऽपि राज्यस्थितिः ॥'

द्वारमिति । हे राजन्, तव विद्विषां मन्दिरे शून्येऽपि चिरन्तनप्रणयिनी सैव राज्यस्थितिर्विद्यमानैव [illegible] । यतो द्वारं खड्गिभिर्गण्डकाख्यपशुभिरेव [illegible] । बहिरपि भूमयः [illegible] । अन्तःपुरभूमयः [illegible] । शयनं तल्पं महिषीभिर्[illegible]

लिनोऽपि श्यामीकृतोऽपीत्यर्थः । शेषः फणिराजः त्वद्यशसा शुक्ले पुनः सितो जातः । अमूर्तस्यापि यशसः सितत्वं कवयो वर्णयन्ति । तथाच वाग्भट्टः । 'अप्यदृश्यौ सितां कीर्तिमकीर्तिं च ततोऽन्यथा' इति । निपपीयाद्दिति शेषः ॥ १४१ ॥

पूर्वावस्थानुवृत्तिश्च विकृते सति वस्तुनि ।
दीपे निर्वापितेऽप्यासीत्काञ्चीरत्नैर्महन्महः ॥१४२॥

पूर्वेति ॥ वस्तुनि वर्ण्यमानपदार्थे विकृते विकारं प्राप्ते सति । विकारो द्विविधः । नाशो रूपान्तरापत्तिश्च, पूर्वावस्थानुवृत्तिः पूर्वावस्थात्यागश्च । चशब्देन पूर्वरूपमाकृष्यते । नृपगृहादि दीपे निर्वापितेऽपि शमितेऽपि सुरतक्रियेति शेषः । काञ्चीरत्नै रशनामणिभिः महदधिकं महस्तेज आसीत् । अत्र दीपनाशविकारेऽपि रत्नतेजसा तमसः? पूर्वावस्थानुवृत्ति विशेषालंकारे प्रकृतवस्तुनः स्थानान्तराधानवर्णनम् । इह तु वस्त्वन्तरेण तत्कार्यसिद्धिवर्णनमिति भेदः ।१४२

अतद्गुणालङ्कारः ।

संगतान्यगुणानङ्गीकारमाहुरतद्गुणम् ।
चिरं रागिणि मच्चित्ते निहितोऽपि न रज्यसे ॥१४३॥

संगतेति ॥ संगतान्यगुणानङ्गीकारं संगतस्य मीलितस्य [illegible] गो गुणस्तस्यानङ्गीकारमस्वीकारमतद्गुणमाहुः । [illegible] [illegible] । [illegible] चिरं चिरकालं रागिणि प्रेमयुक्ते [illegible] [illegible] [illegible] । [illegible] हृदये निहितो निवेशि- [illegible] न [illegible] [illegible] न [illegible] । [illegible] [illegible]

[illegible] [illegible] [illegible]
[illegible] [illegible] ।
[illegible] [illegible]
[illegible] [illegible] [illegible] ॥

[illegible] [illegible] [illegible] [illegible] [illegible] [illegible] । [illegible] ।

रुद् । 'रज्यसि' इति पाठे रञ्जिर्दैवादिकोऽकर्मकः । अत्र रागिणि चेतसि निहितस्य रागाभाववर्णनमतद्गुणः विशेषोक्तिसंकीर्णोऽयम् ॥ १४३ ॥

अनुगुणालंकारः ।

प्राक्सिद्धस्वगुणोत्कर्षोऽनुगुणः परसंनिधेः ।
नीलोत्पलानि दधते कटाक्षैरतिनीलताम् ॥ १४४ ॥

प्रागिति ॥ परसंनिधेरन्यसांनिध्यात् प्राक्सिद्धस्य पूर्वमेव स्वतः-सिद्धस्य स्वगुणस्योत्कर्षोऽनुगुणः । गुणमुपकारमनुगच्छतीत्यनुगुण इति व्युत्पत्तेः । उदाहरणम् । नीलोत्पलानि इन्दीवराणि कटाक्षैः कटानि वक्राणि अक्षीणि अवलोकनानि कटाक्षाः वक्रप्रेक्षणानि तैः अतिनीलतां नेत्रमहसा नीलतमत्वं दधते । अत्र कर्णोत्पलानां परसांनिध्यात्स्वतःसिद्धगुणोत्कर्षो वर्णितः । समाध्यलंकारे च 'परसांनिध्याज्झटिति कार्योत्पत्तिरिति ततो भेदः ॥ १४४ ॥

मीलितालंकारः ।

मीलितं यदि सादृश्याद्भेद एव न लक्ष्यते ।
रसो नालक्षि लाक्षायाश्चरणे सहजारुणे ॥ १४५ ॥

मीलितमिति ॥ यदि सादृश्याद्वस्तुद्वयस्य भेदो भिन्नत्वमेव न लक्ष्यते तर्हि मीलितम् । नपुंसके भावे क्तः । उदाहरणम् । सहजारुणे चरणे पादतले लाक्षाया रसो यावको नालक्षि भिन्नतया न ज्ञातः ॥ १४५ ॥

सामान्यालंकारः ।

सामान्यं यदि सादृश्याद्विशेषो नोपलक्ष्यते ।
पद्माकरप्रविष्टानां मुखं नालक्षि सुभ्रुवाम् ॥ १४६ ॥

---

१ 'कपिरपि च कापिशायनमदमत्तो वृश्चिकेन संदष्टः ।
अपि च पिशाचग्रस्तः किं ब्रूमो वैकृतं तस्य ॥'
अत्र कपित्वजात्या स्वतःसिद्धवैकृतस्य मद्यमेवादिभिरुत्कर्षः ।

२ 'छिन्नमपि च लोचनयुगलालिकस्य' इति केचित् ।

३ 'मल्लिकामाल्यधारिण्यः सर्वाङ्गीणार्द्रचन्दनाः ।
क्षौमवत्यो न लक्ष्यन्ते ज्योत्स्नायामभिसारिकाः ॥'
अत्रोदाहरणे चन्द्रिकाभिसारिकाणां धवलिमगुणसाम्याद्भेदानध्यवसायः ।

४ 'रत्नस्तम्भेषु संक्रान्तप्रतिबिम्बशतैर्वृतः ।
लङ्केश्वरः सभामध्ये न ज्ञातो वालिसूनुना ॥'
मीलितालंकारे एकेनापि परस्परभिन्नस्वरूपानवभासनं मीलनं विवक्ष्यते । सामान्यालंकारे तु भिन्नस्वरूपावभासेऽपि व्यावर्तकविशेषो नोपलक्ष्यत इति भेदः ।

सामान्यमिति ॥ यदि सादृश्यादिविशेषो भेदरूपधर्मविशेषो गोपत्वस्यते न ज्ञायते । [illegible] भावः । तर्हि सामान्यं समानयोर्भावः सामान्यं इति व्युत्पत्तेः पद्माकरप्रविष्टानां पद्मानां [illegible]नाम् । यद्वा पद्मगृहे प्रविष्टानाम् । 'पद्माकरस्तडागः' इत्यमरः । सुभ्रुवां सुन्दरीणां मुखं नालक्षि । पद्मभेदे प्रतीयमानेऽपि हास्यादिभेदकधर्मं विना मुखमेतदिति न ज्ञातम् ॥ १४६ ॥

उन्मीलितविशेषकौ ।

भेदवैशिष्ट्ययोः स्फूर्तावुन्मीलितविशेषकौ ।
हिमाद्रिं त्वद्यशोमग्नं सुराः शीतेन जानते ।
लक्षितान्युदिते चन्द्रे पद्मानि च मुखानि च ॥ १४७ ॥

भेदेति ॥ भेदवैशिष्ट्ययोः [illegible] स्फूर्तौ सत्याम् उन्मीलितविशेषकौ भवतः । भेदस्फूर्तावुन्मीलितं [illegible] वैशिष्ट्यस्फूर्तौ च विशेषकः [illegible] । उन्मीलितं यथा । हे राजन्, सुराः देवाः त्वद्यशोमग्नं [illegible] । [illegible] । हिमाद्रिं [illegible] शीतेन [illegible] । 'शीतं गुण तद्वत्यर्थाः' इत्यमरः । जानते [illegible] । विशेषको यथा । चन्द्रे उदिते सति पद्मानि मुखानि च लक्षितानि [illegible] ॥ १४७ ॥

उत्तरालंकारः ।

किंचिदाकूतसहितं स्याद्गूढोत्तरमुत्तरम् ।
यत्रासौ वेतसी पान्थ तत्रेयं सुतरा सरित् ॥ १४८ ॥

[illegible]

[illegible]

किंचिदिति ॥ किंचिदाकूतसहितं किंचिच्च तदाकूतं चेति कर्मधारयः । तेन सहितं गुप्तमुत्तरं गूढोत्तरं स्यात् स्पष्टम् । उदाहरणम् । हे पान्थ पथिक, यत्रासौ वेतसी तत्र इयं सरित् सुतरा सुखेन तीर्यतेऽसौ सुतरा । ईषद्दुरित्यादिना कर्मणि खल्प्रत्ययः । अत्र सरित्तरणतीर्थं पृच्छन्तं पान्थं प्रति वेतसीकुञ्जे संकेतस्थानभावयोरित्यभिप्रायेणोत्तरमिति लक्षणानुगतिः । अत्र ध्वनित्वेऽप्यलंकारत्वं न हीयते इति प्राञ्चः ॥ १४८ ॥

चित्रोत्तरालंकारः ।

प्रश्नोत्तरान्तराभिन्नमुत्तरं चित्रमुत्तरम् ।
के दारपोषणरताः के खेटाः किं चलं वयः ॥१४९॥

प्रश्नेति ॥ प्रश्नोत्तरान्तराभिन्नं प्रश्नश्च उत्तरान्तरं चेति द्वन्द्वः ताभ्यामभिन्नं यदुत्तरं तच्चित्रमुत्तरं चित्रोत्तरमित्यर्थः । यद्यप्यत्र वाक्येन संज्ञात्वमस्मात्समासो युक्तस्तथापि सुरं द्विपभित्यादौ कश्चिद्समासेऽपि संज्ञात्वमस्तीति न दोषः । तच्च द्विविधं प्रश्नाभिन्नमुत्तरान्तराभिन्नं चेति । आद्यं यथा । दारपोषणरताः पत्नीपोषणतत्पराः के इति प्रश्नः । केदारपोषणरताः क्षेत्रपालनतत्परा इत्युत्तरं । तच्च प्रश्नाभिन्नं चित्रोत्तरम् । द्वितीयं यथा । खेटाः खगाः के इत्येकः प्रश्नः । चलं लोलं किमिति द्वितीयः प्रश्नः । द्वयोरप्युत्तरं वयः पक्षिणः विहङ्गस्य जसि रूपम् । किं च । वयो बाल्यादि । वयः पक्षिणि 'बाल्यादावपि' इत्यमरः । भेदद्वयं श्लेषसंकीर्णम् ॥ १४९ ॥

सूक्ष्मालंकारः ।

सूक्ष्मं पराशयाभिज्ञेतरसाकूतचेष्टितम् ।
मयि पश्यति सा केशैः सीमन्तमणिमावृणोत् ॥ १५०

सूक्ष्ममिति ॥ पराशयाभिज्ञेतरसाकूतचेष्टितं पराशयाभिज्ञः परभाववेदी च इतरोऽन्यस्तस्य यत् साकूतचेष्टितं साभिप्रायक्रिया-

'ग्रामेऽस्मिन्प्रस्तरप्राये न किंचित्पान्थ विद्यते ।
पयोधरोन्नतिं दृष्ट्वा वस्तुमिच्छसि चेद्वस ॥'

आस्तरणादिकमर्थयमानं पान्थं प्रत्युक्तिरियम् । पयोधरौ दृष्ट्वा वस्तुमिच्छसि चेद्वस ।

१ 'संकेतकालमनसं विटं ज्ञात्वा विदग्धया ।
आसीन्नेत्रार्पिताकूतं लीलापद्मं निमीलितम् ॥

स्तने कल्पितम् । उदाहरणम् । सा कामिनी यदि परति [illegible]
संकेतस्थानं [illegible] प्रेक्षमाणे सति केशैः सीमन्तमपि [illegible]
नरते तथोमेन्मिमदनामिति भावः । केशैः शिरोदेश[illegible]
मिति भावः । मानुषोण सङ्गमोतिम । पूर्वं नमया धृते [illegible]
मपि[illegible] चेष्टितं [illegible]
[illegible] चेष्टितं तु [illegible]
[illegible] । तत्र तत्र चेष्टितस्य [illegible] । तत्र [illegible]
[illegible] ॥ १५० ॥

[illegible] ।

विहितं [illegible] चेष्टितम् ।

[illegible] ॥१५१

विहितमिति ॥ [illegible]
[illegible] चेष्टितम् । [illegible] । विहि
[illegible]
[illegible] । तत्र [illegible] गृहागते यदि कान्ता किता [illegible]
[illegible]
[illegible]
[illegible]
[illegible] ॥ १५१ ॥

[illegible] ।

[illegible] ।

[illegible] ॥ १५२ ॥

[illegible]

[illegible]

[illegible]

[illegible]

परागैः भवनवाटिकारजोभिः । 'परागः पुष्परजसि धूलिस्नानीययोरपि' इति विश्वः । धूसरा मलिना अस्मि भवन्य । वाक्यार्थः कर्म । 'धूपदयालयशाङ्कि विभाति गङ्गा' इतिवत् । अत्र भूमौ आरोपभोगजन्यधूसरस्य परागस्पर्शहेतुकत्वोक्त्या स्वसंभोगोपगूहनं कृतम् ॥ १५२ ॥

गूढोक्त्यलङ्कारः ।

गूढोक्तिरन्योद्देश्यं चेद्यदन्यं प्रति कथ्यते ।
वृषापेहि परक्षेत्रादायाति क्षेत्ररक्षकः ॥ १५३ ॥

गूढोक्तिरिति ॥ चेद्यदि अन्योद्देश्यं अन्यंप्रति वक्तुं योग्यं यत् वाक्यं तत् अन्यं तत्सन्निधिप्रति कथ्यते तर्हि गूढोक्तिः । स्पष्टम् । उदाहरणम् । हे वृष बलीवर्द, कामुक चेति श्लिष्टरूपकम् । परक्षेत्रादन्यकेदारात् अन्यदारेभ्यश्चेति श्लिष्टरूपकम् । अपेहि दूरं गच्छ । क्षेत्ररक्षकः क्षेत्रपतिः आयाति । अत्र परदाररतं कामुकंप्रति वक्तव्यं वाक्यं परक्षेत्रप्रविष्टं वृषभमुद्दिश्योक्तं प्रस्तुताङ्कुरे श्लेषं विनाप्यन्यार्थप्रतीतिः । अत्र तु श्लेषमहिम्नेति तयो भेदः ॥ १५३ ॥

विवृतोक्त्यलङ्कारः ।

विवृतोक्तिः श्लिष्टगुप्तं कविनाविष्कृतं यदि ।
वृषापेहि परक्षेत्रादिति वक्ति ससूचनम् ॥ १५४ ॥

विवृतोक्तिरिति ॥ यदि श्लिष्टगुप्तम् । श्लिष्टं च तद्गुप्तं चेति कर्मधारयः छायानुविहितवत् । यत्तु कविना आविष्कृतं वाक्ये निपद्धं भवति तर्हि विवृतोक्तिः । विवृतस्य प्रकाशितस्यार्थस्योक्तिरिति व्युत्पत्तेः । उदाहरणम् । हे वृष बलीवर्द, हे पुरुषेति श्लिष्टरूपकम् 'परक्षेत्रात् परावपनात् परस्त्रियाश्चेति श्लिष्टरूपकम् । अपेहि

१ 'ग्राम्यो मे पितरौ गतौ न गणयत्येषा त्रपावती पुनस्त्वत्परया मामिह पुष्पितानि गुरवः ग्रामा गृहाभ्यन्तरम् । शय्यामात्रसहायिनीं पथिजनः श्रान्तो न मां सेवते स्वामिन्नागमलालसमीव रजनीं ह्यामीपते रक्ष माम् ॥'
आगमेन धैर्येण लालनीय गुरु, पक्षे आगमेनाध्ययनेन लालनीय सेवनीय । अत्र श्लेषादिनिरोधो ज्ञायमानेर्थे प्रार्थनागमाद्याकारस्यावसराय भगवन्तं प्रति मार्गोदाय प्रख्यापनम् ।

१ 'दृष्ट्वा केशव गोपरागहृतया किंचिन्न दृष्टं मया तेनेह स्खलितास्मि नाथ पतितां किं नाम नालम्बसे । एकस्त्वं विषमेषु खिन्नमनसां सर्वाबलानां गतिर्गोप्यैवं गदितः सलेशमवताद्गोष्ठे हरिर्वश्चिरम् ॥'

दूरं गच्छेति ससूचनं यथा तथा वक्ति । कश्चित्कश्चिदिति शेषः । सूचने चेत्थं, परक्षेत्रे सस्यानि चरतो बलीवर्दस्य शिक्षामिषेण परनिवासरतमित्रस्योपदेशः क्रियते इति व्यङ्ग्यार्थस्य प्रकाशनात् सूक्ष्मकाव्यमेतत् ॥ १५४ ॥

युक्त्यलंकारः ।

युक्तिः परातिसंधानं क्रियया मर्मगुप्तये ।
त्वामालिखन्ती दृष्ट्वान्या धनुः पौष्पं करेऽलिखत् १५५

युक्तिरिति ॥ मर्मगुप्तये मर्मरहस्यस्य गोप्यार्थस्य गुप्तये गोपनाय क्रियया चेष्टया परातिसंधानं परस्य वञ्चनं युक्तिः । युज्यते-ऽसौ युक्तिरिति व्युत्पत्तेः । उदाहरणम् । हे सखे, सा त्वां आलिखन्ती चित्रयन्ती अन्यां स्वसखीभिन्नां कांचिद्दृष्ट्वा करे चित्रस्थपाणौ पौष्पं धनुः अलिखत् । अत्र चित्रितस्य पुंसः पाणौ स्मरचिह्नपुष्पचापावलेखनक्रियया कामो मया चित्रित इति परवञ्चनं कृतं तेन वर्णनीयस्य कामसादृश्यं व्यज्यते ॥ १५५ ॥

लोकोक्त्यलंकारः ।

लोकप्रवादानुकृतिर्लोकोक्तिरिति कथ्यते ।
सहस्व कतिचिन्मासान्मीलयित्वा विलोचने ॥१५६॥

लोकेति ॥ लोकप्रवादानुकृतिः लोके यः प्रवादः प्रसिद्धो वादः प्रवादः । 'कुगतिप्रादयः' इति समासः तस्यानुकृतिरनुसरणम् । प्रवादानुसारिवाक्यमित्यर्थः । लोकोक्तिः लोकानामुक्तिः प्रवाद इति व्युत्पत्त्या । इति नाम्ना कथ्यते भण्यते । उदाहरणम् । विलोचने नेत्रे मीलयित्वा कतिचिन्मासान्सहस्व [illegible] । अत्र नेत्रनिमीलनपूर्वक[illegible] लोकप्रवादानुसारिणी [illegible] नेत्रनिमीलनं न संभवति । एवं [illegible] ज्ञेयम् ॥ १५६ ॥

छेकोक्त्यलंकारः ।

छेकोक्तिर्यत्र लोकोक्तेः स्यादर्थान्तरगर्भिता ।
भुजङ्ग एव जानीते भुजङ्गचरणं सखे ॥ १५७ ॥

* [illegible]

छेकोक्तिरिति ॥ यत्र वाक्ये लोकोक्तिर्लोकप्रवादरूपा अर्थान्तरगर्भता भिन्नार्थयुक्ता स्यात्तत्र छेकोक्तिः । छेकस्य चतुरस्योक्तिरिति व्युत्पत्तेः । उदाहरणम् । हे सखे, भुजङ्गः सर्प एव भुजङ्गचरणं सर्पपादं जानीते । यदिदमप्रकटत्वादन्यस्त्र नेति लोकोक्तिः । तत्र च भुजं वक्रं गच्छतीति भुजङ्गः । खल एव भुजङ्गचरणं खलचेष्टितं जानीते इत्यर्थान्तरयुक्तत्वाच्छेकोक्तिरिति लक्षणसंगतिः ॥ १५७ ॥

वक्रोक्त्यलंकारः ।

वक्रोक्तिः श्लेषकाकुभ्यामपरार्थप्रकल्पनम् ।
मुञ्च मानं दिनं प्राप्तं नेह नन्दी हरान्तिके ॥१५८॥

वक्रोक्तिरिति ॥ श्लेषकाकुभ्यां श्लेषेण काक्वा चेत्यर्थः । अनेकार्थानां युगपदुक्तौ निवेशनम् । साहित्यसंभवेन द्वन्द्वसमासो युक्त एवेत्युक्तम् । अपरार्थप्रकल्पनं अपरस्य परविवक्षितभिन्नार्थस्य प्रकल्पनं संपादनं वक्रोक्तिः । वक्रस्य वक्रा वा उक्तिरिति व्युत्पत्तेः । उदाहरणम् । श्लेषवक्रोक्तिर्यथा हे प्रिये, मानं मुञ्च दिनं प्राप्तं प्रातः-

---

१ 'नाथ मयूरो नृत्यति तुरगाननवक्षसः कथं नृत्यम् ।
नहि नहि तव कलापी इह सुखलापी प्रिये कोऽस्ति ॥'

इति काव्यालंकारे ।

'अहो केनेदृशी बुद्धिर्दारुणा तव निर्मिता ।
त्रिगुणा श्रूयते बुद्धिर्न तु दारुमयी क्वचित् ॥
भवित्री रम्भोरु त्रिदशवदनग्लानिरधुना
स ते रामः स्थाता न युधि पुरतो लक्ष्मणसखः ।
इयं यास्यत्युच्चैर्विपदमधुना वानरचमू-
र्लघिष्ठेदं षष्ठाक्षरपरविलोपात्पठ पुनः ॥'

सर्वमिदं शब्दश्लेषमूलाया वक्रोक्तेरुदाहरणम् ।

'अङ्गुल्या कः कपाटं प्रहरति कुटिले माधवः किं वसन्तो
नो चक्री किं कुलालो नहि धरणिधरः किं द्विजिह्वः फणीन्द्रः ।
नाहं घोराहिमर्दी किमसि खगपतिर्नो हरिः किं कपीन्द्र
इत्थं राधाप्रियायाः प्रतिवचनजडः पातु वः पद्मनाभः ॥
भिक्षार्थी क्व प्रयातः सुतनु बलिमखे ताण्डवं क्वाद्य भद्रे
मन्ये वृन्दावनान्ते क्व नु स मृगशिशुर्नैव जाने वराहम् ।
बाले कच्चिन्न दृष्टो जरठवृषपतिर्गोप एवास्य वेत्ता
लीलासंलाप इत्थं जलनिधिहिमवत्कन्ययोस्त्रायतां वः ॥'

कालो जात इति पुरुषस्योक्तौ स्त्रिया इहात्र स्थले नन्दी न नन्दि
श्वरो न । 'नन्दिनौ नन्दिकेश्वरौ' इत्यमरः । किंतु हरान्तिके गि
समीपे सोऽस्तीति श्लेषेणार्थान्तरं कल्पितं प्राप्तं हरगतं नन्दि
मा मुग्धेति सभङ्गः श्लेषः ॥ १५८ ॥

काकुवक्रोक्तिर्यथा—

> असमालोच्य कोपस्ते नोचितोऽयमितीरिता ।
> नैवोचितोऽयमिति तं ताडयामास मालया ॥१५९

असमालोच्येति ॥ हे प्रिये, ते तव असमालोच्य अविच
अयं कोपो नोचितः न युक्त इति कान्तेनेरिता प्रार्थिता काचित् उ
कोपो नैवोचित इति काका विरुद्धार्थमुक्त्वा तं मालया माल्येन
'माला माल्यं सौमनस्यम्' इत्यमरः । ताडयामास रोषचिह्नमेतन
विपरीतार्थसंपादकः प्लुतोच्चारादिः शब्दविकारः काकुः । अत्र नक
रैवकारयोः संधौ प्लुतोच्चारो विपरीतार्थद्योतकः । 'काकुः स्त्रियां वि
कारो यः शोकभीत्यादिभिर्ध्वनेः' इत्यमरः । श्लेषवक्रोक्तिः शाब्
सिद्धा काकुवक्रोक्तिस्त्वैच्छिकीति विशेषः ॥ १५९ ॥

स्वभावोक्त्यलंकारः ।

> स्वभावोक्तिः स्वभावस्य जात्यादिस्थस्य वर्णनम् ।
> कुरङ्गैरुत्तरङ्गाक्षैः स्तब्धकर्णैरुदीक्षितम् ॥ १६० ॥

स्वभावोक्तिरिति ॥ जात्यादिस्थस्य जातिगुणादिनियतस्य [illegible]
भावस्य वर्णनं स्वभावोक्तिः स्पष्टम् । उदाहरणम् । उत्तरङ्गाणि
उत्तरङ्गाण्यधिकतरचञ्चलान्यक्षीणि येषां तैः स्तब्धकर्णैः स्तब्ध
जडीभूताः कर्णा येषां तैश्च कुरङ्गैर्मृगैः उदीक्षितं पश्यतया अ
धिकं विलोकितम् । नपुंसके भावे क्तः । मृगजातिनिष्ठः स्वभावोऽय
मद्भवलोकनक्रियास्वभावो वा आदिशब्दाद्योऽवस्थाविकारादिस्वभाव

---

१ आरूढस्तिनिशालभालविलसत्स्वेदाम्बुगेहोदरा
भेरीहादतिवासरेष्विषमखागोलग्नमानगाः ।
शुष्यन्तीजितलं वपुः[illegible]पुटं [illegible]
मन्दप्रान्तविलोचनं प्रविचिन्ते[illegible]

अत्र [illegible] [illegible] [illegible] [illegible] ।
[illegible] ।

श्लेषाः । प्राचां मते तु जातेरेव स्वभावोक्तिः । अतएव 'स्वभावो-
क्तिरसौ जातिः' इति वाग्भट्टेनास्या जातिरिति नामान्तरमुक्तम् १६०

भाविकालंकारः ।

भाविकं भूतभाव्यर्थसाक्षात्कारस्य वर्णनम् ।
अहं विलोकयेऽद्यापि युध्यन्तेऽत्र सुरासुराः॥१६१॥

भाविकमिति ॥ भूतभाव्यर्थसाक्षात्कारस्य भूतभाविनोरर्थयोः
कश्चिद्भूतस्य कश्चिद्भाविनोऽर्थस्य यः साक्षात्कारोऽनुभवस्तस्य वर्णनं
भाविकम् । भावाय साक्षात्काराय प्रभवतीति भाविकमिति व्युत्पत्तेः।
उदाहरणम् । अत्र सुरासुराः सुरासुरविरोधस्य राज्यहेतुकत्वादश्वु-
विडालादिवत् स्वाभाविकत्वाभावादेकत्वसद्भावो न। युध्यन्ते इत्यह-
मद्यापि विलोकये पश्यामि । भूतार्थसाक्षात्कारोऽयम् । एवं भावि-
नोऽप्युदाहरणमूह्यम् ॥ १६१ ॥

उदात्तालंकारः।

उदात्तमृद्धिश्चरितं श्लाघ्यं चान्योपलक्षणम् ।
सानौ यस्याभवद्युद्धं तद्धूर्जटिकिरीटिनोः ॥ १६२ ॥

उदात्तमिति ॥ ऋद्धिः संपत्तिः श्लाघ्यं स्तुत्यं चरितमवदानं च ।
'अवदानं महत्कर्म' इत्यमरः ॥ अन्योपलक्षणं अन्यस्य उपलक्षणं श्ला-
घ्यताबोधकं सत् उदात्तम् । उत्कर्षेणादीयते गृह्यतेऽस्मेत्युदात्तम् । भावे
कर्मणि क्तः। श्लाघ्यपदस्य ऋद्धिविशेषणत्वे लिङ्गविपरिणामो बोध्यः ।
उदाहरणम् । यस्य हिमाद्रेः सानौ शिखरे तत्प्रसिद्धं धूर्जटिकिरी-
टिनोः धुरि अग्रे जटा यस्य धूर्जटिः शिवः । पृषोदरादित्वात्साधुः ।
स च प्रशस्तं किरीटमिन्द्रदत्तमस्यास्तीति किरीटी धनंजयः स च
तयोर्युद्धमभूत् । अत्र श्लाघ्यचरितं हिमाचलश्लाघ्यताबोधकमिति
विलोमक्रमेणोदाहरणम् ॥ १६२ ॥

ऋद्धिर्यथा—

रत्नस्तम्भेषु संक्रान्तैः प्रतिबिम्बशतैर्वृतः ।
ज्ञातो लङ्केश्वरः कृच्छ्रादाञ्जनेयेन तत्त्वतः ॥ १६३॥

रत्नस्तम्भेष्विति ॥ रत्नस्तम्भेषु रत्नमयस्तम्भेषु संक्रान्तैः प्रविष्टैः
प्रतिबिम्बानां शतैः समूहैः । बहुभिः प्रतिबिम्बैरित्यर्थः । संग्रहानुप-
योगा[illegible] [illegible] पर्यवसान[illegible] । [illegible] [illegible] [illegible] स-

द्गमिति वहोः' इति । वृतः परिवारितो लंकेश्वरो रावणः आञ्जनेयेन अञ्जनाया अपत्येन हनुमता तत्त्वतः परमार्थतः कृच्छ्रात् ज्ञातः । ल्यब्लोपे पञ्चमी । कृच्छ्रं प्राप्य ज्ञात इत्यर्थः । अत्र श्लाघ्या संपत्तिः पौलस्त्यस्य महत्त्वं सूचयति । अत्र संबन्धातिशयोक्तिरप्यस्तीत्याहुः ॥१६३॥

अत्युक्त्यलंकारः ।

अत्युक्तिरद्भुतातथ्यशौर्यौदार्यादिवर्णनम् ।
त्वयि दातरि राजेन्द्र याचकाः कल्पशाखिनः १६४

अत्युक्तिरिति ॥ अद्भुतं आश्चर्यभूतं अतथ्यं मिथ्याभूतं यच्छौर्यौदार्यादिवर्णनं तदत्युक्तिः । उदाहरणम् । हे राजेन्द्र, त्वयि दातरि सति याचकाः कल्पशाखिनो भवन्ति । अत्र दातुः कल्पशाखितुल्यत्वेनाश्चर्यं याचकानां तु तथात्वे चित्रमेवेत्यत्युक्तिः । संबन्धातिशयोक्तेरतथ्यत्वमात्रं विशेषः । अतथ्यस्याप्यभिधानमद्भुतत्वेन चमत्कारकारि । केचित्तु कल्पशाखिनोऽपि याचका भवन्तीत्यन्वयं मन्यन्ते । कल्पद्रुमाणामपि याचकत्वे कैमुतिकन्यायेन सर्वेषां याचकत्वमर्थसिद्धमिति दानात्युक्तिः ॥ १६४ ॥

निरुक्त्यलंकारः ।

निरुक्तिर्योगतो नाम्नामन्यार्थत्वप्रकल्पनम् ।
ईदृशैश्चरितैर्जाने सत्यं दोषाकरो भवान् ॥ १६५ ॥

निरुक्तिरिति ॥ नाम्नामभिधानानां योगतो व्युत्पत्त्या अन्यार्थत्वप्रकल्पनं भिन्नार्थपरतया योजनं निरुक्तिः । निश्चितोक्तिः निरुक्तिरिति व्युत्पत्तिः । उदाहरणम् । हे चन्द्र, ईदृशैरीदृग्विधैश्चरितैः भवान् दोषाकर इति सत्यं जाने । अत्र दोषेति रात्रिवाचकमव्ययम् । दोषां करोतीति दोषाकर इति प्रसिद्धोऽर्थः । दोषाणामाकर इति तु नाम्नः कल्पितोऽर्थ इति लक्षणानुगमः ॥ १६५ ॥

प्रतिषेधालंकारः ।

प्रतिषेधः प्रसिद्धस्य निषेधस्यानुकीर्तनम् ।
न द्यूतमेतत्कितव क्रीडनं निशितैः शरैः ॥ १६६ ॥

प्रतिषेध इति ॥ प्रसिद्धस्य [illegible] निषेधस्यानुकीर्तनं प्रतिषेधः । [illegible] उदाहरणम् । हे कितव हे द्यूतकार हे शकुने, एतद् द्यूतं न । [illegible] क्रीडनं नेदम् । अत्र युद्धस्य

लक्ष्मीविलासाः संपत्प्रसारा एव । अत्र कटाक्षाणां हेतूनां विलासानां हेतुमतां चाभिन्ननिर्देशेन लक्षणसंगतिः । अभेदोक्तिश्च कार्यशैघ्र्यप्रत्यायनाय । न चायं रूपकेऽन्तर्भवति, तयोऽपि विच्छित्तिविशेषसद्भावात् । नाप्यतिशयोक्तौ, तद्भेदेभ्यो वैलक्षण्यसंभवात् । नापि परिणामे, क्रियाया अतिचन्धनादित्यलमतिविस्तरेण ॥ १६९ ॥

इत्थं शतमलंकारा लक्षयित्वा निदर्शिताः ।
प्राचामाधुनिकानां च मतान्यालोच्य सर्वशः॥१७०॥

इत्थमिति ॥ प्रकर्षेण कालाधिक्येनाञ्चन्ति गच्छन्तिरमेति प्राञ्चः पूर्वकालवर्तिनस्तेषाम् । पुरातनानामित्यर्थः । आधुनिकानां अधुना भवानां पण्डितानां च सर्वशः सर्वाणि मतान्यालोच्य शतं शतसंख्याका अलंकारा इत्थमनेन प्रकारेण लक्षयित्वा निरूप्य निदर्शिता । उदाहृता इत्यर्थः । नन्वेतावतः प्रयत्नस्य फलमनुद्दिश्य प्रवर्तितं कथं घटते इति चेत्सत्यम् । 'एकः शब्दः सम्यक् ज्ञातः सुप्रयुक्तः स्वर्गलोके कामधुग्भवति' इति भाष्यकारोक्तं शब्दप्रयोगस्य पारलौकिक फलमस्त्येव । किंच 'काव्यं यशसेऽर्थकृते' इत्यादि प्रामाणिकपण्डितोक्तं राजप्रसादादिकमैहिकमप्यस्ति । एवं श्रूयते–अप्पय्यदीक्षितो नाम द्राविड पण्डितो रङ्गराजसूनु । स पितुराज्ञया वेङ्कटाद्रिराजमुपजगाम । स च राज्ञाऽभ्यर्थितश्चन्द्रालोकं नाम ग्रन्थं चकार । राज्ञा यशोमदन दत्त्वा प्रहितोऽलंकारविवेचनाय प्रार्थितश्चेमा कारिका कुवलयानन्दं च कृत्वा वेङ्कटेश प्रसादयामासेति ।

शरणी करगुरुचरणाभरणीकरणात्कुवलयानन्दे ।
कृतिनि ... मानवत्मा इति सर्वार्थनु प्रयत्नोऽयम ॥ १७० ॥

अथेतरसमानेनालंकारान्तरकथनायालंकारानाह । यद्यपि तेषां लक्ष्यलक्षणयोरपि वचनान्तरमस्ति तथापि शास्त्रान्तरसाकाङ्क्षत्वेन बालैर्दुर्बोधत्वादुद्देशमात्रेणाभिधान युक्तम । तथाहि –

चत्वारो रसवत् प्रेय ऊर्जस्वी च समाहितम् । .
भावस्य चोदयः संधिः शबलत्वमिति त्रयः ॥१७१॥

चत्वार इति ॥ एवं क्रमादन्यानपि पञ्चदशालंकारान् सुधाः विदु । लक्षणया कथयन्नाह । ते च रसवत्, प्रेय, ऊर्जस्वी, समाहितानि चत्वार । किंच भावस्य उदय भावयोः संधिः भावानां शबलत्वं चेति त्रय प्रत्यक्षप्रमुखा प्रत्यक्षादय. ॥ १७१ ॥

अष्टौ प्रमाणालंकाराः प्रत्यक्षप्रमुखाः क्रमात् ।
एवं पञ्चदशाप्यन्यानलंकारान्विदुर्बुधाः ॥ १७२ ॥

इति श्रीमदद्वैतमतप्रतिष्ठापनधुरीणरङ्गराजाध्वरीन्द्र-
सूनोरप्पय्यदीक्षितस्य कृतौ कुवलयानन्दे
मूलकारिकाः समाप्ताः ॥

अष्टौ प्रमाणालंकाराः प्रमाणान्येवालंकारा इति ॥ १७२ ॥

इति श्रीपद्वाक्यप्रमाणपारावारीणपरमश्रीभट्टारकआशाधरभट्टविर-
चितायां कुवलयानन्दकारिकाव्याख्यायामलंकारदीपिका-
समाख्यायां प्रथमं लक्ष्यलक्षणप्रकरणं समाप्तम् ॥

उद्दिष्टालंकारप्रकरणम् २

एतेषां लक्षणं वक्ष्ये संक्षेपाल्लक्ष्यसंयुतम् ।
बालानामुपकाराय संसृष्टेः संकरस्य च ॥ १ ॥

एतेषामिति ॥ स्पष्टार्थः ॥ १ ॥

रसवदलंकारः ।

अन्याङ्गत्वे रसस्य स्याद्रसवन्नाम तद्यथा ।
अहो स्पृष्टशरीरार्धः शंभुर्देव्या वशीकृतः ॥ २ ॥

अन्येति ॥ रसस्य शृङ्गारादेः अन्याङ्गत्वेऽन्यस्य सजातीयस्य विजातीयस्य वा अङ्गत्वे उपकारकत्वे सति रसवत् रसोऽस्मिन्नस्तीति रसवत् नाम स्यात् । सामान्ये नपुंसकत्वम् । तद्यथा । यथाशब्दो निदर्शने । उदाहरणम् । अहो इत्याश्चर्ये । देव्या वशीकृतः शंभुः स्पृष्टशरीरार्धः स्पर्शसुखलोभात् संश्लिष्टशरीरार्धो जातः । शंभो-रप्येवं काममोहे तदन्येषां का गतिरित्याश्चर्यम् । अत्राद्भुतरसो मुख्यः शृङ्गारस्तु तस्याङ्गमिति रसवदलंकारः । रसस्वरूपमुक्तं काव्यप्रकाशे—'कारणान्यथ कार्याणि सहकारीणि यानि च । रत्यादेः स्थायिनो लोके तानि चेन्नाट्यकाव्ययोः ॥ १ ॥' विभावा अनुभावाश्च कथ्यन्ते व्यभिचारिणः । व्यक्तः स तैर्विभावाद्यैः स्थायि-भावो रसः स्मृतः ॥ २ ॥ स्थायिभावश्च नवविधः । स यथा—'रतिर्हासश्च शोकश्च क्रोधोत्साहौ भयं तथा । जुगुप्साविस्मयशमाः स्था-यिभावाः प्रकीर्तिताः ॥ ३ ॥' इति स्थायिभावश्च रसत्वं प्राप्य नवविधो

भवति । स यथा—'शृङ्गारहास्यकरुणरौद्रवीरभयानकाः । बीभत्साद्भुतशान्ताख्या नव नाट्ये रसाः स्मृताः' ॥ ४ ॥ इति । एषां लक्षणादिविस्तरस्तु रसविलासे द्रष्टव्यः ॥ २ ॥

प्रेयोऽलंकारः ।

भावस्य चापराङ्गत्वे प्रेयोऽलंकार ईरितः ।
धिक् तारुण्यमिदं यत्र प्रिया दैवेन दूरिता ॥ ३ ॥

भावस्येति ॥ भावस्य वक्ष्यमाणस्वरूपस्य अपराङ्गत्वे सजातीयस्य विजातीयस्य वोपसर्जनत्वे प्रेयोऽलंकारः । अतिशयेन प्रियमिति प्रेय इति व्युत्पत्तेः । ईरित उक्तः । उदाहरणम् । इदं मम तारुण्यं यौवनं धिक् । धिग्योगे द्वितीया । यत्र यस्मिन् प्रिया कान्ता दैवेन दुरदृष्टेन दूरिता दूरीकृता । अत्र निर्वेदाख्यो भावो विप्रलम्भशृङ्गारस्याङ्गमिति प्रेयोऽलंकारः । भावस्वरूपमुक्तं काव्यप्रकाशे—'रतिर्देवादिविषया व्यभिचारितयाञ्चितः । भावः प्रोक्तस्तदाभासास्त्वनौचित्यप्रवर्तिताः ॥ १ ॥' इति । व्यभिचारी च त्रयस्त्रिंशद्भेदः । स यथा—'निर्वेदग्लानिशङ्काख्यास्तथासूयामदश्रमाः ॥ आलस्यं चैव दैन्यं च चिन्ता मोहः स्मृतिर्धृतिः ॥ व्रीडा चपलता हर्ष आवेगो जडता तथा । गर्वो विषाद औत्सुक्यं निद्रापस्मार एव च । स्वप्नो विबोधोऽमर्षश्चाप्यवहित्थमथोग्रता । मतिर्व्याधिस्तथोन्मादस्तथा मरणमेव च ॥ त्रासश्चैव वितर्कश्च विज्ञेया व्यभिचारिणः । त्रयस्त्रिंशदमी भावाः समाख्यातास्तु नामतः ॥' इति । विस्तरस्तु काव्यप्रदीपे रसविलासे च द्रष्टव्य ॥ ३ ॥

ऊर्जस्व्यलंकारः ।

आभासस्याङ्गता यत्र तत्रोर्जस्वि मतं बुधैः ।
परदारस्तनस्पर्शी दिशः पश्यति कम्पितः ॥ ४ ॥

आभासस्येति ॥ आभासस्य भावाभासस्य रसाभासस्य वा यत्राङ्गता गौणता भवति बुधैस्तत्रोर्जस्वि मतम् । ऊर्जः शोभा पाटवमस्यास्तीत्यूर्जस्वीति निरुक्तिः । उदाहरणम् । परदारस्तनस्पर्शी कश्चन कामुकः कम्पितः संजातकम्पः सन् दिशः पश्यति । कश्चिन्मां पश्येदिति भयादिति भावः । अत्र शृङ्गाराभासो भयानकरसस्याङ्गमनौचित्येन प्रवृत्तः । आभासलक्षणं सूक्तं प्राक् ॥ ४ ॥

समाहितालंकारः ।

समाहितं तद्भावस्य शान्तिर्यत्र पराङ्गता ।
मुञ्चमाना स्वयं साभूत्तर्जिता घनगर्जितैः ॥ ५ ॥

समाहितमिति ॥ यत्र भावस्य शान्तेर्विरतेः पराङ्गता रसा-
द्यङ्गत्वं तत्समाहितं स्पष्टम् । उदाहरणम् । सा कान्ता घनगर्जितैस्त-
र्जिता भीषिता इवेति गम्योत्प्रेक्षा । सती स्वयं मुञ्चमाना स्वयमेव
त्यक्तामर्षा अभूत् । अमर्षकृतां वक्रतां हित्वा स्वयमेवाश्लिष्टवती-
त्यर्थः । अत्रामर्षाख्यभावस्य शान्तिः शृङ्गारस्याङ्गम् । अत्र प्रहर्षणा-
लंकारोऽप्यस्ति ॥ ५ ॥

भावोदयालंकारः ।

भावोत्पत्तेः पराङ्गत्वे भावोदय इति स्मृतः ।
सा प्रियं वीक्ष्य नम्रास्या नाशकद्वक्तुमीप्सितम् ॥ ६ ॥

भावेति ॥ भावोत्पत्तेः पराङ्गत्वे सति भावोदय इति प्रसिद्धो-
ऽलंकारः स्मृतः । बुधैर्गदित इत्यर्थः । उदाहरणम् । सा कान्ता प्रियं
वीक्ष्य नम्रास्या लज्जयाऽधोमुखी सती ईप्सितमर्थं वक्तुं नाशकत् ।
अत्र व्रीडाख्यभावस्योत्पत्तिः शृङ्गारस्याङ्गम् । नायिका तु लज्जा-
प्रधानत्वान्मुग्धा ॥ ६ ॥

भावसंध्यलंकारः ।

पराङ्गं भावयोर्योगो भावसंधिरलंकृतिः ।
यान्ती वेलां प्रतीक्षन्ती विलम्ब्य प्रियमाप सा ॥ ७ ॥

पराङ्गमिति ॥ पराङ्गं रसाद्यङ्गभूतो यो द्वयोर्भावयोर्योगः स
भावसंधिर्नामालंकृतिः स्पष्टम् ॥ उदाहरणम् । सा नायिका यान्ती
सती वेलां प्रतीक्षन्ती सती च विलम्ब्य प्रियं आप । अत्रौत्सुक्यस्य
शङ्कायाश्च संधिः शृङ्गारस्याङ्गम् । 'असारूढो हि नारीणामकालज्ञो
मनोभवः' इति न्यायादौत्सुक्येन यान्त्यपि वेलामन्तरेण केलिगृहे
प्रियसमागमो न स्यादिति मत्वा विलम्ब्य यातेति भावः ॥ ७ ॥

भावशबलालंकारः ।

तद्भावशबलत्वं स्याद्बहूनां चेत्पराङ्गता ।
धिङ्मां भोगरतं सन्तः किं वक्ष्यन्ति त्यजामि तान् ८

तदिति ॥ चेद्यदि बहूनां भावानां पराङ्गता स्यात्तर्हि भावशब-

त्वं नामालंकारः । 'चित्रं किर्मीरकल्माषशबलैताश्च कर्बुरे' इत्यमरः। उदाहरणम् । भोगस्तं विषयामर्कं मां धिक् । धिगिति निन्दायां तद्योगे द्वितीया । निन्द्योऽहमस्मीत्यर्थः । यतः किं वदन्ति मद्-सदृशैति न वेत्सीत्यर्थः । तस्माद्दूरात् तान् भोगान् त्यजामि । अत्र विरक्तस्य निर्वेदशङ्कामनीनां शान्तरसस्याङ्गत्वम् ॥ ८ ॥

प्रत्यक्षालङ्कारः ।

प्रत्यक्षमिन्द्रियज्ञानवर्णनं षड्विधं तु तत् ।
श्रुत्वा स्पृष्ट्वा च दृष्ट्वा च रसित्वाघ्राय यां जनः ।
मोदते घृतपक्वां तां शष्कुलीमर्पयामि ते ॥ ९ ॥

प्रत्यक्षमिति ॥ इन्द्रियज्ञानवर्णनं इन्द्रियजन्यज्ञानस्य वर्णनं प्रत्यक्षम् । अक्ष्णः समीपे प्रत्यक्षमिति सामीप्यार्थेऽव्ययीभावः । अक्षाणां समीपे इति वा । तच्च षड्विधम् । श्रोत्रत्वक्चक्षूरसनघ्राणमनसां भेदात् । उदाहरणम् । जनः या पचनकाले शब्दायमानां श्रोत्रेण श्रुत्वा ततः त्वचा स्पृष्ट्वा चक्षुषा दृष्ट्वा रसनेन रसित्वा नासया घ्रात्वा मनसा मोदते सुखितोऽस्मीति वेत्ति । हे देव, घृतपक्वां तां शष्कुलीं प्रसिद्धां ते तुभ्यं अर्पयामि । अनुक्रमेण षड्विधस्यापीन्द्रियज्ञानस्य वर्णनमिति प्रत्यक्षालङ्कारः ॥ षट्पदी गाथेयम् ॥ ९॥

प्रतीत्यलङ्कारः ।

प्रतीतिर्लिङ्गिनो लिङ्गादनुमानमदूषितात् ।
निःश्वासात्सोष्मणो ज्ञातं हृदि कामाग्निरस्ति ते ॥ १०

प्रतीतिरिति ॥ अदूषितात् व्यभिचारादिदोषरहितात् लिङ्गादसाधारणचिह्नात् लिङ्गिनो लिङ्गवतोऽर्थस्य प्रतीतिरनुमानं स्वरूपम् । उदाहरणम् । हे सखे, ते तव हृदि कामाग्निरस्तीति सोष्मणो धर्मसहितान्नि श्वासाद्धेतोर्ज्ञातम् । अत्र कामाग्निर्लिङ्गि सव्याप्तोष्णनिःश्वासरूपलिङ्गात् प्रतीतिरूपत्वादनुमानम् । न चात्र लिङ्गं दोषवदिति शङ्क्यम् । विलक्षणस्य लिङ्गिनो विलक्षणलिङ्गौचित्यात् । यथा तमतोयस्ववह्नेरुष्मण इति दिक् । एतत्रय स्वस्तु न्यायशास्त्रे द्रष्टव्य ॥१०॥

उपमानालङ्कार ।

सादृश्याद्वस्तुनो भानमुपमानं प्रकीर्तितम् ।
हिङ्गुलं पद्मरागाभं तद्वर्णा हिङ्गुलाम्बिका ॥ ११ ॥

साद्दश्यादिति ॥ सादृश्याद्वर्ण्यमानाद्वस्तुनः प्रकृतस्य इदमेव तत्सदृशमिति भानं प्रतीतिरुपमानं प्रकीर्तितं स्पष्टम् । उदाहरणम् । पद्मरागाभं पद्मस्य कोकनदस्य राग इव रागो यस्येति पद्मरागो माणिक्यं तस्याभा इव आभा यस्येति तथोक्तं रक्तवर्णं द्रव्यं हिङ्गुलसंज्ञं तद्वर्णा तत्तुल्यवर्णा अम्बिका देवी हिङ्गुलेत्युक्ता । अत्रोपमानप्रत्यक्षयोः संसृष्टिः । हिङ्गुलवर्णभूविकारस्तं पद्मपुराणस्थे आकाशखण्डे द्रष्टव्यम् ॥ ११ ॥

शब्दालंकारः ।

श्रुत्यादिवाक्यविन्यासात्प्रतिश्रयः शब्द उच्यते ।
साम्बशंभुः परं ब्रह्म कैवल्योपनिषच्छ्रुतेः ॥ १२ ॥

श्रुत्यादीति ॥ श्रुत्यादिवाक्यविन्यासाद्वेदादिवचनोपन्यासात्प्रतिश्रयः शब्दः शब्दाख्यप्रमाणमुखत्वेन स्पष्टम् । उदाहरणम् । साम्बशंभुः अम्बया सहितः शिव एव कैवल्योपनिषच्छ्रुतेः तद्वाक्यश्रवणात्परं निर्गुणं ब्रह्मेति जानामि ॥ १२ ॥

ऐतिह्यालंकारः ।

ऐतिह्यं किंवदन्ती चेत्प्रमाणत्वेन भण्यते ।
तिलमात्रमिदं लिङ्गं वर्षवर्धं विदुर्जनाः ॥ १३ ॥

ऐतिह्यमिति ॥ यदि किंवदन्ती जनवार्ता । 'किंवदन्ती जनश्रुतिः' इत्यमरः । प्रमाणत्वेन भण्यते तर्हि ऐतिह्यं इतिह प्रसिद्धं एव ऐतिह्यमिति व्युत्पत्तेः ॥ उदाहरणम् । इदं पूर्ववर्ति शिवस्य लिङ्गं तिलमात्रं वर्षवर्धं वर्षे वर्धते तथाभूतं जनाः विदुः । कथयन्तीत्यर्थः । अत्र शिवलिङ्गस्य वर्षे वर्षे तिलमात्रवृद्धौ जनवार्ता प्रमाणमिति ऐतिह्यम् ॥ १३ ॥

अर्थापत्त्यलंकारः ।

कल्पनं चान्यथासिद्धार्थस्यार्थापत्तिरिष्यते ।
गङ्गा पतिव्रता साक्षादन्यथाग्निं विशेत्कथम् ॥१४॥

कल्पनमिति ॥ अन्यथासिद्धा प्रकारान्तरेण सिद्धा अर्थस्य कल्पनमर्थापत्तिः इष्यते । उदाहरणम् । पतिव्रता साक्षात् गङ्गा । अन्यथाग्निं कथं विशेत् । गङ्गात्वे तु वह्निप्रवेशो न दुर्घट इति भावः ॥ १४ ॥

त्वं नामालंकारः । 'चित्रं किर्मीरकल्माषशबलैताश्च कर्बुरे' इत्यमरः। उदाहरणम् । भोगरतं विषयासक्तं मां धिक् । धिगिति निन्दायां तद्योगे द्वितीया । निन्द्योऽहमस्मीत्यर्थः । सन्तः किं वक्ष्यन्ति सदुद्धेति न वेद्मीत्यर्थः । तस्माद्दुष्टान् तान् भोगान् त्यजामि । अत्र विरक्तवाक्ये निर्वेदशङ्कामतीनां शान्तरसस्याङ्गत्वम् ॥ ८ ॥

प्रत्यक्षालंकारः ।

प्रत्यक्षमिन्द्रियज्ञानवर्णनं षड्विधं तु तत् ।
श्रुत्वा स्पृष्ट्वा च दृष्ट्वा च रसित्वाघ्राय यां जनः ।
मोदते घृतपक्कां तां शष्कुलीमर्पयामि ते ॥ ९ ॥

प्रत्यक्षमिति ॥ इन्द्रियज्ञानवर्णनं इन्द्रियजन्यज्ञानस्य वर्णनं प्रत्यक्षम् । अक्ष्णः समीपे प्रत्यक्षमिति सामीप्यार्थेऽव्ययीभावः । अक्षाणां समीपे इति वा । तच्च षड्विधम् । श्रौत्रत्वाचचाक्षुषरासनघ्राणजमानसभेदात् । उदाहरणम् । जनः यां पचनकाले शब्दायमानां श्रोत्रेण श्रुत्वा ततः त्वचा स्पृष्ट्वा चक्षुषा दृष्ट्वा रसनेन रसित्वा नासया चाघ्राय मनसा मोदते सुखितोऽस्मीति वेत्ति । हे देव, घृतपक्कां तां शष्कुलीं प्रसिद्धां ते तुभ्यं अर्पयामि । अनुक्रमेण षड्विधस्यापीन्द्रियज्ञानस्य वर्णनमिति प्रत्यक्षालंकारः ॥ षट्पदी गाथेयम् ॥ ९ ॥

प्रतीत्यलंकारः ।

प्रतीतिर्लिङ्गिनो लिङ्गादनुमानमदूषितात् ।
निःश्वासात्सोष्मणो ज्ञातं हृदि कामाग्निरस्ति ते ॥ १०

प्रतीतिरिति ॥ अदूषितात् व्यभिचारादिदोषरहितात् लिङ्गाद्दसाधारणचिह्नात् लिङ्गिनो लिङ्गवतोऽर्थस्य प्रतीतिरनुमानं स्पष्टम् । उदाहरणम । हे सखे, ते तव हृदि कामाग्निरस्तीति सोष्मणो घर्मसहितात् निःश्वासाद्धेतोर्ज्ञातम । अत्र कामाग्निलिङ्गिनः सघर्मनिःश्वासरूपलिङ्गात् प्रतीतिरूपमनुमानम । न चात्र लिङ्गं दोषवदिति शङ्क्यम । विलक्षणस्य लिङ्गिनो विलक्षणलिङ्गौचित्यात् । यथा तप्ततोयस्य वह्निरूष्मण इति दिक् । एतत्स्वरूपं तु न्यायशास्त्रे द्रष्टव्यः ॥ १० ॥

उपमानालंकारः ।

सादृश्याद्वस्तुनो भानमुपमानं प्रकीर्तितम् ।
हिङ्गुलं पद्मरागाभं तद्वर्णा हिङ्गुलाम्बिका ॥ ११ ॥

शाब्दादिति ॥ शाब्दस्याप्रत्यक्षमानात्प्रत्युत प्रत्यक्षस्य इद्येव समानवर्तिति भावं प्रतीतिरूपत्वात् प्रत्यक्षमिदं स्पष्टम् । उदाहरणम् । पद्मरागाभे पद्मस्य कोरकस्य राग इव रागो वर्तते पद्मरागो माणिक्यं तस्याभा इव आभा वर्तते तयोः यत्र इदं हिङ्गुल-संज्ञं वहन्ती तनुरक्तता अभिनवा देवी हिङ्गुलप्रभा । अत्रोपमान-प्रमाणभावासंसृष्टिः । हिङ्गुलवर्णपृथिवीकारणं पद्मपुराणे आकाश-खण्डे द्रष्टव्यम् ॥ ११ ॥

शब्दप्रमाणम् ।

श्रुत्यादिपादपर्यन्तमप्रमाणविषयः शब्द उच्यते ।
सांख्यशंभुः परं ब्रह्म कैवल्योपनिषच्छ्रुतेः ॥ १२ ॥

श्रुत्यादीति ॥ श्रुत्यादिपादपर्यन्तप्रमाणविषयकोपन्यासाभि-धायः शब्दः शब्दप्रमाणमुच्यते स्पष्टम् । उदाहरणम् । साम्ब-शंभुः अम्बया सहितः शिव एव कैवल्योपनिषच्छ्रुतेः तद्वाक्यश्रव-णात्परं निर्गुणं ब्रह्मेति जानामि ॥ १२ ॥

अर्थापत्तिः ।

एतिद्य किंवदन्ती चेत्प्रमाणत्वेन भण्यते ।
लिङ्गमात्रमिदं लिङ्गं यथार्थं विभुजैर्नाः ॥ १३ ॥

एतिह्यमिति ॥ [illegible] किंवदन्ती [illegible] । किंवदन्ती [illegible] इति प्रसिद्ध [illegible] लिङ्गस्य लिङ्ग लिङ्गमात्र [illegible] । [illegible] । अत्र [illegible] जनवाता प्रमाणमिति [illegible] ॥ १३ ॥

अर्थापत्तिः ।

कल्पनं चान्यथासिद्धावर्थस्यार्थापत्तिरिष्यते ।
गङ्गा पतिव्रता साक्षादन्यथापि विशेषकम् ॥१४॥

कल्पनमिति ॥ अन्यथासिद्धाः प्रकारान्तरेण सिद्धाः अर्थस्य कल्पनमर्थापत्तिरिष्यते । उदाहरणम् । पतिव्रता साक्षात् गङ्गा । अन्यथापि [illegible] विशेष । गङ्गात्वे तु यदि प्रवेशो न दुर्घट इति भाव ॥ १४ ॥

अलंक्रियालंकारः ।

प्रमाणत्वेन निर्दिष्टानुपलब्धिरलंक्रिया ।
अयशस्तव नास्तीति सत्यं यन्न श्रुतं क्वचित् ॥ १५॥

प्रमाणत्वेनेति ॥ प्रमाणत्वेन प्रमाणकरणत्वेन निर्दिष्टा निर्दर्शिता अनुपलब्धिरप्राप्तिः । अत्यन्ताभाव इति यावत् । अलंक्रियालंकारो भवति । उदाहरणम् । हे राजन्, तवाऽयशो नास्तीति लोकवचः सत्यं यथार्थमेव । यद्यस्मात्कचिदपि न श्रुतमस्माभिरिति शेषः । अस्ति चेदयशः श्रूयेत इति भावः । अत्रायशसोऽभावं प्रति श्रवणाभावः प्रमाणत्वेन दर्शित इत्यनुपलब्धिः । अभावाख्यमेतत्प्रमाणमभावमाहकमिति वेदान्तिनः ॥ १५ ॥

संभवालंकारः ।

संभवः स्यादलंकारः प्रमाणत्वं प्रयाति यः ।
स्यान्मे कदाचिदिन्द्रत्वं चित्रा कर्मगतिर्यतः ॥ १६॥
श्रुतिलिङ्गादयः शब्दाः प्रपञ्च्यन्तेऽपि दर्शिताः ।
भेदाः कुवलयानन्दे संक्षेपात्तानपि ब्रुवे ॥ १७ ॥

संभव इति ॥ यः संभवः प्रमाणत्वं प्रकृतार्थनिर्णायकत्वं प्रयाति स संभवो नामालंकारः स्यात् । उदाहरणम् । मे मम कदाचिदिन्द्रत्वं स्यात् भवेत् । संभावनायां लिङ् । यतः कर्मगतिः कर्मफलप्राप्तिः चित्रा नानाविधा । ततः कस्यचित्कर्मणः फलमिन्द्रत्वमपि भवत्येवेति भाव । अत्र चत्वारि प्रमाणानि काणादादीनां । षट् वेदान्तिनां अष्टौ मीमांसकानामालंकारिकाणां चेति प्रसिद्धः पन्थाः ॥ १६ ॥ १७ ॥

श्रुत्यलंकारः ।

प्रकृतार्थस्य शब्देन निर्वाहो यत्र सा श्रुतिः ।
मृत्युं हरसि भक्तानां तुष्टो मृत्युंजयोऽसि यत् ॥१८

प्रकृतार्थस्येति ॥ यत्र प्रकृतार्थस्य शब्देन प्रमाणभूतेन निर्वाहः समर्थनं सा श्रुतिः । उदाहरणम् । हे देव, त्वं तुष्टः सन् भक्तानां मृत्युं हरसि । मोक्षं ददासीत्यर्थः । अत्र प्रमाणं दर्शयति । यद्यस्मान्मृत्युंजयोऽसि । प्रमाणभूतमृत्युंजयशब्दवाच्योऽसीत्यर्थः । मृत्युहरणसामर्थ्यं विना मृत्युंजयशब्दवाच्यत्वं न स्यादिति प्रकृतार्थसमर्थनम् ॥ १८ ॥

लिङ्गालंकारलक्षणम् ।

तल्लिङ्गं नाम यत्र स्याद्वर्ण्यचिह्ने प्रमाणता ।
त्रिलोक्याः शंकरः साक्षी त्रिभिर्नेत्रैः प्रतीयते ॥१९॥

तदिति ॥ यत्र वर्ण्यचिह्ने वर्ण्यस्य शिवादेः चिह्ने त्रिनेत्रत्वादौ प्रमाणता प्रमाणत्वेन प्रकृतोपयोगित्वं स्यात् तल्लिङ्गं नामालंकारः स्यात् । उदाहरणम् । शंकरः त्रिलोक्याः साक्षी । 'साक्षाद्द्रष्टरि संज्ञायाम्' इति निपातनात्साधुः । त्रिभिर्नेत्रैः प्रतीयते ज्ञायते त्रिलोकी । नित्यसाक्षात्कारार्थमेव त्रिलोचनत्वमिति भावः । अत्र लिङ्गशब्दस्य चिह्नपरत्वात् अनुमानालंकारे नातिव्याप्तिः । वाक्यप्रमाणं तु दिङ्मात्रमुदाहृतं तस्य चान्येऽपि श्रौतस्मार्तपौराणिकत्वादयो भेदाः स्वयमूह्याः । प्रकरणस्थानसमाख्यानां त्रयाणां मीमांसकोक्तप्रमाणानामलंकारत्वं नास्ति । कुवलयानन्देऽनुदाहृतत्वात् ॥ १९ ॥

आचारालंकारः ।

प्रकृतार्थोपयोगित्वं यत्राचारस्य तत्र सः ।
गोपस्यापि दधि ग्राह्यं काश्यां भक्षन्ति सूरयः ॥२०॥

प्रकृतेति ॥ यत्राचारस्य शिष्टाचारस्य प्रकृतोपयोगित्वं वर्ण्यसमर्थकत्वं तत्र स आचारो नामालंकारः । उदाहरणम् । गोपस्य नीचजातेरपि दधि काश्यां ग्राह्यमेवान्यत्र तु नेत्यर्थः । यतस्तत्र सूरयः पण्डिता अपि तद्भक्षन्ति तस्मात् 'यद्यदाचरति श्रेष्ठ' इति न्यायेन सर्वेषामपि तद्भक्षणे दोषो नास्तीति भावः । अयं च देशग्रामकुलाचारादिभेदादनेकविधः ॥ २० ॥

आत्मतुष्ट्यलंकारः ।

आत्मतुष्टिरलंकारो यत्र स्यान्निर्णयस्तया ।
अष्टमे मासि सीमन्तो युक्तो मह्यं हि रोचते ॥२१॥

इति श्रीपद्यावाक्यप्रमाणपारावारीणरामजीभट्टात्मजाशाधरभट्टकृतसमुद्दिष्टनामकं द्वितीयं प्रकरणं समाप्तम् ॥

आत्मेति ॥ तदात्मतुष्टिनाम प्रमाणालंकारः । यत्र तयात्मतुष्ट्या निर्णयो निश्चयः स्यात् । उदाहरणम् । अष्टमे मासि सीमन्तोन्नयनाख्यं कर्म ननु षष्ठे मासीत्यर्थः । तत्र प्रमाणं दर्शयति । हि यस्मान्मह्यं रोचते । 'रुच्यर्थानां प्रीयमाणः' इति संप्रदानत्वाच्चतुर्थी । अत्र पण्डितानामेवात्मतुष्टिः प्रमाणं न तु सर्वेषाम् । तथाहि ।

'षष्ठेऽष्टमे वा सीमन्तः' इति याज्ञवल्क्यस्मृतौ विकल्पे सत्यपि तदुत्तरं नियमानां सुकरत्वान् द्वितीयः पक्षो युक्तः श्राघ्य इति प्रथमपक्षस्वीकारे तु नियमा दुर्घटा इति । एवं 'गर्भाष्टमेऽष्टमे वाऽब्दे ब्राह्मणस्योपनायनम्' इत्यादावपि ज्ञेयम् ॥ २१ ॥

एते प्रमाणालंकाराः प्रकृतार्थसमर्थनात् ।
काव्यलिङ्गप्रपञ्चत्वमुपयान्त्येव वस्तुतः ॥ १ ॥
धरणीधरपादाब्जप्रसादासादितस्मृतेः ।
आशाधरस्य वागेषा तनोतु विदुषां मुदम् ॥ २ ॥

इति श्रीपदवाक्यप्रमाणपारावारीणरामजीभट्टात्मजाशाधरभट्टविरचितायां कुवलयानन्दकारिकाव्याख्यायामलंकारदीपिकासमाख्यायां उद्दिष्टालंकारनामकं द्वितीयं प्रकरणं समाप्तम् ॥२॥

परिशेषप्रकरणम् ३

अथ मुक्ताप्रवालादिमिश्रहारादिसंनिभान् ।
अनुक्तान्पञ्च संक्षेपात्संसृष्ट्यादीन्ब्रवीम्यहम् ॥ १ ॥

अथेति ॥ स्पष्टम् ॥ १ ॥

संसृष्टिरलंकारः ।

संसृष्टिर्मिश्रतैतेषां तिलतण्डुलवत्तु या ।
लिम्पतीव तमोऽङ्गानि वर्षतीवाञ्जनं नभः ॥ २ ॥

संसृष्टिरिति ॥ एतेषामलंकाराणां तिलतण्डुलवत् तिलतण्डुलयोरिव । 'तत्र तस्येव' इति वतिप्रत्ययः । तण्डुलशब्दस्य 'वृफणिहनिशादिभ्यश्च उलच् तण्डश्च' इत्युणादिसूत्रेण सिद्धो डुकारमध्य इत्याहुः । या मिश्रिता सा संसृष्टिः । तिलतण्डुलदृष्टान्तेन परस्परनिरपेक्षत्वं प्रोक्तम् । उदाहरणम् । लिम्पतीवेत्यादि । अत्रोत्प्रेक्षाद्वयं परस्परनिरपेक्षं स्पष्टम् ॥ २ ॥

अङ्गाङ्गीभावसंकरः ।

उत्थाप्योत्थापकत्वे स्यादङ्गाङ्गीभावसंकरः ।
शङ्खाद्वीणानिनादोऽयमुदेति महदद्भुतम् ॥ ३ ॥

उत्थाप्येति ॥ उत्थाप्योत्थापकत्वे उपकार्योपकारकभावे सा-

काङ्क्षत्वे सतीत्यर्थः । अङ्गाङ्गीभावसंकरः । अङ्गं उत्थापकं करचरणादिवत् । अङ्गी तूत्थाप्यः । च्विप्रत्ययाभावे तु अङ्गाङ्गिनोर्भाव इति षष्ठीसमासः । तत्र दीर्घाभावेन छन्दोभङ्गभयात् च्विप्रत्ययान्तपक्षः साधुः । तयोर्भावशब्दे परे च्विप्रत्ययान्तत्वं बोध्यम् । स चासौ संकरश्चेति कर्मधारयः । उदाहरणम् । शन्नादित्यादि । अत्र रूपकातिशयोक्तेरुत्थापकत्वं विभावनायाश्चोत्थाप्यत्वमिति परस्पराकाङ्क्षकम् ॥ ३ ॥

समप्राधान्यसंकरः ।

द्वयोरपि प्रधानत्वे समप्राधान्यसंकरः ।
रत्नस्तम्भेषु संक्रान्तप्रतिबिम्बशतैर्वृतः ॥ ४ ॥

द्वयोरिति ॥ द्वयोरप्यलंकारयोः प्रधानत्वे परस्परोपकारकत्वेन तुल्यत्वे समप्राधान्यसंकरो भवति । अङ्गाङ्गीभावव्यत्ययादिति भावः । उदाहरणम् । रत्नस्तम्भेष्वित्यादिना । अत्रोदात्तस्यातिशयोक्तेरङ्गत्वं तस्याश्चोदात्तालंकारस्येति समप्राधान्यम् ॥ ४ ॥

संदेहसंकरः ।

द्वयोरन्यतरस्याभेदकः संदेहसंकरः ।
चतुर्णां पुरुषार्थानां दाता देवश्चतुर्भुजः ॥ ५ ॥

द्वयोरिति ॥ द्वयोरलंकारयोर्मध्ये अन्यतरस्य कस्यचिद्भेदकः नास्ति भेदक यस्मिन्स तथोक्तः संदेहसंकरः स्यात् । उदाहरणम् । चतुर्णामिति । अत्र चतुर्भुजस्य देवविशेषणत्वे परिकरालंकारः । सामान्यविशेषभावसंबन्धेनोभयोरपि भेदाद्विशेष्यत्वविवक्षायां तु दार्भेति विशेषणान्वयानुरोधात्परिकराङ्कुर इति भेदकाभावात्तयोरेकतरस्यानिश्चयः । आत्मतुष्टिप्रामाण्येन परिकरोदाहरणं कृतमिति बोध्यम् ॥ ५ ॥

वाचकानुप्रवेशसंकरः ।

एकवाचकानुप्रवेशे संकरः स्यात्तथाविधः ।
तदेतत्काकतालीयमवितर्कितसंभवम् ॥ ६ ॥

एकेति ॥ द्वयोरलंकारयोरेकवाचकानुप्रवेशे सामानाधिकरण्येनावस्थाने तथाविधवाचकानुप्रवेशनामालंकारः । एकशब्दानुप्रवेश इति पाठान्तरकल्पनेनाक्षराधिक्यं परिहरणीयम् । उदाहरणम् ।

अत्रैकस्मिन् काकतालीये शब्दे उपमाद्वयं प्रविष्टं संसृष्टेस्त्वेकवाक्यसमानाधिकरणेऽप्येकशब्दमात्रसामानाधिकरण्यं नास्ति त[...]विशेषः ॥ ६ ॥

विचित्रसंकरः ।

एषां परस्परं योगे विचित्रः संकरो भवेत् ।
गुरुर्वचस्यर्जुनोऽयं कीर्तौ भीष्मः शरासने ॥ ७ ॥

एषामिति ॥ एषां संसृष्ट्यादीनां परस्परं योगे सामानाधिकरण्ये सति विचित्रो विचित्रनामा नानाविधत्वात्संकरो भवेत् । उदाहरणम् । गुरुरिति । अत्रोल्लेखालंकारस्य मालारूपकेण सह समप्राधान्यसंकरः । तथापि श्लेषरूपकयोरङ्गाङ्गिभावसंकरः । एवमन्यत्रापि सुधीभिरुदाहार्यम् ॥ ७ ॥

एषां दोषा गतार्थत्वादर्थदोषतया पुनः ।
नोक्ताः कुवलयानन्दे शब्दानां चाप्यलंक्रियाः ॥८॥

इति श्रीपदवाक्यप्रमाणपारावारीणरामजीभट्टात्मजाशाधरभट्टविरचितं तृतीयं परिशेषप्रकरणं समाप्तम् ॥ ३ ॥

एषामिति ॥ एषामलंकाराणां दोषाः काव्यप्रकाशादावुदाहृताः पुनस्तु शब्दार्थे । अर्थदोषतया अर्थाश्रयत्वेनेत्यर्थः । गतार्थत्वात् गतप्रयोजनत्वात् । अर्थदोषाणां हि काव्यनिरूपणे वक्तुमुचितत्वात् अलंकारप्रकरणे तदभिधानापेक्षाभावादित्यर्थः । कुवलयानन्दे नोक्ताः । किंच । शब्दानामप्यलंक्रिया यमकादयो नोक्ताः । तेषां केवलमध्यमकाव्यविषयत्वादिति भावः । न चालंकारेषु चालानामिति प्रतिज्ञाभङ्ग शङ्क्य । तत्रालंकारशब्दस्योपमादिषु लाक्षणिकत्वात् ॥ ८ ॥

आशाधरकवेर्वाच वाचोयुक्तिविशारदाः ।
अनुगृह्णन्तु बालस्य काकली कस्य नो मुदे ॥ १ ॥

'काकली तु कले सूक्ष्मे ध्वनौ च मधुरास्फुटे' इति विश्वः ॥

इति श्रीपदवाक्यप्रमाणपारावारीणरामजीभट्टात्मजाशाधरभट्टकृतायां कुवलयानन्दकारिकाव्याख्यायां तृतीयं परिशेषप्रकरणं समाप्तम् ॥

अथ शब्दालंकारप्रकरणम् ४

अथ शब्दालंकारा निरूप्यन्ते ।

खड्गबन्धादयश्चित्रा गतप्रत्यागतादयः ।
पद्मबन्धादयश्चैव ज्ञेयाः श्लोका यथातथम् ॥ १ ॥

खड्गेति ॥ खड्गबन्धादयो गतप्रत्यागतादयः पद्मबन्धादयश्च श्लोकाः चित्राः चित्रालंकारा ज्ञेयाः । श्लोकचरणेषु क्रमव्युत्क्रमपाठाभ्यां गतप्रत्यागतः आदिशब्देन द्व्यक्षरकाव्यप्रभृतिश्च । यथा 'मानमा नवभा रामा साराभा घनमानमा ॥ याति चारुविभामाभा भामाभाविरुचा तया ॥ १ ॥ अत्र व्युत्क्रमपाठेन प्रथमचरणात् द्वितीयचरणं तृतीयचरणाच्चतुर्थचरणं इति गतप्रत्यागतेन चित्रालंकारः। श्लोकार्थस्तु नगहीन्द्रवंशीला रामा ईदृशी नवयौवना अभिमानिनी नवभा नवदीप्तिः । सारेण कामेनाभातीति साराभा घनाय जलमादर्तु मानसं चित्तं यस्या इति घनमानसा । तथा चारुविभया उत्तमदीप्त्या मां लक्ष्मीवत् भातीति चारुविभामाभा । भामा मन्युः भामा यस्या भावोऽभिप्रायोऽस्यामस्तीति भामाभाविनी सा चासौ रुक् चेति तया । विशिष्टा विशेषणे चात्र तृतीया । अयं भावः । यस्यां रुचि सत्यभामाया अपि भावस्तिष्ठति ममापीदृशी रुक् स्यात् तादृश्या तया विशिष्टा ईदृशी या रामा सा अति अतिक्रम्य याति गच्छति ॥ १ ॥

अनुप्रासश्चतुर्विधः । स्फुटानुप्रासो लाटानुप्रासो वृत्त्यनुप्रासः छेकानुप्रासश्चेति । तत्राद्यः ।

पादादिषु पदावृत्त्या स्फुटो वर्णविभेदतः ।
योगी भोगीव संयाति पश्य त्वमुभयच्युतम् ॥ २ ॥

पादादिष्विति ॥ पादस्यादौ मध्ये अन्ते वा वर्णस्य पदमध्यस्थितो हल' स्वरस्य वा विभेदेन भिन्नत्वेन कृत्वा पदस्यावृत्त्या पुन पुनर्निरूपणात् स्फुटानुप्रासालंकार. । उदाहरणम् । हे मित्र, अयं योगी गृहाश्रमत्यागपूर्वं कृतयोगाभ्यासः पश्चाद्योगायुक्तो भोगीव भोगवान् गृहस्थ इव संयाति तमिममुभयलोकच्युतं त्वं पश्य । अत्र योगी भोगीति पूर्ववर्णविभेदेन पदावर्तनात्स्फुटानुप्रासः । यथा वा शिवस्तोत्रे 'जनः कश्चित्कामी तव चरणगामी

यदि सदा पदं ब्रह्मादीनामपि हरति दीनाहितमिव । महेश त्व[illegible]
यी यदि पुनरमायी तु पुरुषस्तदा किं निर्मायं नहि पदममायं
व्रजति सः ॥' अत्र प्रतिचरणमेव कामी गामी दीना दीना [illegible]
मायी मायं मायं इति पूर्ववर्णविभेदेन पदावर्तनात् भवति छे[illegible]
प्रासालंकारः । कचित्पदे पूर्ववर्णविभेदः कचिन्मध्यवर्णविभेदः [illegible]
चिदन्त्यवर्णविभेदः अन्यत् सममिति बोध्यम् ॥ २ ॥

अथ द्वितीयो लाटानुप्रासः —

> लाटानुप्रासभूर्भिन्नाभिप्राया पुनरुक्तता ।
> देवेशवेशवीक्षातो दुर्गामास्तोपमास्तयान् ॥ ३ ॥

लाटेति ॥ यदा शब्देषु पुनरुक्तता भिन्नाभिप्राया अर्थभेदे [illegible]
यर्चिता भवति तदा लाटानुप्रासः लाटानुप्रासालंकारः । उदाहर[illegible]
देवेश इन्द्रः तस्य वेशः शोभा पादयं तस्य वीक्षातः वीक्षणेन [illegible]
मसौ सुलेभ्योऽप्रतिजाता । स्वकीय हारं च दद्वानिति शेषः । [illegible]
देवेशपदे भिन्नाभिप्रायस्यार्थस्य पुनरुक्तया लाटानुप्रासः । यथा
[illegible] 'आलीभिर्मेलितीर्दत्ती प्रतिदिश दूरीकृताधि[illegible]
मां[illegible] पुनः पुनरुक्यायातेः समामेलिता । [illegible]
दिनप्रेमोत्कर प्रेयसी [illegible]
ति ॥' अत्र [illegible] भिन्नाभिप्रायस्यार्थभेदे निप[illegible]
नस्य [illegible] पुनरुक्तता भवति लाटानुप्रासालंकारः ॥ [illegible]

[illegible]

> आवृत्ति[illegible]नुप्रास[illegible]ः ।
> [illegible] ॥ ४ ॥

आवृत्तेति ॥ [illegible] पुनः पुनः [illegible] वर्णानाम[illegible]
[illegible]नुप्रासालंकारः । [illegible]
[illegible]
[illegible]
[illegible]
[illegible] । अत्र [illegible]
[illegible] । यथा
[illegible]

तविगलिते वासः करावर्षिणी । आयातं महिलाविलासनिपुणं प्रा-
णप्रियं कामिनी किंचिद्विहितमेत्य काञ्चनचलन्नेत्राञ्चलं पश्यति ॥'
अत्र लकारपकारयोरेकस्वरयोः भिन्नस्वरयोर्भिन्नयोरकारैर्वर्णयोर-
प्यनेकधा आवृत्तिमत्त्वाद्भवति वृत्त्यनुप्रासनामालंकारः ॥ ४ ॥

अथ चतुर्थश्छेकानुप्रासः—

सव्यञ्जनस्वरावृत्तौ छेकानुप्रास इष्यते ।
भव्ये गव्ये पाण्ड्यानां रुधिर्मण्डे व्यजायत ॥ ५ ॥

सव्यञ्जनेति ॥ सव्यञ्जनानां स्वराणामावृत्तौ सत्यां छेकानुप्रा-
सालंकारः । अयं भावः । यद्वृत्त्युक्तौ योऽभिहितः तद्वृत्त्युक्तस्य स-
म्यावृत्तिरिति । अत्र तु स्वरावृत्तिरावश्यकी व्यञ्जनावृत्तिरप्यावश्य-
कमिता । लाटानुप्रासे तु सव्यञ्जनस्वरव्यञ्जनानामावृत्तिः शब्दपुनरु-
क्तयोरुक्तत्वादिति भेदः । उदाहरणम् । भव्ये सुन्दरे गव्ये गोसंब-
न्धिनि मण्डे मस्तुनि तद्दर्शनादेव ब्राह्मणानां रुचिर्व्यजायत । पा-
ण्ड्यानां इति शेषः । अत्र भव्ये गव्ये इति सव्यञ्जनस्वरावृत्त्या छे-
कानुप्रासाख्योऽलंकारः । यथा हृदयकल्पलतायाम्—'पञ्चमीलास्य-
लीलाविधिविहितमदभ्रोमयात्रान्तराले पथे मत्तेभकुम्भस्थलपरि-
लसन्मौक्तिकानीव भान्ति । सव्येऽसव्येऽथ हस्ते कलयति कलया
श्यामतः शीतभानोः काश्मीरीरश्मिलीला स्फुरति मृगमदाश्रासिनी
कामिनीव ॥' अत्र लीला लीला पथे मथे काश्मीरी रश्मिलीलादि-
पदेषु सव्यञ्जनस्वरावृत्तित्वाद्भवति छेकानुप्रासालंकारः ॥ ५ ॥

अथ यमकालंकार —

सस्वरव्यञ्जनावृत्त्या स्तबकं यमकं भवेत् ।
देवं नारायणं वन्दे रमणीरमणीयकम् ॥ ६ ॥

सस्वरेति ॥ यदा स्वराणां व्यञ्जनानामावृत्त्या पृथक् स्त-
बकः वर्णसमूहो भवति तदा यमकालंकार । अत्रायं भाव । यत्स्व-
रयुक्तो यो यो हल्समुदायोऽभिहितस्तत्स्वरयुक्तस्य भिन्नार्थस्य तत्-
द्धल्समुदायस्यावृत्तिरिति । उदाहरणम् । रमणी रामा रमणीया यस्य तं
लक्ष्मीकान्तमित्यर्थ । समासान्त क. । तथाभूतं नारायणं देवं श्री-
हरिं वन्दे स्तौमि । अत्र भिन्नार्थस्य रमणीयपदस्यावृत्त्या यमकालंकारः।
यथा हृदयकल्पलतायाम्--'पञ्चेषुपञ्चेषुभिराहताङ्गी संगीतसंगीतप-
रम्पराङ्गी । वक्रेव यदा ललितस्वहस्ता यामाक्षि वामाधिपतीक्षणा-

न्तम् ॥' अत्र भिन्नार्थानां पश्चेषुपश्चेष्वित्यादिपदानां मध्ये प्रतिचरणमेव सस्वरव्यञ्जनावृत्त्या वर्णसमूहत्वाद्भवति यमकालंकारः। अत्र बहुत्वसूचकं स्तवकमिति महिम्ना त्र्यक्षरप्रभृतिषु तादृगावृत्तिसत्त्वे यमकालंकारो द्व्यक्षरावृत्तिसत्त्वे च लाटानुप्रास इत्येवायं भेदः ॥ ६ ॥

अथ पुनरुक्तप्रतीकाशो नामालंकारः—

> पुनरुक्तप्रतीकाशं पुनरुक्तार्थसन्निभम्।
> केसरी कानने भाति वनेभातिविमर्दकः।
> भवान् सिंहासने भाति भातिसिंहासनेभवान्॥ ७॥

पुनरिति ॥ वस्तुतः पुनरुक्तार्थकमिवापाततोऽवभासते यद्वाक्यं तत्पुनरुक्तप्रतीकाशो नामालंकारः। यथात्रैव केसरीति। अत्र कानने भाति वने भाति इति शब्दयोः पुनरुक्तार्थकत्वमापाततोऽवभासते। वास्तवं तु नास्ति। तथा हि। कीदृशः केसरी। वनेभातिविमर्दकः वनमंयगन्धिनामिभानां हस्तिनामत्यन्तं विमर्दको मर्दनकर्तेति। एवं सिंहासने भाति भातिसिंहासने इति शब्दयोरपि पुनरुक्तार्थकत्वमापातत एवावभासते नतु वास्तवमस्ति। तथा हि। किंभूतो भवान् भातिसिंहासनेभवान् भान्ति ते भाः सिंहासनं सिंहकृतस्वकुम्भोपवेशनं तदनिक्रान्ता यैस्तेऽतिसिंहासनाः। भाश्च तेऽतिसिंहासनाश्चेति कर्मधारयः। सिंहैरपि ये हन्तुमाक्रमितुं वा न शक्यन्ते एतादृशा इभा हस्तिनोऽस्य सन्तीति भातिसिंहासनेभवान् इति पुनरुक्तार्थमात्रसमत्वादिह भवति पुनरुक्तप्रतीकाशमलंकारः॥७॥

> शिक्षणाय मदमद्विवेकिना शिक्षणाय लघुबुद्धिशालिनाम्।
> लक्षणैरिह विचिन्तितैर्मया दर्शिता स्फुटतरा पद्धतिः ॥ १ ॥

इति श्रीचिरञ्जीविभट्टाचार्यकृतकाव्यविलासे अलंकारमयी
द्वितीया भङ्गी संपूर्णा ॥

अथ कुवलयानन्दकारिकाणां

टिप्पणीस्थपद्यानां च कोशः ।

इत्यलंकारमणिहारमध्यगतस्थिताना वर्णानुक्रमणिका ।



